अर्जुनस्य तनयाः षडमी ते, यान् निरूप्य विबुधाः कथयंति ।
षण्मुखः किमु मुखं प्रति देहत्वं चकार सुभगं पृथक् पृथक् ॥ ६ ॥
मुंजालदेवः प्रथमः प्रतीतो, धियां निधिर्धिधवरो द्वितीयः ।
गुणाकरोऽसौ **गुणपल्लसंज्ञो धना**भिधो धन्यतमो जनेषु ॥ ७ ॥
कामार्थाविव तौ मूर्त्तौ, **सांगागांगा**भिधौ सुतौ ।
अर्जुनस्य प्रियालापपरौ (वर्जित) वामनौ ॥ ८ ॥
श्रीपूर्णिमापक्षपयःपयोधौ, बभूव चंद्रो **गुणचंद्र**सूरिः ।
संप्रीणयद् भव्यचकोरपूगं, ज्योत्स्नानिभैर्यो वचसां समूहैः ॥ ९ ॥
पट्टे तदीये प्रबभूव भूरिसूरीश्वरस्थापनकृद् गणेशः ।
गुणप्रभाख्यो गुणरत्नराशिरत्नाकरः कल्मषवर्जितांगः ॥ १० ॥
श्रीगुणप्रभगुरुर्गुरुताया, भाजनं जनमनोऽब्धिशशांकः ।
आत्मकार्यविमुखः परकार्ये, प्राणदानरसिकः स बभूव ॥ ११ ॥
तत्पट्टपद्मकमलाहृदयैकहारः, सारः श्रुतेन गुणवान् **गुणभद्र**सूरिः ।
सिद्धांतसागरविगाहनमंदराद्रिर्भव्यांबुजप्रकरबोधनबालसूरः ॥ १२ ॥
श्रीगुणभद्रसूरीणां, स्फूर्त्तिमान् गुरुबांधवः ।
मतिप्रभः प्रभाजालभासितावनिमंडलः ॥ १३ ॥
तस्य श्रीकल्पसिद्धांतपुस्तकं स्वस्तिकारकं ।
सांगागांगातनूजाभ्यां, लेखयित्वाऽर्पितं नवं ॥ १४ ॥
कुलादि पक्ष वेदेन्दु, संख्यया (१४२७) समयेगते ।
श्रीविक्रममहीपालात्, मासे माधवसंज्ञके ॥ १५ ॥

७००१ श्री. शातिनाथजी ज्ञान भंडार. खंभात.

श्रीअध्यात्मोपनिषद्. (योगशास्त्रस्वोपज्ञवृत्तिः) ता. प्र. ९

इति परमार्हतश्रीकुमारपालभूपालशुश्रूषिते आचार्यश्रीहेमचंद्रविरचिते अध्यात्मोपनिषन्नाम्नि संजातपट्टबंधे श्रीयोगशास्त्रे स्वोपज्ञद्वितीयप्रकाशविवरणं ॥ ग्रंथाग्रं ३१०० ॥ मंगलं महाश्रीः ॥ भद्रं ॥

आसीच्चंद्रकुलांबरैकतरणिः **श्रीमानदेवा**भिधस्तद्वंशे
प्रभु**मानतुंग**गणभृत् प्राज्यप्रभावः प्रभुः ।
तत्राजायत **बुद्धिसागरगुरुः प्रद्युम्नसूरि**स्ततस्तच्छिष्योऽजनि
देवचंद्रगणभृद्गच्छाग्रणीर्वि श्रुतः ॥ १ ॥

श्रीदेवचंद्रस्य मुनीश्वरस्य, जातौ सुशिष्यौ जगति प्रशस्यौ ।
श्रीमानदेवः प्रथमो गणेशः, **श्रीपूर्णचंद्रो** गणभृत्तथाऽन्यः ॥ २ ॥

यः सैद्धांतिकमौलिभूषणमणिर्विद्वज्जनाग्रेसरः,
संतोषोत्तमरत्नराजिततनुः श्री**मानदेवप्रभुः** ।
यच्चेतः कलयापि नो विलिखितं संल्लापलीलावतीवे–
ल्लोचनचारुक्षितशरश्रेणिभिरात्मोद्भवः (वे) ॥ ३ ॥

श्रीपूर्णचंद्रसूरीणां, वादि गोवृंदनाशिनी ।
ब्रह्मनिघ्नापि साऽऽयाद्यो, याऽसूत परमं वृषं ॥ ४ ॥

श्री**मानदेव**सूरेः पट्टेऽजनि **मानतुंग**सूरि गुरुः ।
विधिरिव भवांतकारी, **नरकद्वेषी** स विष्णुरिव ॥ ५ ॥

अन्यच्च—

धर्क्कटवंशसुधानिधिचंद्रः, श्रेष्ठी **गणियाको** निस्तंद्रः ।
तस्य **गुणश्रीः** समजनि जाया, दक्षसुतेव सदैव विमाया ॥ ६ ॥

तस्यांगजैका सुमहत्तरायाः, **प्रभावतीसंज्ञमह**त्तरायाः ।
पार्श्वेऽग्रहीत् पंच महाव्रतानि, **प्रद्युम्नसूरेः** सुगुरोः करेण ॥ ७ ॥

जगतश्रीरुदयश्रीः श्रीचारित्रश्रीमहत्तराः । क्रमेण तासां सर्वासां, पादपद्ममधुव्रताः ॥ ८ ॥

आ निर्म्मलमतिगणिनीरम्यां श्री**योगशास्त्र**सद्वृत्तेः । द्वैतप्रकाशखंडस्य पुस्तिकां लेखयामास ॥ ९ ॥

श्रीमानतुंगसूरेः पट्टस्थितपद्म**देव**सूरीणां । तां प्रवचनरसपात्रं प्रददौ पुण्याय पुण्यतरां ॥१०॥

कल्याणाद्रिनृपो धराधरसुता जाया कुरूमंत्रिणौ वृद्धा वृद्धनगा जनास्तदपरेऽपेक्षावसाराकराः ॥
चंद्रादित्यचवरौपदातिभगणाः साम्राज्यमेतत् क्षितौ । यावत्तिष्ठति तावदेव विबुधैर्वाच्या सदा पुस्तिका ॥

संवत १२९२ वर्षे कार्तिक शुदि ८ रवौ धनिष्ठानक्षत्रे । योगशास्त्रवृत्तिर्द्वितीय प्रकाशस्य लिखितेति ॥ शुभं भवतु ॥

४६८३ श्री. उ. फो. जै ध. अमदावाद.

श्री दशवैकालिकसूत्रम् ता. प्र. १०

संवत् १२६५ वर्षे ज्येष्ठशुदि ५ रवौ ॥ मंगलं महाश्रीः ॥ **द्विगुणवप्रवास्तव्यश्रीमाल**-वंशीय**आशा** भ्रातृ व्यव० **चेला** पौत्रेण व्यव० **बउला** भ्रातृ **धांधा**पुत्रेण **देवकुमारेण** निजमातु **धनदेवी**नामिकायाः श्रेयोनिमित्तं लेखयित्वा दशवैकालिकपुस्तिका निजभगिन्यै**जगसुंदर**गणिन्यै पठनार्थं प्रदत्तेति ॥

७००३ श्री जैनविद्याशाळा. अमदावाद.

श्रीसूर्यप्रज्ञप्तिवृत्ति ता. प्र. ११

इति श्री**मलयगिरि**विरचितायां सूर्यप्रज्ञप्तिटीकायां विंशतितमं प्राभृतं समाप्तं ॥

श्रीमज्जिनेश्वरविहारविराजमानं सद्धर्म्मकर्म्मठजनव्रजलब्धमानं ।
सौवश्रिया प्रतिहतान्यपुराभिमानं ख्यातं **पहडाद्र** नगरं जयति प्रधानं ॥ १ ॥

तत्रौन्नत्यविशेष शालिनि गिरिप्राप्तप्रतिष्ठे शुभेच्छाये पर्वशतप्रशस्तविभवे **प्राग्वाट**वंशे ध्रुवं ।
लाषाह्वः प्रबभूव मौक्तिकमणिः सद्वृत्तभावं श्रितः,
श्रीमान् सज्जनमंडनं शुचिरुचित्रासादिदोषोज्झितः ॥ २ ॥

तमो विजेतुं पुरुषोत्तमस्य, सुदर्शन श्रीकलितस्य तस्य ।
पद्मासनाभोगविलासदक्षा, प्रिया गुणाढ्याऽजनि **लक्ष्मिदेवी** ॥ ३ ॥

तत्तन्निर्म्मलधर्म्मकर्म्मनिरतो **धर्मा**भिधानस्तयोः । संजातस्तनयः प्रशस्यविनयः श्रीमान्निरस्ताऽनयः ।
आश्चर्यं प्रतिपद्यपि प्रतिकलं साकल्यनिर्मल्यभाक् । यस्य स्पष्टमदीप्यतामृतरुचिर्निःशेषनश्यत्तमाः ॥४॥

षष्ठाष्टमादिकविचित्रतपोविधानव्यावर्णनाऽस्य ननु पुष्यति कामभिख्यां ।
संसारसागरतरण्डमखंडभावः । संसारतारणशतं कृतवान् कृती यः ॥ ५ ॥

श्रीमान् वयस्थो दयितान्वितोऽपि च, ब्रह्मव्रतं वत्सरपंचविंशतिं ।
स एषयावत्कथिकं प्रपालयन्न विस्मयं कस्यमनस्यवीविशत् ॥ ६ ॥

श्री**शक्रस्तव**पंचकादिविधिना वारांश्चतुर्विंशतिं तन्वानो जिनवंदनं प्रतिदिनं यावद्भवाभिग्रहात् ।
सम्यक्त्वस्य सुधीः शतत्रयमितैर्यो राजतैष्टंककै रंतर्मोदकमाहितैर्विहितवानुद्यापनं पुण्यवान् ॥ ७ ॥

इमं सतीचक्रशतक्रतू **रतू**रतूतुषन्निस्तुषशीलभृत्प्रिया ।
गुणा यदीया हृदयंगमाः सतां, श्रयंत्यजसं श्रवणावतंसतां ॥ ८ ॥

इतश्च—

श्रीमत्तपागणनभोगणभास्कराणां सिद्धान्तवारिधिविगाहनमंदराणां ।
श्री**देवसुंदर**गुरूत्तमपट्टभाजां, **सोमसुंदर**मुनीश्वरसूरिराजां ॥ ९ ॥

पियूषदेश्यामुपदेशभारतीं, निशम्य सम्यक्श्रुतभक्तिभावितः ।
ग्रंथं सलक्षद्वयमानमात्मनः, पुण्याय धन्यः स्वधनेन लेखयन् ॥ १० ॥
सोमवसुमनु (१४८१) मितेऽब्दे श्रीचित्कोशे व्यलीलिखत् योऽदात् ॥
यावद् व्योमा........सहृदयानंद कंदांबुदः ॥ शुभं भवतु ॥

५२१८ श्री. शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीपंचप्रस्थानव्याख्या. ता. प्र. १२

श्रीलक्ष्मीतिलको मुदेऽस्तु भगवान् श्रीन्यायतुर्याग्रिमाध्याये
भूमिगृहे स्थितानपि रहस्यार्थान् ममाद्योतयन् ।
श्रेयःस्नेहवराक्षयो न च मनाक्कंप्योऽपि दुर्वादिवाग्वा-
तैरव्ययसदृशःखलु नवो यद्गीःप्रदीपोदयः ॥ १ ॥

प्राक् संहृत्य सुरासुरेण जलधिं व्यालोड्य हेमाद्रिणोद्भूतं सारमुपाददे स्वयमहो एकांगमल्लस्तु यः ।
न्यायांभोधिममुं विगाह्य परितो बुद्ध्या कुशाग्रीयया, सामास्त्येन महार्थसारमचिराल्लात्वा व्यतारीन्मम २
तस्य **श्रीजिनरत्नसूरि**चरणांभोजांतिकेऽधीतिनः **श्रीलक्ष्मीतिलका**भिषेकनृपतेर्नानार्थरत्नैरलम् ।
कुर्वाणात्र सुवर्णदंडरुचिरा दुर्गार्थवृत्ते र्छलादेतस्या मयकोच्छ्रितोज्ज्वलयशः श्रीवैजयंत्युच्चकैः ॥ ३ ॥

इति युगप्रधान**श्रीजिनेश्वरसूरि**शिष्यलेश**श्रीअभयतिलको**पाध्यायनिर्मितायां **पंचप्रस्थान**-न्यायमहातर्कविषमपदव्याख्यायां पंचमाध्ययः समर्थितः ॥ नमोऽस्तु श्रीपार्श्वनाथाय ॥ नमः **श्रीजिनदत्तसूरि**चरणकमलेभ्यः ॥ सर्वदा सुप्रसादास्तु श्रीशारदा महादेवी ॥

चान्द्रेकुलेऽजनि **जिनेश्वरसूरि**रिन्दुर्हृत्वा तमो वसतिमार्गविकाशकारी ।
भेजे ततो**ऽभयगुरुश्च** नवांगटीकापीयूषकुंडनवकोद्धरणः श्रुताब्धेः ॥ १ ॥
जज्ञे तदीयपदवीनलिनीमरालः स्थेर्येयेश्चरित्ररमया **जिनवल्लभाख्यः ।**
आसीत्पदेऽस्य **जिनदत्तगुरुर्भ**टेन, येनादधे विधिपथःसुवहः खिलोऽपि ॥ २ ॥
आसीत्पदेऽस्य **जिनचंद्रगुरुश्च** पंचविंशो जिनो य इह सर्वजनेन गीतः ।
तस्मादुदै**ज्जिनपति**र्यतिराड् जयश्रीगाढोपगूढपरिमाद्यदमन्दमोदः ॥ ३ ॥

शिष्या स्तस्य **जिनेश्वरो** (?) सकृतसम्राजो जयंत्यंजसा सुव्यक्तैव सरस्वतीपरिवहोच्चैर्न्यायघंटाध्वनः ।
उत्सर्पोत्सवसंहतिर्जिनगृहेषु स्वर्णकुंभच्छलात्, पृथ्वी हेम फलैः फलति भुवनं यत्कोदये मोदते ॥ ४ ॥
विद्यालब्धिक्रियाभिस्त्रिजगदधिभुवा सुप्रसत्त्यैव तेषां,
हि नयमहातर्कशक्रेण टीका प्रोद्वाहिताऽसावपि साकं ।
पुंमात्रेणांगजास्ता बत बत मयका निर्द्धनेनापि बुद्धया,
तस्याभिप्रायवृत्तिर्भवतु सहचरी याव(द्विन्द्व)र्कयोर्भा ॥ ५ ॥

श्रीमल्लक्ष्मीतिलकोपाध्यायैः शोधितेयमतिनिपुणं । अन्यदपि यच्च शोध्यं तदत्र शोध्यं महाकुशलैः ॥

ओकेशवंश एव हि जयतादिह कल्पपादपैः पूर्णः ।

कलिकालेऽपि सदा यः सर्वेषां पूरयत्याशाः ॥ १ ॥

प्रगुणगुणमयोऽत्र पार्श्वनामा ध्वजकमलां कलयांचकार साधुः ।

स्म जयति मृगं मृगांकगं यो मधुरयशःकलकिंकिणीप्रगानैः ॥ २ ॥

चत्वारो **मानदेवः कुलधर बहुदेवोयशोवर्द्धनो**ऽस्य,

श्रीभर्तुर्बाहुभृता अजनिषत सुता धर्म्मकर्म्मप्रवीणाः ।

सत्पुत्रा मानदेवाद् य इह**धनदेव**स्तथा **राजदेवो**

निंबार्कश्चाविरासन् हिमगिरित इव स्वर्गसिंधुप्रवाहाः ॥ ३ ॥

देवधरलोहदेवौ, जातौ कुलधरांगजौ । यकाभ्यां कुंडलाभाभ्यां, पुण्यश्रीः समभूष्यत ॥ ४ ॥

विभ्रेजे (ध ?) **निचंद्रमा जिनपतिः** पुत्रो यशोवर्द्धनक्षीराब्धेर्जिनचंद्रविष्णुपदमाक्रांतं नितांतं महत् ।

बालेनापि हि येन साधुषु बहुज्योतिष्षु राज्यं दधे[ऽधे]

शेषानां शिरसि स्थितं पितृकुलं विश्वंच संप्रीणितं ॥ ५ ॥

संजज्ञे **बहुदेव**साधुनृपतेः **पद्माकरस्यांगभूः,**

पद्माभो गुरुदेवपादकमलार्चाऽभिः कृतार्थं जनुः ।

कुर्वाणो **जयदेव**साधुरमलो **लक्ष्माख्य**धुर्यप्रियाव्याजेन

ध्रुवमन्वहं तमभजल्लक्ष्मीः स्वयं देवता ॥ ६ ॥

लक्षिका चापरा वल्लभा शोभते पंचपरमेष्टिपदहेमपंचेष्टकैः ।

आरभत्यत्र यस्या रसज्ञा सदा **लाहिनी** चापि पुत्री रसज्ञा मुदा ॥ ७ ॥

लक्ष्म्यां वृषोर्व्यां **जयदेव**साधुरजीजनच्चाक्षतबोधिबीजः ।

पुरःप्रकांडौ **वरदेव—धांधौ,** शाखाकुलाधारकरौ सुसाधू ॥ ८ ॥

तत्राद्योऽजनि धार्मिको मतिमतां सीमा यतिप्रेक्षिणां

दीक्षादानगुरुर्मदोदयदवोलक्ष्म्या प्रियो नंदनः ।

श्रीजावालिपुरेऽत्र देवगृहिकां **पार्श्वस्य वीरेक्षितु**श्चैत्ये

यः समसूत्रयन्नि जयशःश्रीकेलिशैलोपमां ॥ ९ ॥

देवार्चा निपुणा च पंचपरमेष्ठिध्यानदानक्षमा, इन्नैर्मल्यपरोपकारमधुरालापादिकैः सद्गुणैः ।

यं लोकोत्तरमारचय्य नराऽमान्यं व्यलोलुप्यत श्रद्धा कार्तयुगेषु पुंसु विधिना **धान्धो** द्वितीयस्त्वसौ ॥

आद्यासीद्वरदेवसाध्वधिपतेः **प्रल्हादनस्यांगजाः** ।

जाया **चाहिनिका** निकाममधुरालापा सुधायाः प्रपा ।

सैषाऽसूत [सुती] सुतं **विमलचंद्रं** विश्वचंद्रोदयं,

साउल्यद नामिके च तनये श्रेयःश्रियः शेवधीः ॥ ११ ॥

हर्षाब्दो विमलो **जिनेश्वरगुरोः** पार्श्वे सुवर्णैर्धनैः
वर्षन्नुत्सति **रत्नवृष्टितनयां** प्रव्राजयन्नुत्सवैः ।
श्रीप्रल्हादन पत्तने जिनपतिं शांतिं प्रतिष्ठापयन्,
विष्णवादीन् पुरुषोत्तमान् किल दशामद्यापि चक्रेऽतिथीन् ॥ १२ ॥
श्राद्धाः सन्ति महर्द्धिका निजगुरोर्भक्तानुभक्ता घना
स्तकोर्किप्रविधायिनोऽ प्यथ सदा तत्पर्युपास्त्यादृताः ।
स्वप्राणानधिरोपयन्निजगुरोः कार्ये तुलायां तु योऽ-
थैकोऽयं **विमलेंदुरेव** स इति प्रोत्क्षिप्य बाहू ब्रुवे ॥ १३ ॥
प्रिया द्वितीयाऽस्य **राजूर्**दानशीलतपोगुणाः ।
यदंगजाः प्रणंदंति भावनाः स्वसुराशिषा ॥ १४ ॥
षट् पुत्रा **गुणचंद्रको भुवनचंद्रो हेमचंद्र** स्तथा. .... **अपूर्ण.**

७८८२ श्री जैनज्ञान शाळा. वीजापुर.

श्रीसूक्ष्मार्थविचारसारप्रकरणचूर्णिः ता. प्र. ११

इति श्री**मुनिचंद्र**विरचिता **सूक्ष्मार्थविचारसार**प्रकरणचूर्णिः समाप्तेति ॥ ग्रंथाग्रं २८७३ ॥
संवत १४९८ वर्षे फागुण वदि १४ रवौ महं **सांगा** लिखितं ॥ श्री ॥
आकरो नररत्नानां, कीर्तिकल्लोलिनीपतिः । **श्रीमानूकेशवंशो**ऽस्ति, रत्नाकर इवापरः ॥ १ ॥
श्रेष्ठी तस्मिन्नुदेति स्म, प्रतिष्ठावल्लिमंडपः **भादा**भिधानः श्रद्धानां, धोरणीषु धुरंधरः ॥ २ ॥
सचिवेंद्रस्य तस्यासीत्, **सहजूः** सहचारिणी । गंगातरंगा यच्छीलभंगीमंगीकरंति चेत् ॥ ३ ॥
तयोस्त्रयस्त्रपोपेतधियोऽमी तनयोत्तमाः । **धना भीमा**भिधौ **डांटाक**श्चेति प्रगटप्रभाः ॥ ४ ॥
सधर्मचारिणी तेषु, **धनसाधो**रजायत । **मारुसा** रूपकलया रंभासारूप्यधारिणी ॥ ५ ॥
शुक्तिर्मुक्ताचयमिव, द्यौरिव ग्रहमंडलं । रत्नगर्भेव रत्नौघं, सा प्रासूत सुतद्वयं ॥ ६ ॥
मेघाभिधानः प्रथमः प्रथिष्ठपुण्यक्रियासाधनसावधानः ।
ववर्ष यो मेघ इवाखिलेषु क्षेत्रेष्वमात्रद्रविणांबुपूरैः ॥ ७ ॥
द्वितीयोऽद्वितीयः **श्रीसदाकः** सदनं धियां । तपसि ब्रह्मचर्ये च, तुल्यो यस्यास्तु कोऽधुना ? ॥८॥
कमला केशवस्येव, शिवस्येव शिवाऽथवा । **मेघाकस्य** प्रियतमा, **भोली** नामाऽऽदिमाऽभवत् ॥९॥
तत्पुत्रोऽजनि **माणिक्य**श्वा(णा)क्य इव बुद्धिमान् । **कमलाई** द्वितीयास्ति, **हीरो वीरश्च** तत्सुतौ॥१०॥
व्यवहारिहारिहारिणि, निवसन् **श्रीस्तंभतीर्थ**वरनगरे । प्रथमाऽभिधेयतामयमवाप मेघाभिधः कृतिनां ॥
श्रीपावकाचलशृङ्गारश्रीशंभवजिनालये । तेनाष्टौ देवकुलिकाः, कलिकालहृताः कृताः ॥ १२ ॥
संसारपारदस्य **श्रीसोपारकपुरे**शितुः । सोऽपारद्रविणैर्जीर्णचैत्यं चक्रे पुनर्नवं ॥ १३ ॥
चतुर्विंशतितीर्थेशप्रतिमा मतिमानसौ, दृष्टमात्रकृतोद्वेगविरमा निरमापयत् ॥ १४ ॥
स्पर्द्धयाऽद्वयमामेव ज्योत्स्ना यौज्ज्वल्यशालिनी । **सुरत्राणपुरे** शाला, विशाला तेन निर्ममे ॥१५॥

चतुर्विंशतिवारांश्च, **माहिन्द्रि**तटिनीतटे । अकारयदमारिं यः सर्वा मारिं न्यवारयत् ॥ १६ ॥
अमात्रास्तीर्थयात्राश्चाऽनवाः श्रीसंघभक्तयः । यास्तेन तेनिरे कस्तद्व्यक्तिं वक्तुमलं भवेत् ॥ १७ ॥

श्रीमत्तपागणनभोङ्गणभास्काराणां **श्रीसोमसुंदर**युगोत्तमसूरिराजां ।
सम्यग् निशाम्य श्रुतभक्त्युपदेशमेवमुल्लासितः प्रमदमेदुरितादरेण ॥ १८ ॥

श्रीसिद्धांतादिकग्रंथलक्षं लेखयताऽमुना । तेन **श्रीमेघनादेन,** लेखितः पुस्तकोऽप्यसौ ॥ १९ ॥
चित्कोशस्थानके सोऽयं रोपितः कृतिनाऽमुना फलतात् ज्ञानकल्पद्रुर्विरत्यादिफलोदयैः ॥ २० ॥
अर्केन्दुमंडले यावद् व्योमश्रीकर्णकुण्डके । राजतस्तावदेषाऽस्तु पुस्तिका स्वस्तिशालिनी ॥ २१ ॥
इति प्रशस्तिः ॥

८०८६ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीउत्तराध्ययनटीका. ता. प्र. १४

सं. १३०८ वर्षे ज्येष्ट वदि ७ बुधे । नमो जिनागमाय ॥
प्रशस्यधर्मप्रभवः सुपर्वा, विशाल शाखो वरपत्रशोभः ।
महीभृतां मौलिषु माननीयः, श्री**धर्कटानां** प्रथितोऽस्ति वंशः ॥ १ ॥

साढाकनामा सुविशुद्धमध्यस्त्रासादिदोषैः परिवर्जितश्च ।
अजायतास्मिन् कुमुदावदातो, मुक्तामणिर्भास्वरकांतिदीप्रः ॥ २ ॥

समुद्र इव गंभीरः, शशांक इव शीतलः । दानवर्षी गजइव, **साढाकः** श्रावकोऽभवत् ॥ ३ ॥
साढाकस्य सुताः पंच, जज्ञिरे पांडवा इव । येऽर्थि संघातजातानां कौरवाणां क्षयं व्यधुः ॥ ४ ॥
सर्वेऽपि धर्मरसिकाः, सर्वेऽपि हितभाषिणः । पुमर्थसाधनपराः, सर्वे जनहितैषिणः ॥ ५ ॥
आद्य **आशाधर**स्तेषां, प्रमुखो गुणशालिनां । **महीधरो** द्वितीयस्तु, गुणग्रामैकमंदिरं ॥ ६ ॥
वोल्हाकनामा समभूत्तृतीयो हारवद् गुणी । शशांककाशसंकाशयशःपूरितभूतलः ॥ ७ ॥
यशोवीरश्चतुर्थोऽभूद्दानेश्वरशिरोमणिः । लोकोत्तरचरित्रोऽभूत्पंचमः **पाजड**स्तथा ॥ ८ ॥
महीधरस्य संजज्ञे, संजातोज्ज्वलपुत्रका । **गेहिनी** देहिनीव श्री**महाश्री**रिति संज्ञिता ॥ ९ ॥
केल्हणो नाम संजज्ञे, तनयः सनयस्तयोः । सद्गुरुचरणद्वंद्वसमाराधनतत्परः ॥ १० ॥
अजायत प्रिया तस्य **कमलश्री**र्महाशया । सत्यापितसुभद्रादिसतीलोका गुणैर्निजैः ॥ ११ ॥
सागरा इव लावण्यकलिताश्चतुराशयाः । अजायत सुधर्मिष्ठाश्चत्वारस्तनयास्तयोः ॥ १२ ॥

चंदनादपि मनोज्ञवागभूदाद्य एष **कडुक**स्ततः पुनः ।
रासलः सहजधर्मकर्मठो **येसल**स्तु गुणराशिपेशलः ॥ १३ ॥
गांगकस्तदनु गांगवारिणा, संनिभः शुचितया विचक्षणः ।
देवपूजनरतो निरंतरं, वासनारसनिवासमानसः ॥ १४ ॥

वल्लभास्तदनु जज्ञिरे क्रमात्, शीलभूषणविभूषितांगकाः ।
भर्तृपादपद्मैकदृष्टयो मूर्तिभाज इव संगताः श्रियः ॥ १५ ॥

पत्न्योऽभूवन् कुलोत्पन्नाः, निःसपत्नाःप्रियंवदाः **पद्मश्री**श्चेति **राज्यश्री**र्**लक्ष्मीः श्री**रिति संज्ञिताः ॥१६॥
पद्मश्रियास्त्रयः पुत्राः, संजाताः शुद्धबुद्धयः । प्रवाहा इव गंगाया, जगतीपावनक्षमाः ॥ १७ ॥
प्रथमो **मोहन**स्तेषां, जनमानसमोहनः । द्वितीयो **विजयपालो**, बालोऽपि हि महामतिः ॥१८॥
तृतीयो **लिंबदेवा**ख्यो मातुरत्यंतवल्लभः । सहकारसमाकारो, निवासः संपदामिव ॥ १९ ॥
आल्हुका च सुता जाता, बाल्यादपि महासती । तपःकर्मणि सर्वस्मिन्निरता विरता भवात् ॥२०॥
द्वितीया **महणू** नाम, संजाता तनया तथा। **राज्यश्रियाः** सुता जाता, वउल्हूनाम विश्रुता॥ २१ ॥
श्रियां च तनया जाता, **गोसली** नाम रुपभाक् । प्रवर्द्धमाना चंद्रस्य, कलेव विमलाकृतिः ॥२२॥
तथा—**यशोवीरस्य** संताने, सुतो **नरपति**स्तथा । **शिरपाल**श्च संजातः, **शांतिग**स्तत्सुतोऽभवत् ॥२३॥
पाजडस्य प्रिया जज्ञे, **जयश्री**र्नाम विश्रुता । तया सुतद्वयं जातं, **छाडा आसल**नामकं ॥ २४ ॥
छाडाकस्य प्रिया जज्ञे, **लीली**रिति विशालवाक् । **आसलस्य** तथा जाता जाया **आसमतिः** शुभा ॥२५

....सरलाशया । इत्यमेवमादि सकलं, साढाकस्य कुटुंबकं ॥ २७ ॥ इतश्च—
श्रीमान् सत्त्वगृहं गभीरिमनिधिर्निशेषभूभूषणैर्व्याकीर्ण्णः शुचिसाधुरत्ननिकरैः पाठीनपीठान्वितः ।
संसेव्यः सुमनोभिरक्षयगुणः ज्ञानामृतोत्कंठितै **र्नै**....(यात्**चन्द्र**गण).... ॥ १ ॥

अद्भुतयशोवादिसूरि स्ततश्च।**सूरिः श्रीसर्वदेव**स्तदनु समभवद्वादिवृंदैक वंद्यः,
श्रीमान् **प्रद्युम्नसूरिः** सकलकलिमलक्षालने वारिपूरः ॥ २ ॥

इत्येवमादिप्रमुखेषु सूरिवर्येपु गच्छत्सु कथावशेषं। **भद्रेश्वरसूरि**रजायतास्मिन्........भवत् ॥ ३ ॥
अक्लेशेन बभार मारविजयी श्रामण्यभारं पृथग्भागीकृत्य सुदुर्वहं स्ववपुषा सैकादशांगेन यः ॥ ४ ॥
श्रीसिद्धसेनसूरिस्तत्पट्टविशेषको जयति यस्य । कलिकोपमान सहिता दशनावलिरेव न तपःश्रीः ॥५॥
....विंदप्रतिबोधहेतुः । ततो विवस्वानिव **मानदेवः** सूरिर्यशःपूरितदिग्वितानः ॥ ६ ॥
ततोऽभूच्चारुचारित्रचर्यामर्या दयांबुधिः । **श्रीमद्रत्नप्रभाचार्यो** धुर्यो माधुर्यशालिनां ॥ ७ ॥
तत्पादांभोजभृंगः प्रवरगुणयुतः सर्वसिद्धांत वे(त्ता)........हतवपुः शर्करामिष्टवाक्यः ।
न्यासः श्रेयः शिवश्रीं दिशतु भुवि सदा **सूरिदेवप्रभोऽथ** ॥ ९ ॥

व्याख्यास्यतस्तस्य गुरोर्मुखाब्जात्, जैनागमं संसदि साधुवृत्तः ।
कुटुंबयुक्तः **कटुको** महात्मा, शुश्राव सिद्धांतरहस्यमेतत् ॥ १० ॥

चक्रे मुक्ति....त्रैलोक्यलक्ष्मीरपि स्वायत्ता विदधे च दुर्गतिगतिस्तेनैव रुद्रात्मनः ।
येन स्वं भुजपंजरार्जित मिदं वित्तं गुरोराज्ञया, सिद्धांताद्भुतपुस्तकस्य लिखने साफल्यमारोपितं ॥११॥
इत्याकर्ण्य वचः सुधाकवचितं वक्त्रांबुजात् सद्गुरोः साधुः साधितमुक्तिमार्गमतिकः सद्भावनाभावितः ।

वर्षे सिद्धिवियत्कृशानुविधुभिसंख्याः(१३०८)कृते श्रेयसे,
पित्रोः सुंदरमुत्तराध्ययनकं ग्रंथं मुदाऽलीलिखत् ॥ १२ ॥

न केवलं पुस्तकमेकमेव, विलेखया मास....धूप धाटि नालिकेर-कलितं चंद्र प्रभावं द्रगं ॥
यावन् मेरुकरे गभस्तिकटके ध्वस्तेऽथ पिन्यांगना ॥ तावन्नंदतु पुस्तकः सुगुरुभिर्व्याख्यायमानो बुधैः ॥
॥ मंगलमस्तु ॥ प्रशस्तिरियं कृता लिखिता च श्रीरत्नाकरसूरिणा ॥

८०८४ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीरत्नचूडकथा, ता प्र. १५

पूजादिविधानफलं समाप्तं ॥ रत्नचूडकथा ॥ संवत १२२१ ज्येष्ठ सुदि ९ शुक्र दिने अद्येह श्रीमदणहिलपाटके महाराजाधिराजजिनशासनप्रभावकपरमश्रावकश्रीकुमारपालदेवराज्ये श्रीचड्डापल्यां च श्रीकुमारपालदेवधारवर्षनरेंद्रराज्ये श्रीचक्रेश्वरसूरि-श्रीपरमानंदसूरिप्रमुखउपदेशेन श्रीचड्डापल्लिपुरीवास्तव्य श्रे०पूना श्रावकेण आशाचंद्र-आशारपोइणि-छाहिणि-राजू-प्रमुखमानुषसमेतेन इदं ज्ञाताधर्मकथां--रत्नचूड कथापुस्तकं लिखितमिति.

शिवमस्तु सर्व्वं जगतः परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयांतु नाशं सर्व्वत्र सुखीभवतु लोकः ।

श्रीपरमानंदसूरिश्रीयशःप्रभसूरीणां ॥

८०९० श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीउपमितिकथा. ता. प्र. १६

श्रीमालाचलमौलिमूलमिलितत्रैलोक्यसुश्लाघितः, पर्व्वालैःकलितः सुवर्णनिलयः प्रासाद लब्धालयः ।
लीनालीभ्यकुलः प्रलीनकलुषः सुभ्रातृपुत्रानुगो वंशोऽस्ति प्रकटः सदौषधिनिधिः श्रीधर्कटानां पट्टः १
सारासारविचारचारुचतुरः सारार्थबद्धादरः, संसारोदरवर्त्तिजंतुशरणः श्रीमज्जिनार्चापरः ।
करुण्याकरसद्गुरु(स्तु)तिवशप्राप्तार्थदानोद्यतस्तत्रात्मयीकुलक्रमोचितरतः सन्नेमिचंद्रोऽभवत् ॥ २ ॥

तस्यानघा घनपयोधरयुग्मरम्या, रामानुरूपगुणरंजितभर्तृचित्ता ।
चिंताव्यतः तफलदायकधर्म्मलीना, निर्वाणि नाम विदिता जनतासु पत्नी ॥ ३ ॥

जीवाजीवपदार्थसार्थवचनः संपूर्णचंद्राननः, सर्वाधीनधनः सलीलगमनः क्रोधेभपंचाननः ।
नैपुण्यार्जितसज्जनः प्रतिदिनं प्रारब्धदानावनः, सूनुः श्लाघितसर्व्वदेव भुवनख्याताभिधानस्तयाः ॥४॥

दैवेन केनापि कदाचिदेष नीतो रजन्यां स्वगृहात् प्रसुप्तः ।
अष्टापदे वंदितवाञ्जिनेंद्रान् प्रातः स्वहस्ते कुसुमं ददर्श ॥ ५ ॥

सदा दानासक्ता स्वकुलविमलाचारनिरता, सुशीलप्रख्याता परहितरता दैन्यरहिता ।
असमानातिक्रांता गुणगणयुता सज्जनमता । सदच्छुप्सा नामावर सहचरी तस्य च तयोः ॥ ६ ॥

लक्ष्मीपतिः सुतनयोऽजनि **यक्षदेवः, श्रीराजिनी**नयनसम्मद **आम्रदेवः** ।
धांधी मनोभवनदीपक**चांदिगाख्यस्तुर्यो यशोमति**वधूप्रिय**पुंडरीकः** ॥ ७ ॥

चतुर्भि रेभिर्जिनधर्मलीनैर्वि भावितागाधभवाब्धिभावैः ।
व्यधायि **धंधा(धंघा)णकसन्निवेशे,** शरण्य**चंद्रप्रभदेव**हर्म्य॥ ८ ॥
प्रत्याख्यानं येन कृत्वैदनादेः,पद्भ्यां निग्गत्यो (त्रिर्गल्याऽप्यो) जयंते नगेंद्रे ।
श्रीमन्नेमिर्बदितः पूजितश्च, क्षिप्रं भूयात् **यक्षदेवः** स सौख्यी ॥ ९ ॥

यक्षदेवस्य तस्योद्यमी जातवान्, चारुपुत्रः प्रियः **शांत**नामादिमः ।
धर्म्मकर्म्म**सुशीलाऽऽम्रदत्ता**भिधः । क्रोधकोपाजितः कामरूपोऽ**जितः** ॥ १० ॥

धर्म्मार्थादिचतुः प्रकारपुरुषस्वार्थोद्यतस्यान्यदा, द्वौ द्वौ सुंदरभार्ययोर्वरसुतौ श्राद्धा**म्रदेवस्य** तौ ।

संजातौ कुलजः श्रियः सुसरलौ **पार्श्वाख्यमृणागकौ** ।
राजन्यो बुध**लक्ष्मणो** गुणनिधि**र्नागेंद्र**नामानघः ॥ ११ ॥
सन्नेमिचंद्र गुणमंदिर **देवचंद्र**सू नुद्वयं व्यजनि **चांदिग**नामधेयः ।
प्रद्युम्नशंबकृतनामकसुऽज्वलांगं, सत्पुंडरीकसुधियाऽजनि पुत्रयुग्मं ॥ १२ ॥

नागेंद्रः शुभधर्म्मकर्म्मनिरतः **सन्मोहिनी** भार्यया, **पद्मावत्य**भिधानया सरलया स्वकीयया संयुतः ।
चाहिन्या सुतया सुतेन गुणिना **सुश्रीकुमारेण** वै । **शांता**पत्ययशःप्रियानघ**यशोदेवेन** धर्मार्थिना १३

अथान्यदा दानतपोविधानसुभावना शीलसनाथधर्म्मे ।
जिनप्रणीते विदधत् प्रयत्नं, शृणोति धर्म्म्यं वचनं गुरुभ्यः ॥ १४ ॥
तद्यथानिरवधि भववार्द्धौ कर्म्मदोषाद् भ्रमंतः, प्रवरशरणहीना योनिलक्षेषु जीवाः ।
कथमपि त्रुटियोगान् मानुषं जन्मरत्नं, सकलगुणविशिष्टं कष्टलक्षैर्लभन्ते ॥ १५ ॥
प्राप्य तत्प्राणिभिः प्रार्थितार्थप्रदं प्रेरणाप्रोद्यतप्रांजलप्रेरितैः ।
प्रत्यहं चिन्तयित्वा धनाद्यस्थिरं, कर्तुमेवोचितं चारु जैनं वचः ॥ १६ ॥
प्राणातिपातविरतिप्रमुखानि यानि, जैनागमे निगदितानि महाव्रतानि ।
तानि क्षमा यदि न कर्तुमशक्ति योगाद्यूयं कुरुध्वममलं गृहिधर्म्ममेनं ॥ १७ ॥

कर्तव्यं जिनपुंगवस्य महनं स्तोत्रैश्च तत्संस्तवः सेव्यः साधुजनः प्रसन्नवदनैः श्रव्यं जिनेंद्रोदितं ।

चिंत्या द्वादश भावना निजहिते कार्यः प्रयत्नो महान्,
शक्त्या चान्यहिते भवाब्धितरणप्रत्युद्यतैः प्राणिभिः ॥ १८ ॥

मोहादिद्विपकुंभभेदनविधौ येषां सदा पौरुषं, कामित्वं कमनीयमुक्तिललनापीनस्तनस्पर्शने ।
न्यायोपात्तधनं गतं जिनमतक्षेत्रेषु सप्तस्वहो,तेषां पौरुषकामिता विभविता मन्ये कृतार्था भुवि ॥१९॥
रम्ये श्रीजिनपुंगवस्य सदने बिंबे तदीयेऽनघे । संघे श्लाघ्यतमे प्रशस्तचरिते प्रोद्यच्च तुर्वर्ण्णके ।
सर्वज्ञागमलेखने विनिहितं वित्तं भवेत् पुष्टिदं,सत्य(त्)क्षेत्रे विधिनोप्तमिष्टसमये शाल्यादि बीजं यथा २०
ये कृत्वा जिनमंदिराणि विधिना संपूज्यवस्त्रादिभिः, श्रीसंघं समुपात्तनीतिविभवः श्रद्धापराः श्रावकाः ।

स्याद्वादप्रतिबद्धवाक्यजनकश्रीवीररागेण यतन्निर्णीतं किल लेखयंति भविनः किं किं न तैः सत्कृतं ! २१
श्रुत्वा पुस्तकवाचनामनुदिनं गृह्णंति केचिद् व्रतं, देवाधीशजिनेंद्रपूजनपराः श्राद्धा भवेयुः परे ।
अन्ये भद्रकभावभावितमनःसद्धर्मयोग्या नरा, जायंते खलु यस्य पुस्तकमिदं हेतुः स तत्श्रेयसः ॥२२॥
इत्याकर्ण्य जिनप्रणीतमनघं धर्म्मगुरुभ्यस्ततः पर्यालोच्य कुटुंबकेन गुणिना **नागेंद्र**नामा गृही ।
सिद्धाख्येन कृतां कथा**मुपमिर्तिं** सिद्धांतसारोद्धृतां, तोषादेष सुधीर्व्यलीलिखदिमां स्वश्रेयसे पुस्तके २३
यावन् मेरुः प्रतपति रविर्द्योतते यावदिंदु र्यावद् वायुः स्फुरति गगने तारकाः संति यावत् ।
यावद् भूमिः प्रवहति पयः सागरे यावदेतत् तावन् नंद्याद् गुणिभिरनिशं पुस्तकं वाच्यमानं ॥
॥ मंगलं महाश्रीः ॥

७९५७ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीनिर्भयभीमव्यायोगः । ता. प्र. १७

समाप्तोऽयं **निर्भयभीम**नामा व्यायोगः । कृतिरियं प्रबंधशतुकर्तुर्महाकवेः **रामचंद्रस्य** । यादृशं पुस्तके दृष्टं, तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा, मम दोषो न दीयते ॥ संवत् १३०६ वर्षे भाद्रवा **वदि** ६ रवावद्येह श्रीमहाराजकुलश्री**उदलसिंह**कल्याणविजयराज्ये निर्भयभीमनामा व्यायोगो लिखित इति । शुभं भवतु लेखकपाठकयोः ॥

७६२२ श्री जैनधर्म प्रसारक सभा. भावनगर.

श्रीउपदेशमाला । ता. प्र. १८

संवत् १३८३ वर्षे कार्त्तिक शुदि १३ शनौ, अद्येह **श्रीदेवगिरौ** साधु**राजसिंह**सुतसाधु**तिहुणसिंहेन श्रीमदुपदेशमाला** लघुपुस्तिका लिखापिता ॥

यादृशं पुस्तके दृष्टं, तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा, मम दोषो न दीयते ॥ मंगलमस्तु ॥ शुभं भवतु ॥

७०२३ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीजंबुद्वीपप्रज्ञप्ति । ता. प्र. १९

ॐ नमः । **ओकेश**वंशे **जगसिंह**साधोस्तनूद्भवोऽजायत साधुमुख्यः ।
वदान्यधुर्यः **पदमा**भिधानः, ख्यातः पृथिव्यां गुणगौरवेण ॥ १ ॥
प्रियाऽस्ति तस्यामलशीलभूषणेनालंकृता **पूनसिरीति** नाम्नी ।
तत्कुक्षिपाथोरुहराजहंसी, **राजू** प्रसिद्धाऽस्ति सुता सु(तु)तस्य ॥ २ ॥

........४८.........भवत्साधु श्रीमा**भरपति**र्गुणी । तस्याभवत्तनूजन्मा, साधु**गोला**भिधानतः ॥४॥
तत्प्रियाऽजनि **पूनाहि,** पुण्यकर्मैकतत्परा । श्रीसर्वज्ञार्चने निष्ठा, शै(शी)लरत्नैकमंडना ॥ ५ ॥

तस्याः कुक्षिविभूषणं विजयवान् **श्रीआसधिरा**भिधः,

साधुः श्रीजिनशासनोन्नति........लं सर्वत्र यो गान्य(गीय)ते ॥ ६ ॥

मौनं पुण्यमिव प्रौढं, चतुरक्षि २४ जिनालयं । योऽचीकरत्तमांशत्रुंजयभूधर मंडनं ॥ ७ ॥

स्तंभतीर्थपुरे, **सोजींत्रिके**, **कावीपुरे** तथा । **टींबाख्य**(ख्ये च)पुरे, **हार्थीदेणे नगर**केऽपि च ॥८॥

अणहिल्लाभिधे द्रंगे, तथा ग्रामे **बलासरे** । यः श्रीजिनगृहान्........निजं जनुः सदापियः ॥१०॥

तस्य संघपतेरस्ति सा **राजूः** प्राणवल्लभा । धर्मकर्मैकनिष्णाता, शीलालंकारधारिणी ॥ ११ ॥

श्रीमज्जिनेंद्रपूजाद्यैर्दानाद्यैरपि नित्यशः । कृतार्थयति यो जन्म स्वं नैकैः पुण्यकर्मभिः ॥ १२ ॥

इतश्च—

विश्वख्याततपागणा....दिनिखिलग्रंथार्थवित्स्वामिनः, सूरींद्रा विहरंति केवलमिलाजीवोपकाराय ये ॥१३॥

तेषां श्रीयुत**देवसुंदर** इति ख्याताभिधानां गुरू-

त्तंसानाममृतादतीवसरसां श्रुत्वा जवाद्देशनाम् ॥....साऽलेखयत् ॥ १४ ॥

॥ युग्मं ॥ श्रीसंघनृपस्यवासव....लिभर्ति दिन भ्रोजीः...........

७०१५ श्री हुकममुनीजी ज्ञानभंडार. सुरत.

श्रीपंचमस्थानविषमपदव्याख्या. ता. प्र. २०

इति युगप्रधान**श्रीजिनेश्वरसूरि**शिष्यलेश**श्रीअभयतिलको**पाध्यायनिर्मितायां **पंचप्रस्थान**-न्यायमहातर्कविषमपदव्याख्यायां **न्यायालंकाराख्यायां** । पञ्चमोऽध्यायः । समर्थितः । शुभं भवतु, सर्वकल्याणमस्तु ॥

यादृशं पुस्तके दृष्टं, तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा, मम दोषो न दीयते ॥ १ ॥

स्वस्ति संवत् १४८० वर्षे अद्येह श्री । **डुंगरपुर**नगरे राउल **श्रीगइपालदेव** राज्ये **श्रीपा-र्श्वचैत्यालये** लिखितं **पचाकेन** ॥

७०२८ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीपृथ्वीचंद्रचरित्रम् ता. प्र. २१

सम्वत १२१२ वर्षे ज्येष्ट सुदि १४ । गुरावद्येह **श्रीमदणसिंह**हिल्लनयर समतो (साम-न्तोपनमना) सेसमवि(धि)गत पं(च)महाशब्दवाद्यमानं चौलुक्यकुलकमलकलिकाविकासं **कर्णा-**टरायमानमर्दनकरं **सपादलक्ष**राष्ट्रवनदहनदावानलंमालवे राष्ट्रे निजाज्ञया संस्थापनकरं **मूलराजपाटो-**द्वहनधुराधौरेयं पार्व्वतीप्रियवरलब्धप्रसादं इत्यादिसमस्तराजावलीमालालंकारविराजमान**श्रीकुमरपा-लदेव**विजयराज्ये तत्पादावाप्तप्रसादमहाप्रचंडदंडनायक**श्रीवोसरि लाट देश** मंडले **महीद**(य)

मुनयोरंतराले समस्तव्यापारान् परिपंथयंतीत्येतस्मिन् काले जीर्णे(र्णो)द्ग्रामे नियमसंजमस्वाध्याय-ध्यानानुरतपरमभट्टारकआचार्यश्रीमदजितसिंहसूरिकृते श्रावकसोढूकेन परमश्रद्धायुक्तेन **पृथ्वीचंद्रचरित्रपुस्तकं** विशुद्धबुद्धिना लिखापितं । लिखितं च पंडितमदनसिंहेनेति ॥ मंगलं महाश्रीः ॥

संवत् १४७८ वर्षे वैज्ञानिकशिरोमणिपूज्यपं० **शान्तिसुंदरगणिपादैः** सर्वे चित्कोशकार्ये गंजुकसमारचनादिमकारि, भारु(भृगु)कच्छकशालायाम् । श्रीसंघस्य शुभं भवतु श्रीचित्कोशेन॥ पं० **शांतिसुंदरगणिभि**श्चित्कोशगंजुकसमारचनादिकृत्यं विदधे ॥ श्रीः ॥

७०४८ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीसप्तमं पर्वम् (त्रिशष्ठीय) ता. प्र. २२

समाप्तं चेदं सप्तमं पर्व ॥ रामलक्ष्मणदशानना नमिस्तीर्थकृच्च हरिषेण .... वर्णिताः श्रुति सुखाय संतु वः ॥ ग्रंथाग्रंथ ३८८८ ॥ सं. १३१८ वर्षे ज्येष्ठ शुदि २ रवावद्येह दंडाधिपश्री .... पति महाराजाधिराजश्री**अर्जुनदेव**कल्याणविजयराज्ये तन्नियुक्त महं० **श्रीसोम**प्रतिपत्तौ ठकु० **विकम्वसी** ....लेखितेयमिति ॥

यादृशं पुस्तके दृष्टं, तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा, मम दोषो न दीयते ॥ लेखकपाठकयोः ॥ शिवमस्तु सर्वजगतः ॥ मंगलं महाश्रीः ॥ शुभं भवतु ॥

७९४७ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्री(समराइच्चकहा) समरादित्यकथा. ता. प्र. २१

वंशः **श्रीपल्लिवालोऽस्ति,** सशाखः शतवर्धवान् । भूभृतोऽप्यधरीचक्रे येनैकछत्रितात्मना ॥ १ ॥

अजनि विनयपात्रं तत्र पुंरत्नचूडामणिमलितकीर्तिः **साढदेवा**भिधानः ॥
निरुपमजिनराजस्मेरपादारविंदाविचलविहितसेवावाप्तविश्वप्रतिष्ठः ॥ २ ॥

शीलव्रतदृढा **साढू** संज्ञिता तस्य वल्लभा । जिनक्रमयुगाम्भोजे यन्मनो हंसकायते ॥ ३ ॥
भ्राताऽभूत् साढदेवस्य **देशलः** सत्यशीलितः । **पदमी**नामधेयाऽथ, प्रिया तस्य विवेकिनी ॥ ४ ॥
आसीत्श्रेष्ठि(सु) **साढदेवतनुभूजार्जाक** नामा जिनश्रेणिध्याननिशा(णतेजि)तमतिप्राकाश्यनश्यत्तमाः शश्वद्यस्य यशःप्रसूनमसमं राकानिशानायकज्योतिःशालितनिर्मलाम्बर(तले)मोदाय यज्जातवान् ॥५॥
जाया तस्य **जयतुका** समभवद् दीनानुकंपारससारासिक्तविवेककंदलवन संस्तारबद्धादरा । नित्यध्यातजिनेश्वरांह्रिनखरुग् ध्वस्तांधकारांकुरे । यस्याश्चित्तगृहोदरे प्रतिपदं धर्मः सुखं खेलति ॥६॥
पुत्रो **लाखण**संज्ञितोऽजनि तयोः पुण्यैकपात्रं कृती नीतिज्ञो विनयी नयी सुकुलजो दक्षः क्षमादक्षिणः। येनोत्तुंगनिजान्वया (योचय) वयमहामूर्ध्नि स्फुटं दिग्विस्तारि यशः सुकेतनपटः प्रस्तारयामासिवान् ॥७॥

जाजाकस्याभवद् भ्राता **जसपाला**भिधः सुधीः । **संतुका** संज्ञिता तस्य दयिता दानशालिनी ॥८॥
जातौ तयोः सुतौ **रत्नधनसिंहा**भिधावुभौ । भगिनी **जानुका** नाम्नी बभूवाम्नायभूषणं ॥ ९ ॥
अथ—

जायाऽजायत **लाषणस्य** कुलजा दानोद्यता **रुक्मिणी**, नाम्ना दीनसुवच्छ(त्स)लाऽत्रयविनी पुण्येंदिरा मंदिरे॥
यस्या मानसपंकजं त्यजति नो पक्षद्वयीनिर्म्मलो, धर्म्मो हंसयुवा युतो वरल(ट)या तीर्थेशभक्त्याख्यया ॥१०॥
नरपतिरिति नामा **लाषणस्यांग**जन्मा, तदनु **भुवनपालाख्यो यशोदेव**संज्ञः ॥
क्रमश इह तनूजा जज्ञिरे तस्य तीर्थाधिपतिसुगुरुपूजालब्धलक्ष्मीविकाशाः ॥ ११ ॥
जाल्हणदेवीति सुता **जासी** नामा तथा परा पुत्री । सद्धर्मकर्मनिपुणा कुरमादिमा दुहितरोऽभूवन् १२
आसीत् कुलीनचरिता **नायिकदेवी** नरपतेर्दयिता । अपरा च **गौरदेवी** तनुभूः **सामंतसिंहाख्यः**॥१३॥
यशोदेवस्य पत्नी **सोहरा** संज्ञयेति प्रतिजज्ञे । तस्याः समभूत् पुत्रः **सांगण**नामा स्फुरद्धामा ॥१४॥
प्रिया **भुवनपालस्य पाउंदेवी**ति संज्ञिता । बभूव भाग्यभूः शीलरत्नरत्नाकरावनिः ॥ १५ ॥

मातुस्तातो **राजपाला**भिधानः मातुर्माता यस्य **राणी**ति नाम्नी ।
मातुर्भ्राता **राणिगो वूटडिश्च** मातुः पक्षो **लाषणस्या**घमुक्तः ॥ १६ ॥
श्रीमज्जिनेशप्रभुहस्तपद्माधिवासतो**लाषण**नामधेयः ॥
तीर्थेशयात्रादिककर्म्मनिर्म्मलः, कुलप्रदीपः सुजनोपकारी ॥ १७ ॥
अथान्यदा **लाषण** एष हृष्टः, सदृष्टशास्त्रार्थविनीतचेष्टः ।
भवस्वरूपं क्षणदृष्टनष्टं, विभावयामास निशावसाने ॥ १८ ॥
प्रातः प्रयातः सुगुरोः समीपे, तदेव तत्रैव तथा निशम्य ।
ततः प्रबोधार्कसुदृष्टवस्तुना, समाधिना ध्यायति सर्वमर्थदः ॥ १९ ॥

तथाहि—

देहं दुःखैकगेहं जलनिधिलहरीचंचलं जीवितव्यं, संपत्तिः प्राणभाजां प्रसृमरपवनोद्धूतकेतूपमेया ।
सौंदर्यं सुभ्रुनेत्रांचलललितसमं बंधुसंगोऽप्यनित्यो, जैन धर्मं विनाऽन्यन्नहि मनुजभवे शाश्वतं किंचिदस्ति॥२०॥
दानशीलतपोभावभेदैर्धर्मश्चतुर्विधः । मुख्यतो यतयो दानमेवैकं संप्रचक्षते ॥ २१ ॥
यद्यपि त्रिविधं शास्त्रे, तद्दानं ननु विश्रुतम् । तथापि ज्ञानदानान्नो, दानमन्यत् प्रशस्यते ॥ २२ ॥
ज्ञानं श्रुताश्रितं प्रोक्तं, श्रुतं शास्त्रमिति स्मृतं । तच्च द्विधा समाख्यातं, कल्पिताऽऽचरितक्रमात् ॥२३॥
तद्वयोद्योतितं किंचित्, चरितं सुनिरूपये । इति चिंतयतस्तस्य, स्मृतिगोचरतां गतं ॥ २४ ॥
चरित्रं **समरादित्य**भूभुजः प्रशमास्पदम् । संसारिजीववैराग्यरसनिस्यन्दभाजनं ॥ २५ ॥
(द्वेषव्याघ्र) हुताशनं शमधूनीपूरार्णवं दुर्णयध्वांतध्वंसनभास्करं कलिमलप्रक्षालनैकामृतं ।
एतत्सच्चरितं सुचारु समरादित्येशितुः शास्त्रतो बद्धं श्री**हरिभद्रसूरिगुरुणा** संवेगसंगाय नः ॥ २६ ॥
यदिष्टं वस्तु संसारे तदिष्टेषु नियोज्यते । अन्यदिष्टं हि ना दृष्टं, मातरं पितरं विना ॥ २७ ॥
मातुर्जयतुकाया निजपितृजाजाद्वयस्य पुण्याय । **समरादित्यचरित्रं** लेखितं **लाषणे**नैतत् ॥२८॥

येन द्रव्यमुपार्जितं शुभवशादेकांगवीरेण तत्क्षेत्रे सप्तमिते निवेश्य विहिता सद्वृत्तिरूपा धृतिः।
तत् सीम्नि प्रकटो जिनेशसुगुरोरादेशतः शाश्वतो जैनं श्रीसमरार्कपुस्तकतयाऽऽघाटः समारोपितः २९

नंदनवभानु (१२९९) वर्षे, पित्रोः सुकृताय लाषणः कुलजः।
समरादित्यचरित्रव्याख्यानं कारयामास ॥ ३० ॥

यावन्नालति नागराट् नलिनति क्षोणीतलं दिक्ततिः पत्रस्तोमति केसरत्यहिमरुक् किंचांबरं भ्रमति।
तावत् तत् समरार्कभूपचरितं चैतन्यविस्तारकं, श्रोतॄणां शिवसंपदं वितनुतां व्याख्यायमानं बुधैः ॥३१॥

नंदनवभानु १२९९ वर्षे श्रीरत्नप्रभसूरिणा शुभध्यानात्।
श्रीस्तंभतीर्थनगरे, व्याख्यातं कार्तिके मासि ॥ ३२ ॥
शिवमस्तु सर्वजगतः परहितनिरता भवंतु भूतगणाः।
दोषाः प्रयांतु नाशं सर्वत्र सुखीभवतु संघः ॥ ३३ ॥

*८०९१ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीव्यवहारसूत्रम्. ता. प्र. २४

श्रीमज्जैनेंद्रबिंबप्रवरजिनगृहप्रोल्लसत्पुस्तकादौ। सप्तक्षेत्र्यां प्रभूतव्ययितनिजधनो लाहडो नामतोऽभूत्।
× × × × लक्ष्मश्रीरित्यभिख्या सुचरितसहिता तस्य भार्या सदार्या ॥ ७ ॥
अभयकुमाराभिख्यस्तृतीयोऽजनि नंदनः। यो दध्रे मानसं धर्मश्रद्धासंबंधबंधुरं ॥ ८ ॥
धर्मे सहाया सहदेवसाधोः सौभाग्यदेवीति बभूव जाया।
पुत्रौ च षेढाभिधगोसलाख्यौ प्रभावकौ श्रीजिनशासनस्य ॥ ९ ॥

किंच—

यौ कृत्वा गुणसंघकेलिभवनं श्रीसंघमुच्चैस्तरं।
श्रीशत्रुंजयरैवतप्रभृतिषु प्रख्याततीर्थेषु च।
न्यायोपार्जितमर्थसार्थनिवहं स्वीयं व्ययित्वा भृशं।
लेभाते शुचिराय संघपतिरित्याख्यां स्फुटां भूतले ॥ १० ॥
आद्यस्य जज्ञे किल षींबदेवी नाम्ना कलत्रं सुविवेकपात्रं।
तथा सुता जेहडहेमचंद्र कुमारपालाभिध पासदेवाः ॥ ११ ॥

अभवद्गोसलसाधोर्गुणदेवीति वल्लभा। नंदनो हरिचंद्राख्यो, देमतीति च पुत्रिका ॥१२॥
जयदेवस्य तु गृहिणी, जाल्हणदेवीति संज्ञिता जज्ञे। पुत्रस्तु वीरदेवो देवकुमारश्च हालुश्च ॥१३॥
शुभशीलशीलनपरा अभवंस्तेषामिमाः सधर्मिण्यः। विजयसिरीदेवसिरी—हरसिणिसंज्ञा यथासंख्यं ॥१४॥
एवं कुटुम्बसमुदयउज्ज्वलवृषविहितवासनाप्रचयः। सुगुरोर्गुणगणसुगुरोः शुश्राव सुदेशनामेवं ॥१५॥
दानशीलतपोभावभेदाद् धर्मश्चतुर्विधः। श्रयणीयः सदा भव्यैर्भाव्यभद्रपदप्रदः ॥ १६ ॥

---

* पहेला सात श्लोकना अनुसंधान माटे जुओ ता. प्र. नं. २५ पाने १८ अने १९.

विषयजसुखमिच्छोर्गेहिनः क्वास्ति शीलं ! करणवशगतस्य स्यात्तपो वाऽपि कीदृक् ! ।
अनवरतमदभ्राऽऽरंभिणो भावना किं !, तदिह नियतमेकं दानमेवास्य धर्म्मः ॥ १७ ॥

ज्ञानाभयोपग्रहदानभेदात् तच्च त्रिधा सर्वविदो वदंति ।
तत्रापि निर्वाणपथैकदीपं, सद्ज्ञानदानं प्रवरं वदंति ॥ १८ ॥
कलानुभावाग्मतिमांघतश्च, तच्चाधुना पुस्तकमंतरेण ।
न स्यादतः पुस्तकलेखनं हि, श्राद्धस्य युक्तं नितरां विधातुं ॥ १९ ॥
एवं समाकर्ण्य सकर्णकर्णपीयूषपोषप्रतिमं सु (पु)त्रैः ।
तृतीयखंडं व्यवहारसत्कं, विलेखयामास सुपुस्तकेऽस्मिन् ॥ २० ॥

यावद् व्योमसरोवरे विलसतो विश्वोपकारेच्छया, सनक्षत्रसितांबुजौघकलिते श्रीराजहंसाविह ।
अज्ञानप्रसरांधकारविधुरे ।वश्वप्रदीपोपमस्तावन्नंदतु पुस्तकोऽयमनिशं संवाच्यमानो बुधैः ॥ २१ ॥

८०९२ श्री शांतिनाथजी ज्ञानभंडार. खंभात.

श्रीपाक्षिकचूर्णिवृत्तिः ता. प्र. २५

मंगलं महाश्रीः ॥ पाक्षिकचूर्णिवृत्तिः ॥ ग्रंथाग्रं ३१०० ॥ एकत्रिंशत् शतानि ॥ संवत् १२९६ विशाखसुदि ३ गुरौ इहैव **बीजापुरे** श्रीनागपुरीयश्रावकैः पौषधशालायां सिद्धांतशास्त्रपूज्य- **श्रीदेवेंद्रसूरि** (राज्ये **विजयचंद्र**-उपाध्याय वृद्धगच्छगणे ?) व्याख्यानतः संसारासारतां विचिंत्य सर्वज्ञोक्तं शास्त्रं प्रमाणमिति मनसा विचिंत्य श्रीनागपुरीय**वरहुडीया**संताने सा० **आसदेव** सुत० **सानेमड** सुत सा० **राहड** सा० **जयदेव** सा० **सहदेव** तत्पुत्र सा० **षेटा** सा० **गोसल** सा० **राहडसुत जिणचंद्र घणेसर बाहड देवचंद्र** प्रभृतीनां चतुर्विध संघस्य पाठनार्थं वाचनार्थं च आत्मश्रेयोऽर्थं लिषापितं ॥

संवत् १४८९ वर्षे ज्येष्ट वदि ९....पत्र ३५४ मलधारनां वर्यः पृथुलसंचयः ॥ श्रीः ॥

अस्तीह श्रेष्ठपर्वप्रचयपरिचितः क्ष्माभृदासप्रतिष्ठः
सच्छायश्चारुवर्णः सकलसरलताऽलंकृतः शस्तवृत्तः ।
पल्लीवालाख्यवंशो जगति सुविदितस्तत्र मुक्तेव साधुः,
साधुव्रातप्रणंता **वरहुडि**रिति सत्ख्यातिमान्नेमडोऽभूत् ॥ १ ॥
तस्योच्चैस्तनया विशुद्धविनयास्तत्रादिमो **राहडो**
जज्ञेऽतः **सहदेव** इत्यभिधया लब्धप्रसिद्धिर्जने ।
उत्पन्नो **जयदेव** इत्यवहितस्वांतः सुधर्मे ततः,
तत्राद्यस्य सदा प्रिया प्रियतमा **लक्ष्मीः** तथा **नाइकिः** ॥ २ ॥
आद्याया **जिनचंद्र** इत्यनुदिनं सद्धर्मकर्मोद्यतः,
पुत्र**श्चारिणी**संज्ञया सहचरी तस्य त्वमी सूनवः ।

ज्येष्ठोऽभूत् किल **देवचंद्र** इति यो द्रव्यं व्ययित्वा निजं,
सत्तीर्थेषु शिवाय संघपतिरित्याख्यां सुधीर्लब्धवान् ॥ ३ ॥
नामंधराख्योऽथ महाधराख्योऽतो वीरधवलाभिधभीमदेवौ ।
पुत्री तथा **धाहिणि**नामिकाऽभूत्, सर्वेऽपि जैनांह्रिसरोजभृंगाः ॥ ४ ॥
श्री**देवभद्र**गणिपादसरोरुहालेभेकत्या नम**द्विजयचं**द्रमुनीश्वरस्य ।
देवेंद्रसूरिसुगुरोः पदपद्ममूले, तत्रान्तिमौ जगृहतुः यतितां शिवोत्कौ ॥५॥
नाइकेस्तु सुता जातास्तत्र ज्येष्ठो **धनेश्वरः** ।
खेत्ता नाम्नी प्रिया तस्य, **अरसिंहा**दयस्सुताः ॥ ६ ॥
द्वितीयीकः सुसाधुः श्रुतवचनसुधास्वादनातृप्तचित्तः,
श्रीमज्जैनेंद्रबिंबप्रवरजिनगृहप्रोल्लसत्पुस्तकादौ ।
सप्तक्षेत्र्यां प्रभूतव्ययितनिजधनो **लाहडा** नामतोऽ—
भूल्लक्ष्मीश्रीरित्यभिख्या सुचरितसहिता तस्य भार्या सदार्या ॥७॥
अभयकुमाराभिख्यस्तृतीयोऽजनि नंदनः ।
यो दध्रे मानसं धर्मश्रद्धासंबंधबंधुरं ॥ ८ ॥
धर्मे सहायाः **सहदेव**साधोः, **सौभाग्यदेवी**ति बभूव जाया ।
पुत्रौ च **षेढाभिधगोसलाख्यौ**, प्रभावकौ श्रीजिनशासनस्य ॥ ९ ॥
किंच यौ कृत्वा गुणसंघकेलिभवनं श्रीसंघमुच्चैस्तरां,
श्रीशत्रुंजयरैवतप्रभृतिषु प्रख्याततीर्थेषु च ।
न्यायोपार्जितमर्थसार्थनिवहं स्वीयं व्ययित्वा भृशं,
लेभा (ते शुचिराय **सं**)**घपति**रित्या ख्यांस्फुटां भूतले ॥ १० ॥
आद्यस्य जज्ञे किल **खिम्वदे**वी नाम्ना कलत्रं सुविवेकपात्रं ।
तथा सुता **जेहड—**हेमचंद्र—**कुमारपाला** भिध— **पासदेवाः** ॥११॥*

७०२४ श्री शांतिनाथजी ज्ञानभंडार. खंभात.

श्रीमहावीरचरित्रम् (त्रिषष्टियं) ता. प्र. २६

× × × × सोऽस्तु वीरः, तदनुविदितधामा गौतमस्वामिनामा ।
अपहरतु परेषामापदं वैरिशाखासफलितजनिताशा विश्वविश्वप्रकाशा ॥ १ ॥

---

* ताडपत्र प्रशस्ति नं. २४ अने २५ एकज वंशनी छे. पण नं. २४ मां पहेला सात श्लोक त्रुटक होवाथी ते श्लोको पूरा करवा माटे ता. प्र. नं. २५ ना पहेला अगीआर श्लोको ज लीधा छे तेथी अनुसंधान माटे जुओ ता. प. प्र. नं. २४ पाने १८ अने १९.

तस्यां शंबर भास्वरं कुलगृहं लक्ष्म्याः क्षमालिंगितः.... येन मुदि चयः ।
नित्यं श्रीपतिकेलिमंदिरमसौ मुक्तो न मर्यादया.... विजयते **संडेरगच्छांबुधिः** ॥२॥

पूर्वं **चालभग**च्छमंडनमणिः संडेरगच्छ मो–
पत्तेर्ह्रींगिनिका न कस्तुतेबुधः शाली नधांभोघरः ।

× × × × ×

जज्ञे **शांतिमुनिश्वरः** किल शराश्वाक्ष्यब्दे वृन्दे गते ।
यद्व्याख्या गलगर्जितैः सुरविभुर्विश्वंभरा वैभवात् ॥ ३ ॥
आचार्यवृन्देषु तदीयगच्छे, जातेष्वभूत् धर्मजनेषु........ ।
लीलावतीलोचनबाणकामं वीरं विनिर्जित्य बभूव शब्दः ॥ ४ ॥

समजनि मुनिरत्नं तस्य शिष्यावतंसः, सुरपतिललनाभिः सस्पृहं गीतकीर्तिः ।
सुकृतिभिरभिवंद्यः **श्रीयशोभद्रसूरि**र्नवजलधरधारासन्निभोक्तिरतंद्रः ॥ ५ ॥

येषामाबालकालाद्विकृतिपरिहृति वर्जितं ताम्बूलं च....
धे मेघावृष्टिः सकललिपिवाचनेऽम्बा निषेधः ।
षंडेरे पल्लिकाद्यानयनमथ नभोवर्त्मे नेत्यादिकानि,
श्रुत्वा नानाद्भूतानि त्रिजगति कृतिनो–**क्षेमर्षि**स्ताजनि चांतराले,
मराललीला इति मागधानां ।
वंशोऽस्ति क्रीडाकरराजहंसः शुभ्रैर्यशभिर्धवलीकृतात्मा ॥ ७ ॥
येनोत्तुंगविशालकंबलगिरौ स्वात्तं तपो दुर्लभ ।
[1] ....
मुमुक्षोः शिवपथि यततः साधुसार्थाधिपत्यं ॥ १६ ॥
तस्मादत्र जितेन्द्रियः शमनिधिर्विद्यावधूदर्प्पणः ॥
श्री**मानीश्वरसूरि**रित्यभिधया वाचंयमग्रामणीः ।
यो बालोऽपि धुरं बभार महतीं धौरेयवल्लीलया,
धीरः पंचमहाव्रतं प्रणयिनीं वैराग्यवीतस्पृहः ॥ १७ ॥
तत्रास्ति सुकृतिपट्टे सूरिमंडलमंडनः । **शालिसूरि**रियं नामा गुणरत्नैकरोहणः॥१८॥

इह **धर्कटवंशेऽभूद् वरदेवो**ऽभिधानतः । निश्चितं वरदेवोऽयं, पुरुषः कुलभूषणं ॥ १ ॥
भार्या **पूर्णमति**स्तस्य, पूर्णा पूर्णमतिर्मना । तत्कुक्षिसंभवाः पंच, तनुजाः पांडवा इव ॥ २ ॥
आद्यो **लक्ष्मीधराख्यो**ऽभूत्, द्वितीयो **नामुता**भिधः ॥
तृतीयः **पासडः ख्यातश्चतुर्थः कालिया**भिधः ॥ ३ ॥
पंचमो **जगदेवाख्यः** सुकृतिकृतिवत्सलः । भार्या लक्ष्मीधरस्याभूत् , **कमलश्री**रितिनामिका ॥४॥

१ सातथी सोळ लगीना नव श्लोक मळता नथी.

तत्कुक्षिमानसे राजहंसो राजाक इत्यभूत् । राजाकस्य मता भार्याऽभयश्रीरिति संज्ञया ॥५॥
तस्याः सुतद्वयं जज्ञे, प्रथमोऽभयपालकः । द्वितीयो हरिचंद्राख्यश्चंद्रवचारुकान्तिमान् ॥६॥
पासडस्य हि भार्याऽभूत्, जयश्रीरिति नामतः । तया सुतद्वयं जातं, पुत्रिकाद्वितयं तथा ॥७॥
यथार्थितस्वनाभाऽभूत्, कुलंधरो धुरि कृती । द्वितीयो देवसिंहाह्वो, देवादिर्गुरुभक्तिभाग् ॥८॥
पुत्रिका मोहिणिख्याता, सदा धर्मपरायणा । द्वितीया सोहिणिर्जाता, गुरुस्वजनवत्सलः ॥ ९ ॥
कुलधरस्य भार्याऽऽसीत्, देवश्रीरिति नामतः । रूपलावण्यसंयुक्तो नरसिंहः सुतोऽभवत् ॥ १० ॥
नरसिंहस्य भार्यास्ति, नाम्ना लाच्छीति विश्रुता । कलत्रं देवसिंहस्य, देवमतिरिति श्रुता ॥११॥
तस्याः सुतद्वयं जातं, पुत्रिकात्रितयं तथा । आद्यो नयणसिंहाख्यः, परः पृथिमसिंहकः ॥१२॥
पुत्रिका मयणू नाम्नी, द्वितीया भीमिणिस्तथा । तृतीया आल्हका जाता, स्वाजन्यगुणवत्सला॥१३॥
कलत्रं कालीयाकस्य धनश्रीरिव देहिनी । तस्याः कुक्षिसमुद्भूतौ, पुत्रौ धीणा धरणिगौ॥ १४ ॥
मेइणीति तथा पुत्री हांसिका झंझुके परे । जगदेवस्य जायाऽस्ति, नगश्रीरिति संज्ञया ॥१५॥
तस्याः कुक्षेस्तु संजातास्तनुजास्त्रय इहोत्तमाः । आद्यः क्षेमसिंहस्तु, पांगुरवश्च वयंजलः ॥१६॥
पुत्रिकात्रितयं जज्ञे, छाडि केलु च लीलुका । भार्याऽस्ति क्षेमसिंहस्य, रूपिणीति सुविश्रुता ॥१७॥
जातं तत्पुत्रचतुष्कं, लक्षणं हरदेवकः । तृतीयोऽरपतिर्नाम, चतुर्थो वेलुकाभिधः ॥ १८ ॥

× × × ×

खुडा भार्याच चाहुलु तत्पुत्रः पद्मनामकः ॥ १९ ॥
इत्थं कुटुम्बेन समं विचिन्त्य, संसारसर्वस्वमनित्यमेव ।
स्वकीयमातुः परिपुण्यहेतुः, श्रीवीरवृत्तं परिलेखयित्वा ॥
पुस्तकं वाचयामास, देवसिंहो महामतिः ।
नंदताद् यावच्चंद्रार्कं, संघेन सह सर्वथा शुभं भवतु ॥

७८७३. श्री आ. क. ज्ञानभंडार. लींबडी.

श्रीज्ञाताधर्मसूत्रवृत्तिः ता. प्र. २७

अनुत्तरो पपाकाख्यातं नवमांगप्रदेश विवरणं समाप्तं ॥
संवत् ११८४ माघ सु ११ रवौ अद्येह श्रीमदणहिलपाटके महाराजाधिराजश्री–
जयसिंघदेवकल्याणविजयराज्ये ज्ञाताधर्मकथाअंगवृत्तिर्लिखितेति ॥
शिवमस्तु सर्व्वजगतः परहितनिरता भवंतु भूतगणाः ।
दोषाः प्रयांतु नाशं सर्व्वत्र सुखीभवतु लोकः ॥ १ ॥

ज्ञाताधर्मकथांगचतुष्टयवृत्तिः ॥

श्रे० देशल पुत्र यशहड सूलण रामदेवस्य, ॥ पुस्तकमिदं ॥*

प्राज्यच्छायो जन्मभूमिर्गुणानां दिक्पर्यन्तव्यापिशाखाकलापः ।
पत्रोपेतः पर्व्वभिर्व्वर्द्धमानः प्राग्वाटानामस्ति विस्तारिवंशः ॥ १ ॥

तत्र प्रजज्ञे हृदयालयेषु, कृतस्थितिः पुण्यवतो जनस्य ।
वृत्तोज्ज्वलः कांतिकलापपात्रं........श्रावक सर्व्वदेवः ॥ २ ॥

अवदाता प्रभेवास्य तमः प्रसरवारिणी । महिमेति सुविख्याता, बभूव सहचारिणी ॥ ३ ॥
ताभ्यां पुरस्कृतनयस्तनयोऽजनिष्ट, निष्ठापरः परमसंयमिनां वरिष्ठः ।
राजन्यमान्यमहिमा हिमपूरगौरैः । ख्यातो गुणैर्जगति झंझुलनामधेयः ॥ ४ ॥

जाताऽस्य प्रेयसी मान्या, सीमाऽन्या रूपसंपदः, पूर्णदेवीति सौभाग्यमसौभाग्यं च बिभ्रती ॥५॥
जातमपत्यचतुष्टयमाभ्यामभ्यस्तशास्तजिनधर्म्मे । भुवनगुरुबिंबपूजनकृतादरं मंदिरं नीतेः ॥ ६ ॥
प्रथमो देहडनामा, देशलनामा सुतोऽपरस्तत्र । मोहिणि–पुन्मिणिसंज्ञे पुत्र्यौ पात्रं विनयलक्ष्म्याः॥७॥
एषां मध्ये सहृदयहृदयो धार्मिकः श्रावकाणां मुख्यः श्रीमान्मथितकुमतो वर्त्तते देशलाख्यः ।
यस्याजस्रं श्रवणपुटकैः सयशःक्षीरपूरं पायं पायं कथमपि जना नैव तृप्तिं भजंति ॥ ८ ॥

किंच—

गांभीर्येण पयोनिधिर्धिषणया वृंदारकाणां गुरोस्तुंगत्वेन सुपर्व्वपर्व्वतपतेः सौम्येन शीतत्विषः ।
सौंदर्येण मनोभवस्य विभवित्वेतोत्तराशापतेर्योऽत्यंतं प्रतिपंथ्यपि त्रिजगतीमित्रं परं कीर्त्यते ॥ ९ ॥

अन्यच्च—

न्यायार्जितेन विभवेन भवांतहेतोः, स्वीयालयोचितमनूननयेन येन ।
त्रिलोक्यकैरवविकासशशांकबिंबं विधापितंपश्चिमतीर्थभर्त्तुः ॥ १० ॥
शीलालंकारवती स्थिरदेवी वल्लभाऽभवच्चास्य ।
रेमे यदीयमनसा मनागपि न तीर्थिकवचस्सु ॥ ११ ॥
अनयोः संजातास्ते तनूरुहा बाहडादयः सदयाः ।
मारोहतिमारोहति विलोक्य कायश्रियं येषां ॥ १२ ॥

अन्यदा देशलः श्रुत्वा, तदाविधगुरोर्गिरः । प्रवृत्तश्चेतसा सार्द्धं, समालोचयितुं चिरं ।। १३ ॥

तथाहि—

अहो भ्रात श्चेतो गुणगणनिधे ! किं नु भणसि, क्षणं वार्तामेकां शृणु ननु मदीयामवहितं ।
भवांभोधेर्मध्ये महति पततां हंत भविनां, विना जैनं धर्म्मं किमपि शरणं नास्ति नियतं ॥ १४ ॥

* श्रीवर्द्धमानसूरीयश्रीचक्रेश्वरसूरीणां श्रीपरमाणंदसूरीणां

दानादिभेदैः स पुनस्त्रिभेदः, प्ररूपितो यद्यपि पूज्यपादैः ।
ज्ञातव्यहातव्यविवेकहेतुस्तथापि विज्ञानममीषु मुख्यं ॥ १५ ॥

मतिज्ञानादिभिर्भेदैः, तच्च प्रावाचि पंचधा । स्वान्यावभासकत्वेन, श्रुतज्ञानपरंपरं ॥ १६ ॥

हे चित्त ! किंचित् तदमुत्र भक्तिं, विधातुमिच्छामि धनव्ययेन ।
मनस्ततः प्राह विधेहि शीघ्रं, धर्म्मे न यस्मादुचितो विलंबः ॥ १७ ॥

इदं हि विद्युद्वरिणीकटाक्षसहोदरं द्रव्यमुदाहरंति ।
अनेन चेन्निश्चलपुण्यराशिर्विढप्यते चारु वणिज्यमेतत् ॥ १८ ॥

इत्थं निजेन मनसा मुनिनायकैश्च, चक्रेश्वरेत्यभिधया प्रथितैः पृथिव्यां ।
प्रोत्साहितः सपदि देशलनामधेयो, ग्रंथानऽलीलिखदमूंश्चतुरः सटीकान् ॥ १९ ॥

धरति धरणीं शेषो यावत् निजे फणमंडपे, कनकशिखरी देवैर्यावत्सनंदथु सेव्यते
गगनपथिकः सूर्यो यावत् प्रकाशयते दिशो, भ्रमभरमसौ तावत् पुंसामपास्यति पुस्तकः ॥ २० ॥

प्रशस्तिः समाप्ता ॥ मंगलं महाश्रीः ॥ ज्ञाताधर्मकथांगचतुष्टयसूत्रवृत्तिपुस्तकं श्रीयशोदेवसूरीणां श्रीमभसूरीणां श्रे. देशल पुत्र यशहड सूलण रामदेव आल्हण श्रावकाणां ॥मंगलं महाश्रीः॥

७०२२ श्री. शां. ज्ञा. भं. खंभात.

श्रीभुवनसुंदरीकथा. ता. प्र. २८

श्रीमद्गूर्जरवंशप्रभवः संभवदनेकगुणविभवः ।
साधुहरिचंद्रसूनुः पुण्यश्रीकुक्षिसंभूतः ॥ १ ॥

दुःस्थार्थिसंतापहरः प्रसिद्धः स्वच्छाशयश्चारुगुणाचितश्च ।
मुक्तोपमानो वसुमान् सुवृत्तः, समस्ति साधुर्नयपालनामा ॥ २ ॥

तस्यास्ति जाया रयणाभिधाना, दानादिसद्धर्मरता प्रधाना ।
पुत्रास्त्वमी प्रौढविवेकचर्याः, ख्यातास्त्रयो निर्मितसंघकार्याः ॥ ३ ॥

आद्यो वदान्यः कृतिलोकमान्यः, प्राज्ञः सुधन्योऽजनि कीर्तिसिंहः ।
दानोद्यतोऽन्यस्त्विह देवसिंहः, साल्हाभिधः साधुवरस्तृतीयः ॥ ४ ॥

साधुनयपालपत्नी रयणादेवी विवेकधर्मज्ञा । पुस्तकमेनं श्रीभुवनसुंदरीसत्कथासत्कं ॥ ५ ॥

आत्मश्रेयोऽर्थमथ व्याख्यापयितुं जनोपकाराय ।
जगृहे मूल्येन मुदा बाणरसशिखींदु (१३६५) मित वर्षे ॥ ६ ॥

पुष्पदंताविमौ यावद् वर्तेते गगनांगणे । बुधैर्व्याख्यायमानोऽयं तावन्नंदतु पुस्तकः ॥ ७ ॥

भुवनसुन्दरीकथा पुस्तकं । शा. नयपाल भार्या रयणादेव्याः सत्कं ॥

७०२५ श्री शातिनाथजी ज्ञान भंडार. खंभात.

खीवडेन लिखिता पुस्तकं ।

श्री. व्यवहारचूर्णिः ता. प्र. २९

ओकेशवंशप्रभवः प्रसिद्धः चाचाकपुत्रो नरसिंहसाधुः ।
मोरीस्तनुजास्तनयास्तदीयाः, सतैव कलृप्तोऽज्वलधर्मकृत्याः ॥१॥
तत्राद्यः सांगण १ इति द्रीताक २ त्रिभुवनश्च ३ लीखाकः ४ ।
रावण ५ देदाका ६ वथ धानाक ७ इति क्रमेणामी ॥ २ ॥
व्यवहारचूर्णिमलीलिखन् निजसुतस्य सोमस्य। देवश्रीतनुजस्य श्रेयोऽर्थं साधु देदाकः ॥३॥
जयति जिनशासनमिदं निर्वृतिपुरमार्गशासनंयावत् ।
मुनिभिरिह वाच्यमानस्तावदसौ पुस्तको नन्द्यात् ॥ ४ ॥

८०९३ श्रीशांतिनाथजी ज्ञानभंडार. खंभात.

श्रीउपदेशमालाविवरणम्. ता. प्र. ३०

सिद्धर्षिकृतं, ठक्कुर जेत्रसिंहस्य.......पूर्ण्यसिंहेन निपुणेनार्पिता संवत् १२९१ वर्षे अषाढ सुदि १३ शनौ उपदेशमालायाः पुस्तकं लिखितमिति ॥

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्री अनुयोगद्वार वृत्तिः ता. प्र. ३१

संवत् १३०१ वर्षे आषाढसुदि १२ शुक्रे अद्येह श्रीधवलकनगरे वास्तव्य प्राग्वाटवंशोद्भवेन व्य० वासदेवसुत गांधिक श्रे० धाणाकेन बृहत् लाभासिद्धा श्रेयोऽर्थं ससूत्रा मलधारी श्री हेमचंद्रसूरि विरचिता अनुयोगद्वारवृत्तिर्लेखयांचक्रे ॥

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्री नंदीसूत्र वृत्तिः ता. प्र. ३२

संवत १२९२वर्षे वैशाख सुदि त्रयोदशे अद्येह वीजापुरे श्रावकपौषधशालायां श्री देवभद्रगणि पं. मलयकीर्ति पं. अजितप्रभगणिप्रभृतीनां व्याख्यानतः संसारासारतां विचिन्त्य सर्वज्ञकृतं शास्त्रं प्रमाणमिति मनसि ज्ञात्वा सा० धनपाल सुत सा० रत्नपाल ठ० गजसुत ठ० विजयपाल श्रे० देल्हासुत श्रे० बिल्हण महं० जिणदेव महं० वीकलसुत ठ० आसपाल श्रे० सोलटा ठ० सहजासुत ठ० अरसीह सा० राहडसुत सा० माहड प्रभृति-समस्तश्रावकैः समस्तचतुर्विध-संघस्य पठनार्थं वाचनार्थं च समर्पणाय लिखापितं ॥

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्री षट् कर्मग्रंथः ता. प्र. ३३

ओकेशवंशभूषणपदमसुत सा० **बीजड** भार्या **विकमदे** तत्सुता श्री **सारज** नाम्नी सा० **आमसिंह**सुत सा० **धर्मसिंह** भार्या **सदा** नानाविधपुण्यकृत्यपरायणा श्रीमत्तपागच्छमंडन सुविहित चक्रचूडामणि भट्टारक श्री **देवसुंदर**सूरीणामुपदेशेन स्वश्रेयसे नव्यकर्मग्रंथवृत्तिपुस्तकं श्री विक्रम नृप संवत् १४४७ वर्षे लेखयामास, आचंद्रार्कं पुस्तकोऽसौ बुधैर्वाच्यमानो नंदतात् ॥

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्री उपदेशमाला वृत्तिः ता. प्र. ३४

श्रीमन्नर्बुदतुंगशैलशिखरच्छायाप्रतिष्ठापदे, **धर्माणा**भिधसन्निवेशविषये (न्य)ग्रोधवृक्षौ बभौ।
यत्शाखा शतसंख्य(मध्य) बहलच्छायास्वपायाहतं, सौख्येनोषितसंघमुख्यशकटश्रेणीशतीपंचकं ॥१॥

लग्ने क्वापि समस्तकार्यजनके सतग्रहालोकने।
ज्ञात्वा ज्ञानवशाद् गुरुः पृथु हितं श्री**सर्वदेवा**भिधः।
आचार्यान् रचयांचकार चतुरस्तस्मात् प्रवृद्धो बभौ।
चंद्रोऽयं वरगच्छनामरुचिरो जीयात् युगानां शतं ॥ २ ॥

तत्र लोकादश (तत्त्वालोकन) सूरिराजविपुते (ले) गच्छे प्रतिष्ठाधिकः,
पूर्व श्री**जिनचंद्र**सूरिरभवत् श्रीमंधरद्योतकः।
शुद्धात्मा **धवलक्कके** पुरवरे **यो**(षो)**ढाकचैत्यांतरे,**
श्रीसंघप्रभवप्रभावविपुले .... तेन द्योतिनी(न्तेवासिवृन्दैर्वृतः) ॥ ३ ॥

तस्मिन् पट्टमहोदधौ नयविधुः श्री **आम्रदेवा**भिधो यद्वाख्यानमदोषशास्त्ररचनं चंचन्मतिर्ज्योतिमान् यद् व्याख्यान रसायनामृतमहालोभादिहोदेवता **कौश्मांडिः** सं(समु)पागमत् प्रमुदिता जीयात् स सूरिप्रभुः ॥४॥ तस्य .... आदि सूरिरभवत् श्री**नेमिचंद्रा**भिधो, धर्मा (धार) जिनद्वयी सुचरितप्रख्यातकीर्तिस्ततः। तार्तीयो मुनिपुङ्गवस्समजनि श्रीमान् **यशोदेवयुक्** सूरिः सच्चरित-प्रसिद्धमहिमा संशुद्धधार्यो शशिपियूषो सुरमुख्य शान्ता हसतः सान्द्रे मम स्थानके सम्यग् लक्षण .... ग साहित्य गच्छच्छपि।

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्री आख्यानमणिकोश सवृत्तिः ता. प्र. ३५

इति **श्रीमदाम्रदेवसूरि**विरचित वृत्ताख्यानकमणिकोशवृत्तिः समाप्तमिति ॥ मंगलं महाश्रीः ॥ शिवमस्तु सर्वजगतः, परहितनिरता भवंतु भूतगणाः। दोषाः प्रयांतु नाशं. सर्वत्र सुखी भवतु लोकः ॥

प्राग्वाटवंशतिलकोऽजनि **पूर्णदेव**स्तस्यात्मजास्त्रय इह प्रथिता बभूवुः ।
दुर्वारमारकरिकुंभविभेदसिंहस्तत्रादिमः **सलषणो**ऽभिधया बभूव ॥ १ ॥

द्वितीयकोऽभूद् **वरदेव**नामा तृतीयकोऽभूज्जिनदेवसंज्ञः ।
सोऽन्येद्युरादत्त जिनेंद्रदीक्षां निर्वाणसौख्याय मनीषिमुख्यः ॥ २ ॥

अज्ञानध्वांत सूर्यः सरभसविलसत्वंग संवेगरंग ।
क्षोणी क्रोधादियोधप्रतिहतिसुभटो ज्ञातनिःशेषशास्त्रः ।
निर्वेदांभोधिमग्नो भविककुवलयो धोधना (?) **धानचंद्रः**
कालेनाचार्यवर्ये समजनि **जगच्चंद्र** इत्याख्यया हि ॥ ३ ॥

वरदेवस्य संजज्ञे **वाल्हा**विरिति गेहिनी। याऽभूत् सदा जिनेंद्रांह्रिकमलासेवनेऽलिनी।४।

पुत्रास्तस्या **साढल**नामधेय (रेसिंह) इत्याह्वयः **वज्रसिंहाः ।**
विवेकपात्री **सहजू** च पुत्री कुशीलसंसर्गतरोर्लवित्री ॥ ५ ॥

साढलस्य प्रिया जज्ञे **राणू**रिति महासती ।
पुत्रास्तु पंच तत्राद्यो **धीणाख्यः** शुद्धधर्मधीः ॥ ६ ॥

द्वितीयः **क्षेमसिंहाख्यो** **भीमसिंह**स्तृतीयकः ।
देवसिंहाभिधस्तुये लघुर्**महणसिंहकः** ॥ ७ ॥

क्षेमसिंहाभिधो **देवसिंह**श्च भवभीरुकः । श्री**जगच्चंद्रसूरीणां** पार्श्वे व्रतमशिश्रियत् ॥ ८ ॥
धीणाकस्य कडूर्नाम पत्नी **मोढाभिधः** सुतः । अन्येद्युः सुगुरोर्वाक्यं **धीणाकः** श्रुतवानिति ॥९॥

भोगास्तुंगतरंगभंगभिदुराः संध्याभ्ररागभ्रमौ
पम्या श्री नलिनीनलस्थितपयोलोलं खलु प्राणितं ।
तारुण्यंतरुणी कटाक्षतरलं प्रेमातडिस्त्यं निलो
ज्ञात्वैवंक्षणिकं समं विदधतां धर्मे जनाः ! सुस्थिरम् ॥ १० ॥

सद्ज्ञानयुक्तो नियम ब्रृषोधि भावन्महानंदपदप्रदायी ।
तत्रापि च स्वान्यविबोधकारी त्यागः श्रुतज्ञानमिहोत्तमं हि ॥ ११ ॥

तच्चकालमतिमांद्यदोषतः पुस्तकेषु भुवनैकशालैः ।
पूर्वसूरिभिरथो निवेशितं तद्वरं भवति तस्य लेखनं ॥ १२ ॥

एवं निशम्य तेन न्यायोपार्जितधनेन व्ययेन।
आख्यानकमणिकोशस्य पुस्तकाय व्यधायि मुदा ॥ १३ ॥

यावत् .... वाच्यमाना बुधैः ॥ १४ ॥

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीकालिकाचार्यकथा:– ता. प्र. ३६

॥९०॥ **श्रीमालवंशो**ऽस्तिविशालकीर्तिः **शांतिसूरिः** प्रतिबोधित **डीडका**ख्यः ।
श्रीविक्रमाब्देद नभमाहर्षिवत्सरैः श्रीआदिचैत्यकारापित नवहरे च (?) ॥ १ ॥
तस्य शाखा समुदभूत् **देवसिंहो** गुणाधिकः ।
तत्सुतः **कर्म्मसिंहस्य** अभूत् पुत्रो **मलसिंहकः** ॥ २ ॥
महीरोलनगोत्रे च मंडनो **धांधका**भिधां
तत्सुतात्रयं संजातं **कुद उलदाक** नामतः ॥ ३ ॥
हालाक भगिनी यस्य चतुष्टयी ।
शीलालंकारधारी च **आभूमनी** च **मइणला** ॥ ४ ॥
षट्दर्शनभक्ता उलश्रीरिवाहरि मंडनो । अर्धांगलक्ष्मीः साह्व **मलसिंहस्य** पुण्यभुक् ॥ ५ ॥
पंचपुत्रा पवित्रा च पंचपुत्री सतीव्रता । कल्पवृक्षसमानेऽपि संघशासनसेवकान् ॥ ६ ॥
धारा रामा कलाषाको जइतसिंहक भीमकौ । उदी पूनी च चांदु च रुक्मिणी सोनणी तथा ॥७॥
धाराक पत्नी च सुव्रता **जय**श्री तदांगजा वेदमि वा चतुष्टयं ।
सधर्म्मणो **पांपण मदन**कौ च, रत्नस्य रत्नाकरतुल्यरूप **धनसिंह वीर**स्वजनप्रियश्च ॥ ८ ॥
रामा पुत्र **सुखेताक पद्मोः लाषाक** नंदनाः । **जइतसिंह** सुतो **हाल्हू भीमा**पुत्रीसलक्षणी ॥ ९ ॥
स्वश्रेयसे कारितकल्प पुस्तिका .... पुण्योदय रत्नभूमि श्रीपल्लिगच्छे स्वगुणौकधाम्ना ॥
वाचिता श्रीमद् **चक्रेश्वरसूरिभिः** ॥ १० ॥ छ ॥ छ ॥

नृप विक्रम कालातीत सं. १३६५ वर्षे भाद्रपद वदौ नवम्यां तिथौ **श्री मेदपाटमंडले वऊणा** ग्रामे कल्प पुस्तिका लिखिता ॥ .... मंगलं महाश्रीः ॥ शुभं भवतु ॥

संवत् १३७८ वर्षे भाद्रपद सुदि ४ श्रावक **मोल्हासुतेन** भार्या **उदयसिरि** समन्वितेन पुत्र **सोमा लाषा षेता** सहितेन श्रावक **उदाकेन** श्रीकल्पपुस्तिकां गृहीत्वा श्री **अभयदेवसूरिणां** समर्पिता वाचिताय.

श्री. शां. ज्ञा. भं. खंभात.

श्रीत्रिषष्टिः (पर्व २–३) ता प्र. ३७

संवत् १२९५ वर्षे अश्विन वदि २ रवौ अद्येह **श्रीवीजापुरपत्तने** समस्त राजावली पूर्वकं **तपाकीयश्रीपौषधशालायां** चरित्रगुणनिधानसमस्तसिद्धांत कालान्मानेन पारगेतलपा **देवभद्र**

गणिमलयकीर्ति पं० फुलचंद्र पं० देवकुमारमुनि नेमिकुमारमुनिप्रभृतिसमस्तसाधूनां तच्चरण-कमलानांभक्त परमश्रावक साधु रतनपाल समस्त सिद्धांत पुस्तकानां पौषधशालाभारनिर्वाहक परमश्रावक श्रेष्ठि वील्हण द्वितीयभारनिर्वाहक सधर्म्मिकानां वात्सल्यतत्परे परमश्रावक ठ० आसपाल तृतीयभारनिर्वाहक निरंतरं पुस्तकसिद्धांतनिर्विकल्पभक्त्यासारतत्पर परम श्रावक साधु० लाहड प्रभृतीन् समस्त श्रावकैः त्रिषष्टि पुस्तकं समस्त साधूनां श्रावकाणां पठनवाचन-पुन्य श्रेयोर्थे लिखापितं ॥ छ ॥ लेखक पाठकानां शुभं भवतु ॥ मंगलं महाश्रीः ॥ शिवमस्तु॥छ॥

श्री शांतिनाथजी ज्ञानभंडार. खंभात.

श्री शांतिनाथ चरित्रम्. ता. प्र. ३८

संवत् १३३० वर्षे आषाढ शुदि १५ शनौ ॥ ॐ० ॥ नमः सर्वज्ञाय ॥

स श्रीशांतिः श्रियेवो(यो)ऽस्तु॥याऽपूर्वो मृगलांछनः।।अविनाशि रुचिच्छायः । सदाद्योतः प्रकाशकः ॥

सश्रीकं जिन माहवनू (वियन्) लवणिमालीला गृहं रत्न (सू:) ।
स्तरो रुः (चन्द्रः) पूर्णकलामवाप्य मुदितस्तन्वन्नदीनां स्थितिं ॥

शश्व(श्व)द्गोत्र पतिष्ठा रुचिरसनिलयः साधुवृत्तः समग्जः (स) ।
सत्वाधारः समुद्रोपम इह जयति प्राग्वटनामान्वयः (टीयान्वयोऽयम्)॥ १ ॥

तदन्वये भूद्गधनदानुकारी सन्मार्गशाखीव परोपकारी ।
धनेश्वरो धर्म्म धुरीणदेहस्तस्यांगजोऽभूद्धनदाक नामा ॥ २ ॥

काशाहृदे वरनगरे धनदाकेनादिनाथजिनभुवने । मूलप्रतिमाभिनवास्थाप्यत शुद्धेन चि(वि)त्तेन ॥४॥

श्रेष्ठिनो धनदाकस्य ब्रह्मदेवः सुतः शुभः । वाग्भटश्च सुता चैकालक्ष्मणिः शीलशालिनी ॥ ५ ॥

पुत्रो गोगाक नामाभूद् बाहडस्य गुणश्रियः । गोगाक सूमला पत्नी तयोः पुत्रत्रयं क्रमात् ॥ ६ ॥

ऊधिगधांधूआकडमुख्या साल्हु तथा परा दुहिता । सौभाग्यश्रीदेवीदाख्यां पत्न्यौ शुभाकारे ॥७॥

भार्याऽभूद् ब्रह्मदेवस्य मंदोदरी शुभाशया । तयोः पुत्राश्चतुः संख्या धर्म्मकर्म्मणि कर्म्मठाः ॥८॥

आल्हाकः सकलः कलंकरहितः स्वस्थासच्छाशयो धर्म्मधीः ।
साल्हाको महिमानिधान मतुलो वाक्येन सन्नंदकः ॥

राल्हाको गुरुपादपद्मभसलः सर्वज्ञपूजारतः ।
साल्हाकः सबलः सलीलगमनः सत्यव्रतालंकृतः ॥ ९ ॥

राल्हाक कुमारदेव्योः पुत्रत्रितयं तु ब्रह्मणागाद्य : ।
काल्हूक रत्नसिंहौ ब्रह्मी सोहग सुते द्वे च ॥ १० ॥

आल्हाकोर्जितवित्तादाभरणं श्रीयुगादिदेवस्य । आरत्रिकं च मंगलदीपयुतं कारयामास ॥ ११ ॥

आल्हाकरत्नदेव्यो रत्नत्रयधारकास्त्रयः पुत्राः ।
गुणधरयशधरमुख्या श्राहणिसमधर सुतानैका ॥ १२ ॥

समधर भार्या **कर्म्मणि** पुत्राः सप्त क्रमेण कोलाथुः ।
आसा सपाल सेढा पूना हरिचंद्र वयराख्याः ॥ १३ ॥

गुणधरभार्या स्वच्छा शीलतपोदानभावधर्म्मरता ।
राजमति रंग जातास्तेयोर्जेना मंदकाः शस्याः ॥ १४ ॥

पार्श्वभटो वीराकः अंबा लीबाक सोमदेवाश्च ।
शील्ह हीर लड्डुहिते जिनधर्म्मे सदोद्यते इयंतंएते ॥ १५ ॥

पासडभार्या साजिणि पुत्रौ द्वौ **विजयसिंह नयणाकौ ।**
वीरा पत्नी **राज**श्री सूनुत्रितये तु **जगपालः** ॥ १६ ॥

हरपाल देवपालौ आंबाभार्या च ललतुंप्का श्रेष्ठी ।
नरपालः सुतश्चैको **लीबा कल्याण पमाख्या** ॥ १७ ॥

विजयश्रीयशधरयोर्नरसिंहस्तद्दु(सूनु)रतिथिजनभक्तः ।
पाती दुहिता चैकाकुटुम्बमेतच्च सुविशालं ॥ १८ ॥

श्रीभुवनरत्नपूज्याः पारींद्रा वादिकुंजरेण । कांतरानिवृत्तिका गच्छधराः शुभाचाराः ॥ १९ ॥

आनंदप्रभसूरींद्रा स्तत्पदांभोजभानवः । सिद्धांतजलधिपारं प्रापुः प्रज्ञाप्रकर्षेण ॥ २० ॥

तत्पट्टे विशुद्धे श्रीमंतो वीर**देवसूरींदाः** । तत्पट्टे सच्चरिताः धीमंतः **कनकदेवा**ख्याः ॥ २१ ॥

ससुतो गुणधरः श्राद्धः पार्श्वे श्री**कनकदेवसूरीणां ।**
धर्म्मोपदेशमतुलं शुश्रावैत्थमघापहं (त्थं त्व.धापहं जातु) ॥ २२ ॥

गुणानां सर्व्वेषां जगति जयनी संपदनिशं
ययादाषोः सर्वे जगति गुणतां यांति गृहिणां ।
नवेद्राव्याद्रस्या जलधिजलकल्लोल चपला परेषांसा
केषां सननिकरे धर्म्मे कार्ये (स्थास्यति चिरं) ॥ २३ ॥

जिनबिंब भुवन पुस्तकतुर्य विधिसंघ सप्तक्षेत्रेषु ॥
यो वपति वित्तबीजं लभते हि परत्र स बहुफलं ॥ २४ ॥

मुनि क्षेत्रांतर्विशेष पुण्याय विशेष पुण्याय पुस्तक क्षेत्रं,
पुस्तक(म) पित्वयत्प्रभावाद्भवंति धर्म्मोपदेष्टारः ॥ २५ ॥

कलिकालकालाविलसिततमसापिहितेन धर्म्मवररत्ने
श्रत लिषित पुस्तकमये दीपे तत्प्रकटनं भविनां ॥ २६ ॥

केवलज्ञानपरिस्पर्धि श्रुतज्ञानमुदीरतं ॥
अतस्तल्लेखने पुण्यमगण्यं गदितं जिनैः ॥ २७ ॥
इत्थं श्रुत्वा पुत्रसहायातोऽसौ श्रेष्ठी न्यायोपात्तवित्तेन इदं शांते वृत्तं लेखायामास शुद्धं पित्रोः ॥

श्री शांतिनाथजी ज्ञानभंडार. खंभात.

श्री उत्तराध्ययन सूत्र लघुवृत्तिः ता. प्र. ३९

॥ छ ॥ र्षं० ॥ स श्रीवीरजिनो जीयाद्यस्य पादनखांशवः ।
विकाशे भव्यराजीवराजेस्तरुणभानवः ॥ १ ॥
श्रुत्वा वटावातिमुख्यमुच्चै र्हिंसा फलंतत्र दयाप्रधानाः ।
धर्म्म्येषु कृत्येषु जना यतंते पुरं तदत्रास्ति दयावटाख्यं ॥ २ ॥
तत्राभवत् **कुमारसिंह** इति प्रसिद्धः श्रेष्ठी जिनेशपदपंकजबद्धरागः ॥
सम्यक् त्रिवर्गनिरतोऽपि शुद्धः धर्म्मे कामाः । **प्राग्वाट** वंशे तिलकः सदनं गुणानां ॥ ३ ॥
नाम्ना **कुमरदेवी**ति तस्य जज्ञे सधर्म्मिणी, शीलादिभि र्गुणैः शुद्धैः सुलसामनुकारिणी ॥ ४ ॥
तयोस्तनूजा क्रमशो बभूवुः पंचात्रपंचाचरणेन वित्ताः
तत्रापि धुर्यो नय मार्गनिष्ठो **देदाक** नामा सुगुणैर्गरिष्ठः ॥ ५ ॥
द्वितीयः किलस्मांस्**भाक**स्तृतीयः **सांगणा**भिधः ॥ **धनपाल**श्चतुर्थस्तु पंचमो**ऽभया**ऽभिधः ॥ ६ ॥
आद्यस्य शीलपात्रं, **विशलदेवी** बभूव सुकलत्रं, देवगुरु................द्वितीयस्य ॥ ७ ॥
श्रृंगारदेव्यभिधया शुचिशीला **सांगण**स्य जायाभूत् ।
धनपालस्य तु दयिता **सलषण**देवीति सुयथार्थाः ॥ ८ ॥
आल्हणदेवी संज्ञा जज्ञे जाया पुनः कनिष्टस्य च ।
देदाकस्य तनुभुवो**ऽजयसिंह**प्रभृतयोऽभूवन् ॥ ९ ॥
धर्म्मकर्म्मरते नित्यं गुरुलज्जाविभूषणे ।
देदादीनां स्वसारौ..................... ॥ १० ॥
क्षीप्रपद्यजनकेसुरालयप्राप्तो**देदाक**ः सकुटम्बः श्रुश्रावैवं सुगुरुवाक्यं ॥ ११ ॥
मनुष्यत्वादि दुष्प्रापां लब्धेऽमी द्वादशांगिको ॥
धर्म्म एव विधातव्य इहामुत्र सुखार्थिना ॥ १२ ॥
यद्यपि स चतूरूपः प्ररूपितस्तीर्थनायकैर्भविनां ॥
गृहिणस्तथापि सुकरो विशषतो दानधर्म्मोऽत्र ॥ १३ ॥

सोऽपीह ज्ञानाभयधर्म्मोपष्टंभदानतस्त्रिविधः ।
तत्राद्यमेव दानं विशेषतः परमपदहेतुः ॥ १४ ॥

सूत्रार्थदानसाहाय्यकरणपुस्तक लिखापनाद्यैस्तैः ।
बहुधा तथापि पुस्तक........सफली क्रियते सदा ॥

आशाधर स्तदाद्यः संघपतिः सप्ततीर्थसुप्रथितः
निर्मलकीर्तिर्**देसल**संज्ञस्तस्यानुजन्मा च ॥ १५ ॥

लावण्य (पात्रं)....किल **लूणसिंह**स्तयोर्लघुः पापगजैकसिंहः ॥
न्यायार्जितैर्यस्य धनैः सदैव साधुत्वभावं हि व्रतं विनैव ॥ १६ ॥

रत्नश्रीः सद्भार्या तेषामाद्यस्य श्रीरिवा (भवत्)........
....................**भोली लाछी लावण्यसिंह**स्य ॥ १७ ॥

रत्नश्रीकुक्षिजाः पुत्राश्चतस्त्रश्चतुराशयाः
माणिक प्रथमा तासां शोभितोभयपक्षका ॥ १८ ॥

ततः **सोहग**संज्ञा च, गुणभूषिता ॥
तृतीय तुर्ये दुहिते कस्मरी **माउका**भिधे ॥ १९ ॥

सहजपाल इति प्रथमः सूतः सहजसद्गुणतः सुमनोरतः ॥
भुवन पेसलदेसल सं.... .... कृतदुःकृतलानवः ॥ २० ॥

द्वितीयः **साहणा**भिख्यः ख्यातः स्वगुणसंपदा ।
जिनांह्रिकमले भृंगस्तृतीयः **समराभिधः** ॥ २१ ॥

जजुतासुसखीयस्यः साजण कुसूनुरुहा ।
रंभाभिधा तदन्या च **देसलस्य** शुभात्मनः ॥ २२ ॥

सहजलदेवी जाया मायामुक्तस्य **सहजपालस्य** ।
राजमत्तिः सत्कांता साहण साधो स्तुसहु

....................वण्ये सिंहस्य सामंतः समतायुतः ।
तल्लघुः **सांगण**श्चापि कुलधूर्धवलः किल ॥ २३ ॥

पुण्यपानीयसंपर्काद् वृद्धिं याति कुलद्रुमे ॥
आशाधरो विशुद्धात्मा चिंतयामास चेतसि ॥ २४ ॥

श्रुताधीनं कलौ धर्म्मं नचैतत्पुस्तकं विना । पुस्तकानि तु लिख्यंते लेखकै र्लब्धवेतनैः ॥ २५ ॥

विचिंत्येति स्वचित्तेन पित्रोः पुण्याय भावतः ।
उत्तराध्ययनस्येह ससूत्रवृत्तिपुस्तकं ॥ २६ ॥

सिद्धसूरिगुरोराज्ञां, बिभ्राणः शिरसा भृशं ।
करेष्वग्नींदु १३५२ वर्षेऽत्र, व्यलीलिषदवाचयत् ॥ २८ ॥

एवं संघाधिपोऽसौ विशदगुणमयः साधुआशाधराह्वः
पित्रोः पुण्याय हर्षादतिरुचिरमिदं पुस्तकं वर्ण्यवर्णं ।
............व्रतानां कलितमसिसतामुत्तराध्यायवृत्तेः
विद्वल्लोकस्य चित्तप्रशमसुखकरं कारयामास विज्ञः ॥ २९ ॥

आशाधर ! तवापूर्वा कीर्तिवल्ली समुद्गता
आलवालेव दुष्काले निर्जले दीनदानतः ॥ ३० ॥

श्रीदेवगुप्तसूरीणां, शिष्यः समुदि संसदि ।
पासमूर्तिस्तदादेशात्, किमप्यर्थमभाषत ॥ ३१ ॥

...................जरेये(स्ये)ह, पुष्पदंतौ स्थिराविमौ ।
गुरुभिर्वाच्यमानोऽयं, तावन्नंदतु पुस्तकः ॥ ३२ ॥ छ छ ॥

संवत् १३५२ वर्षे वर्षाकाले श्री उपकेशगच्छे श्री ककुदाचार्यसंताने श्री सिद्धसूरिप्रतिपत्तौ सा० वेसठ संताने सा० गोसात्मज संघपति आशाधरेण श्री उत्तराध्ययनवृत्तिः ससूत्रा कारिता ।

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीयोगशास्त्रसटीकम् ता. प्र. ४०

भृंगीणामिव पक्षपातललितैर्लीलागृहं सुश्रियां, सुच्छायो विततोऽतिविस्मयकरः श्रीमालवंशोऽस्त्यसौ ।
उच्चपर्व्वमनोहरः क्षितिधरे प्राप्तप्रतिष्ठोदयः, पत्रच्छन्नपरंपरा ननु परादृश्यन्त एवानिशं ॥ १ ॥

आसीद्वंशे वरगुणगणे तत्र मुक्तानुकारी, कांत्युल्लासैर्निरुपमतमः (मल्लः) साधुवृत्तानुसारी ।
शुद्धध्यानोपचितसुकृतो देवपूजादिनिष्ठः, श्रेष्ठी श्रेष्ठः सुनयविनयैः सामदेवो गरिष्ठः ॥ २ ॥

पासिलाख्यः सुतस्तस्मादत्यद्भुतसुवैभवात् ।
सुमनोवर्गमुख्योऽभूज्जयंत इव वासवात् ॥ ३ ॥

अगण्यपुण्यलावण्या, यस्य पूना विनामिका ।
सीतेव रामचंद्रस्य, जाता पत्नी पतिव्रता ॥ ४ ॥

तौ सर्व्वदेवसामाख्यौ, तत्कुक्षिव्योममंडनं ।
जज्ञाते ज्ञातमहात्म्यौ, चंद्रार्काविव विश्रुतौ ॥ ५ ॥

श्रेष्ठिनः सर्व्वदेवस्य, पार्श्वनागः सुतोऽजनि ।
लक्ष्मीकुक्षिभवा शांता, तस्य स्वामिणिरात्मजा ॥ ६ ॥

जाते सधर्म्मचारिण्यौ, धर्म्मकर्म्माभिकर्म्मठे ।
सामाकस्य सदा भक्ते, **वीरीवयजसंज्ञिते** ॥ ७ ॥

बीरीकायाः सुते जाते, जातिश्लाघ्ये शमान्विते । **शीताजस्यौ** जिनाधीशधर्म्माराधनतत्परे ॥ ८ ॥

सत्पुत्रस्तत्र शीताया, **आसदेवाभिधो**ऽभवत् । ततो भूतौ सुतावाभू–**शोभनदेव**नामकौ ॥ ९ ॥

अभूतां नंदनौ जस्यास्तुवूटडियशोधरौ । **जिंदा यशकुमाराख्यौ** बभूवतुस्तयोः सुतौ ॥ १० ॥

वयजाख्या तु तत्पत्नी, पंचासूत सुतोत्तमान् । कुंतीव पांडवान् पांडुयशःशुभ्रितभूतलान् ॥ ११ ॥

तेषामाम्रप्रसादाख्य, आद्यो **देवधरः**सुतः । **रामदेव**सुत**श्चांड्रयशोधवलसंज्ञितौ** ॥ १२ ॥

पंचाप्यद्भुतधर्म्मकर्म्मनिरताः पंचापि पुण्यांचिताः पंचाप्युग्रभवप्रपंचविमुखाः पंचापि सत्यप्रियाः ।
यत्ते पंचमहाव्रतैकरुचयः पंचापि शुद्धाशयाः, प्रापुः पंचजनौघमौलितिलकाः पंचापि कीर्त्तिं परां ॥ १३ ॥

अभूदाम्रप्रसादस्य, **सज्जनी** वरगेहिनी । ज्ञानविज्ञानयोः पात्रं, तनुजः **सोहड**स्तयोः ॥ १४ ॥

जाया **देवधर**स्यासीत् , श्रेष्ठिनः श्रेष्ठतानिधेः । **सांतूकायाः** सुता **माटूः**, शमकैरवकौमुदी ॥ १५ ॥

आभडो नरसिंहश्च, जज्ञिरे सूनवस्तयोः । **जगदेवाख्यलाखाकचाहडाः** श्रुतशालिनः ॥ १६ ॥

आद्या **प्रियमति** नामा संजाता तदनु **कुमरदेवी**ति ।
लघ्वी त्व**विहवदेवी** वधूटिका तस्य विनययुता ॥ १७ ॥

भार्याऽभूद्रामदेवस्य, **पद्मीति** नंदनास्त्वमी । **शंबो वयरसिंह**श्च, **पुण्य**श्च **जयतूः** सुताः ॥ १८ ॥

अन्यच्च–येन जिग्ये जगत् देवगुरुभक्त्याऽखिलं भृशं ।
जगदेवस्य तस्यासीदैवान्हानि (दैवाद्गात्रनिर) कारणं ॥ १९ ॥

इतश्चतुर्भिः संबंधः ॥ ज्ञात्वा येन लघीयसाऽपि सहसा स्वस्यांतनालं (भावं) क्षणाद्
दानाद्याः व्रतिनः स्वयं तदखिलं कृत्वाऽऽप्तकृत्यं स्फुटं ।
त्यक्त्वा स्नेहमशेषमात्मवदनेनोच्चार्य धर्म्यस्य यं (यो)
जिग्ये मोहमहामहीपमतितिप्राज्यप्रभावोऽप्यसौ ॥ २० ॥

आबाल्यादपि येन पूर्णविधिना भक्त्याऽर्च्चितः श्रीजिन-
स्तात्पर्यादतिसेविताः सुगुरवोऽभ्यस्तं च शास्त्रं परं ॥
आत्मीयैर्विनयादिभिर्व्वरगुणैराचंद्रकालं कलौ
चंद्रांशूज्ज्वलकांतकीर्तिरतुला स्वल्पैर्दिनैरर्जिता ॥ २१ ॥

श्रीयोगशास्त्रवृत्तेर्देवधरेणात्मपुत्रसहितेन ।
निस्संगचित्तमुनिवत्सावद्यारंभरहितेन ॥ २२ ॥

साधुजनजनिततोषं निर्दोषं पुस्तकप्रवरमेतत् ।
तस्यात्मसुतस्य **जगदेवस्य** श्रेयसेऽलेखि ॥ २३ ॥

यद्दोषैरकलंकितं गुणगणैर्युक्तं मनोहारिभि-
र्नित्याभ्यासरसेन निर्वृतिकरं दिव्योक्तसाधुक्रियं ।
श्रीभूपालकुमारपालसहितं श्रीहेमचंद्रप्रभोः
कर्म्मव्याधिविवाधकं विजयतां तद्योगशास्त्रं सदा ॥ २४ ॥
सूर्याचंद्रमसोर्यावद् द्योतयंति भुवं रुचः । अस्यतं पुस्तकं तावत्, कोविदैर्वाच्यतामिदं ॥ २५ ॥ छ ॥

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीसिद्धांतसारसमुच्चयः ता. प्र. ४१

संवत् १२१२ आषाढ वदि १२ गुरौ ॥ लिखितेयं सिद्धांतोद्धारपुस्तिका लेखक **देवप्रसादे**-नेति ॥ छ ॥ ग्रंथा ग्रं. १६३० द्वितीयखंडे ॥ छ ॥

शिष्यांभोजवनप्रबोधनरवेः श्री**धर्मघोषप्रभो**र्वक्त्रांभोजविनिर्गताः
(सुविशदाः) सिद्धांतसत्काअमी ।
पर्याया गणि**चंद्रकीर्त्ति**कृतिना संचिंत्य संपिंडिताः,
स्वस्य श्री**विमलाख्यसूरि**गणभृच्छिष्येणचिंताकृते ॥ १ ॥
अस्ति श्रीमदखर्वपर्वततिभिः सर्वोदयः क्ष्मातले,
छायाछन्नदिगंतरः परिलसत्भव्यावलीसंकुलः ।
सेवाकारी नृणां नवीनफलदोऽप्यश्रांतसांद्रद्युतिर्निश्छिद्रः
शरलत्वकेतुनिकरः **प्राग्वाटवं**शः सतां ॥ २ ॥
मौक्तिकहारसंकासः, समामीत्त(भाभूत्तत्र)**वनीहिल**ः ।
श्रावको गुणसंयोगान्नराणां हृदये स्थितः ॥ ३ ॥
समजनि **धनदेवः** श्रावकस्तस्य सूनुः,
प्रथितगुणसमुद्रोऽमंदवाणी विसेः (शेषात्) ।
गगनवलयरंगत्कीर्त्तिचंद्रोदयेऽस्मिन्,
भ्रमति नवलंकार ॥ जनयन्यसकते (?) ॥ ४ ॥
तस्य चभार्येन्दु....मती....मांच....पुत्रः
गुणरत्नो (गुणरत्नै) करोहणाचलः धर्म्मव[ट]नद्रुम मलयः
कीर्त्तिसुधाधवलितसमस्तविश्ववलयो यशोदेव श्रेष्ठी, ॥ ५ ॥
तस्य च—आंबींति नाम्ना
जनवत्सलाऽभूद् भार्या **यशोदेव** गृहाधिपस्य ।
यस्याः सतीनां गुणवर्णनायामाद्यैव रेखा क्रियते मुनींद्रैः ॥ ६ ॥

तयोश्च पुत्रा उधरण आम्बिग वीरदेवाख्या बभूवुः ।
सोली लोली सोखी नामानश्च पुत्रिकाः संजज्ञिरे ॥ ७ ॥

अन्यदा च—

सिद्धांतलेखनबद्धादरेण जिनशासनानुरंजितचित्तेन
यशोदेवश्रावकेण सिद्धांतविचारपर्यायपुस्तिका लेखयामास ॥ ८ ॥

पूज्यश्रीविमलाख्यसूरिगणभृच्छिष्यस्य चारित्रिणो,
योग्याऽसौ गणिचंद्रकीर्त्तिविदुषो विद्वज्जनीनंदिनी ।
शास्त्रार्थस्मृतिहेतवे परिलसद्ज्ञानप्रपा,
पुस्तिका भक्तिप्रांचि तयत्युपासकयशोदेवेन निर्मापिता ॥ १ ॥
यावच्चंद्ररवि नभस्तलजुषौ यावच्च देवाचलो
यावत्सप्तसमुद्रमुद्रितमही यावन्नभोमंडलं ।
यावत्स्वर्गविमानसंततिरियं यावच्च दिग्दंतिनः
स्तावत् पुस्तकमेतदस्तु सुधियां व्याख्यायमानं मुदेः ॥ २ ॥

इति प्रशस्ति । समाप्त ॥ छ ॥

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्री पर्युषणाकल्पम् ता. प्र. ४२

संवत् १३०० वर्षे कार्त्तिक वदि १३ शनौ पर्युषणाकल्पपुस्तिका लिखिता ॥ छ ॥ छ ॥

सूरिः श्रीगणनायकोऽजनि यशोभद्राभिधेयः प्रभुः
श्रीशालीसुमतीश्वरौ च गुरवः श्रीशांतिसूरिस्ततः ।
श्रीमानीश्वरशालिसूरिसुमतिः श्रीशांतिसूरीश्वराः
श्रीषंडेरगणे क्षमार्षिसहिताः कुर्व्वंतु वो मंगलं ॥ १ ॥

अपिच—

यः सद्वृत्तिविनिर्मिताखिलजनप्रीतिप्रकर्षोदयः
प्रोद्भूतोन्नतिभासुरः शरलताशाली सुपर्वव्रजः ।
धर्म्माय प्रवरेण भूरिविलसत्संपद्भरेणांचितः
स श्रीमान् जगतीतले विजयतां वंशश्चिरं धर्कटः ॥ २ ॥
तस्मिन्वंशे विशाले समजनि सुकृती सालिगो नामधेय—
स्तस्यासीज्ज्येष्ठपुत्रो गुणगणवसतिरासपूर्व्वोधरश्च ।
आशापालस्तदन्यो निजकुलतिलको दानदाक्षिण्यदक्षः
संतोषी शांतचित्तो जिनचरणरतो धर्म्मकर्म्मप्रवीणः ॥ ३ ॥

आसधरस्य या पत्नी, शीलालंकारधारिणी ।
आसमति नाम पुत्रोऽस्याः पूर्व्वो **मा(ला)ल्हणा**भिधः ॥ ४ ॥
द्वितीयो **जालणो** नाम शुद्धवंशोद्भवः सुधीः ।
(सुरद्रुणा समो) दीने, **वूडाकस्तु** तृतीयकः ॥ ५ ॥
वुडाकस्य प्रिया सौम्या, **रत्नश्रीः** सत्यशालिनी ।
दयादाक्षिण्यविभवा, सत्यसंतोषशालिनी ॥ ६ ॥
सद्गुरोश्चरणांभोजषंडषट्पदसोदरा । तस्याः पुत्रो बभूवायं, **पासडा**ख्यो महामतिः ॥ ७ ॥
आसपालप्रिया जाता, **सूहवा**ख्या वरानना । तस्याः सुतः सतां मान्यो **गोसलः** पुण्यमंदिरं ॥ ८ ॥
गोसलस्य प्रिया सौम्या **वस्तिनी** शुद्धवंशजा ।
जेहकाख्यः प्रियः पुत्रो, **नरसिंहो** द्वितीयकः ॥ ९ ॥
ललना पासडस्येयं **धनश्री** धर्म्मकांक्षिणी ।
अच्छुतोऽस्याद्भूत्भूत्ऽन्योस्मा सूनुर (ऽपि) **जांजणा**भिधः ॥ १० ॥
जेहकस्यांगना जाता **विल्हुका** बंधुबंधुरा ।
पुत्रस्तस्याः सदा सौम्यः, **सामताक्को** कृपानिधिः ॥ ११ ॥
संसारे दुःखधो (रूपे) कथमपि दुलभं (चदुचं) लभ्यते मानुषत्वं
तस्मिन् धर्म्मप्रभावे विलसति कमला स्वप्नवच्चंचला सा ।
रत्नश्री प्राप्य शुद्धां जिनवचनततिःश्राविकाद्येषु वित्त-
व्याजादाकल्प(कालं)....पुनरपिच पटे निश्चलां तां करिष्ये ॥ १२ ॥
॥ छ ॥ छ ॥ शुभं भवतु ॥ छ ॥

८०८४ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीउत्तराध्ययनलघुवृत्तिः ता. प्र. ४३

प्राग्वाटवंऽशेजनि मोहणाख्यः श्रेष्ठी प्रिया तस्य **सुहागदेवी** ।
तयोः सुतो **नागड**नामकोऽभूत्तस्यापि भार्या **सलषू** प्रसिद्धा ॥ १ ॥
तयोस्तु **नारायण**नामधेयः पुत्रोऽभवत् स्फूर्जितभागधेयः ।
चित्रं गुरुत्यागकृता(वर्ता)रोऽपि यः सदा धार्म्मिकलोकधुर्य ॥ २ ॥
तस्याभूत्**कडुया**भिख्योऽनुजो **धरणिग**स्तथा ।
तयोः प्रियतमा **लाषू जासले**ति यथाक्रमं ॥ ३ ॥
नारायणस्य संजज्ञे, हंसलेति सधर्म्मिणी ।
रत्नपालोऽभिधानेन, पुत्रोऽभूत् हृदयप्रियः ॥ ४ ॥

जैनधर्म्मधुराधुर्यः श्रेष्ठी **नारायणो**ऽन्यदा । श्रीमद् **देवेंद्रसूरीणा**मिति वाक्यामृतं (पपौ) ॥ ५ ॥

तथाहि—विषयसुखपिपासोर्गेहिनः क्वास्ति शीलं ?, करणवशगतस्य स्यात्तपो वापि कीदृक् ?।

अनवरतमदभ्रारंभिणो भावनाः किं ?, तदिह नियतमेकं दानमेवास्य धर्म्मः ॥ ६ ॥

तच्च त्रिधा सर्वविदो वदंति, ज्ञानाभयोपग्रहदानभेदात् ।

तत्रापि निःश्रेकविकासनेन, सज्ज्ञानदानं प्रवरं वदंति ॥ ७ ॥

कालादिदोषान् मतिमांद्यतश्च, तच्चाधुना पुस्तकमंतरेण ।

न शक्यते कर्तुमतोऽत्र युक्तं, भव्यस्य सत्पुस्तकलेखनं हि ॥ ८ ॥

एवं निशम्य सम्यक् श्रेष्ठी **नारायणो** विमलबुद्धिः ।

इदममलमुत्तराध्ययनपुस्तकं लेखयामास ॥ ९ ॥

यावद्व्योमसरोवरे विलसतः पक्षद्वयालंकृतौ,

ज्योतिर्जालजटालनिर्मलजले श्रीराजहंसाविह ।

अज्ञानप्रसरांधकारनिकरप्रध्वंसदीपोपम-

स्तावन्नंदतु पुस्तकोऽयमनिशं व्याख्यायमानो बुधैः ॥ १० ॥ छ ॥ ॥ छ ॥

७०२८ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीआवश्यकलघुवृत्तिः ता. प्र. ४४

संवत् १४४५ वर्षे चैत्र वदि ३ सोमे **श्रीस्तंभतीर्थे** कायस्थ ज्ञातीय महं— **जाना** सुतम० **मालाकेन** लिखितं ॥ छ ॥

जैनत्वाव्यभिचारिभावसुभगाः सर्वेऽपि यस्मिञ्जना-

स्तस्मिन् धर्म्मयशःसमृद्धिविशदे वंशेऽवकेशाह्वये ।

श्राद्धोऽभून्नरसिंह इत्यभिधयासाधुः प्रसिद्धः सुधी

स्तस्य प्रौढगुणा बभूव **नयणादेवी**ति वित्ता प्रिया ॥ १ ॥

तयोरभूवंस्तनयास्त्रयोऽमी, **मूंजाल—माला—महिपाल**संज्ञाः

मालाभिधस्तेषु विशेषधर्मा, पुण्याय पाणिग्रहणे निषेधात् ॥ २ ॥

तेषु च **महिपाल**स्याजनि **माल्हणदे**विनामिका पत्नी ।

तत्पुत्रा **मेघा—नासण—सहदे—सालिगाः** सुगुणाः ॥ ३ ॥

श्रीतपागच्छगगनालंकारैकविवस्वतां ।

श्रीदेवसुंदरगुरुसूरीणामुपदेशतः ॥ ४ ॥

माल्हणदेवीसुविशुद्धवासनाऽऽवश्यकस्य लघुवृत्तिं ।

लेखयति स्म शरांबुधिशक्राब्दे (१२७५) **स्तंभतीर्थ**पुरे ॥ ५ ॥

सुराद्रिदंडस्थितिसिद्धतारा/मुक्तावलीकं वियदातपत्रं ।

श्रीसंघराजोपरि यावदास्ते, सत्पुस्तकं नंदतु तावदेतत् ॥ ६ ॥

श्री शांतिनाथजी ज्ञानभंडार. खंभात.

श्री विवेकमंजरीवृत्तिः ता. प्र. ४५

नमः श्रीवीतरागाय ॥ यन्नाममात्रवशतोऽपि शरीरभाजां, नश्यंति सामजघटा इव दुःकृतौघाः।
पादाग्रलांछनमृगेंद्रभुवा भियेव, देवः (स वः) शिवसुखं वितनोतु वीरः ॥ १ ॥
विस्तीर्णोऽयं क्षितिरुह इव श्लाघ्यमूलप्रतिष्ठः, **प्राग्वाटाख्यो** गरिमगुणवानन्वयोऽतिप्रधानः।
लक्ष्मीर्यस्मिन्नवकिसलयश्रेणिशोभां बिभर्ति **धोन्धाकाराविकं** च(नवनव)कुसुमोदामसाम्यं च कीर्तिः ॥२॥

आद्यस्तत्रानवद्यश्रीः **सीदः** श्रीद इवाभवत्।
विश्राणनेन यः श्रियं, तत्याज न कुलीनतां ॥ ३ ॥

वीरदेव्यभिधया शुभलीला, तस्य शीलपरिपालनशीला।
देहिनीव कमला **विमला**ऽभूद्, गेहिनी सुकृतनिर्म्मलबुद्धेः ॥ ४ ॥

चंद्र इव **पुण्यदेवः** सुतस्तयोः सुगुणकिरणसंपूर्णः।
दोषाश्रितो न चित्रं कलंकितां न भजति यस्तु ॥ ५ ॥

लोकोपकारकरणाद्वि**जयाद्यसिंह**सूरेरुपास्तिजननाज्जिनबिंबकृत्यैः।
पुत्रद्वयव्रतविधापनतश्च चक्रे, यः सार्थकं द्रविणमायुरपि स्वकीयं ॥ ६ ॥

तस्य च प्रियतमाऽजनि रम्या **बाल्हिविः** शशिसमुज्ज्वलशीला।
वीतरागचरणार्च्चनचित्ता, क्षेत्रसप्तकवितीर्णसुवित्ता ॥ ७ ॥

कृत्तोपतापनिधनं विधिनोपधानाभिख्यं तपः शिवसुखाय विधाय धैर्यात्।
मालाधिरोपणमकारयदात्मनो यो, द्वेषद्विषो **विजयसिंह**गुरोः कराधः ॥ ८ ॥

त्रयो (सतो) मणिक्षोणिरसावसूत, सुतान् दिगीशान् स्फुटमष्टसंख्यान्।
ये पुण्यकाष्ठाश्रितचेतसोऽपि, चित्रं न संक्रंदनयोगमापुः ॥ ९ ॥

भोगिभोगायितभुजस्तंभः कुलगृहं श्रियः।
आद्यस्तत्राभिरामश्रीः, **ब्रह्मदेवो**ऽभवत्सुतः ॥ १० ॥

अभिरामगुणग्रामद्रुमारामवसुंधरा। दयिती **पोइणिस्तस्य,** बभूव (मधुरस्वरा) ॥११॥

वासनावासितस्वांतश्**चंद्रावत्यां** महत्तमे।
यश्चैत्यै कारयामास, बिंबं **वीरजिन**शितुः ॥ १२ ॥

यः **पद्मदेवसूरे**र्गुरोः कृते शुभमतिः स्ववित्तेन।
चरितं त्रिषष्टिमध्यादलेखयत् प्रथमतीर्थकृतः ॥ १३ ॥

द्वैतीयीको बोहडिरभवत्तनुजो गुणव्रजनिकेतं।
एनस्यावीति कुदुं विनिचं च .. (एतस्यजावीति च कुटुंबिनिसद्गुण)कदंबा ॥१४॥

स्वकीयवंशे भुवनावतंसे ध्वजानुकारं दधदंगजन्मा ।
सद्धर्म्मनिर्मापणदत्तपितृवित्तस्तयो**र्बिल्हणसंज्ञ** आद्यः ॥ १५ ॥

सती सती हतिशीर्षरत्नं, तस्य प्रिया **जैन**पदाब्जभृंगी ।
बभूव दानादिगुणप्रधाना सन्मानसा **रूपिणि**नामधेया ॥ १६ ॥

द्वितीय **आल्हणश्चा**भूद्, भाग्यसौभाग्यजन्मभूः ।
अनन्यजनसामान्यसौजन्यमणिरोहणः ॥ १७ ॥

जल्हणस्तृतीयः सुनुश्चतुर्थो **मल्हणा**भिधः ।
समभून्**मोहिनी** चापि, सुता स्वजनमोहिनी ॥ १८ ॥

जल्हणस्य तृतीयस्य, **नाउ** जाया शुभाशया ।
वीरपालो वरदेवो, वैरिसिंहः सुतास्तयोः ॥ १९ ॥

बहुदेवस्तु तृतीयो यश्चारित्रं च सूरिपदवीं च । संप्राप्य नाम लेभे **सूरिश्रीपद्म**देव इति ॥ २० ॥
चतुर्थ **आमण**श्चारुगुणमाणिक्यमंडितः । पंचमो **वरदेवा**ख्यः, सत्सख्यविहितोद्यमः ॥ २१ ॥
षष्ठः पंडितसंहतिचतुरः स्फूर्जद्यशा **यशोवीरः** । आचार्यपदे लेभे, श्री**परमानंद** इत्यभिधां ॥ २२ ॥
सप्तमो **वीरचंद्रा**ख्योऽजन्यनूनगुणावलिः । सम**भूज्जिनचंद्राह्वः**, प्रकृष्टवपुरष्टमः ॥ २३ ॥

वाहडिजविल्हणस्य च पुत्रचतुष्टयमनूनगुणरूपां ।
रूपिणिकुक्षिसरोवरकलहंसनिभं विवेकयुतं ॥ २४ ॥

आशापालः कीर्तिवल्लयालवालः, **सोधू** नामा भूरिधामा द्वितीयः ।
तार्त्तीयिकोऽभू**ज्जगत्सिंह**संज्ञस्तुर्यः सूनुः **पद्मसिंहा**भिधानः ॥ २५ ॥

वीरीलि (नामा) . . सुगुणैः पवित्रा, मनोहरा साहरिणी सुनेत्रा ।
अभूच्छुभाचारपवित्रपात्रा, सद्रूपलावण्यविशुद्धगात्रा ॥ २६ ॥

जाम्राह्वः पुत्र इह (तथेह जाम्राह्वसुतः) तृतीयः, कामप्रदां संयमराज्यलक्ष्मीं ।
क्षिप्रं तथा सूरिपदं च लेभे, सुदुर्लभं पुण्यवतापि पुंसा ॥ २७ ॥

प्रथमस्या**सपालस्य खेतुका**कुक्षिसंभवाः ।
सज्जनोऽभयसिंहाख्यः, सुजाकः सहजः सुताः ॥ २८ ॥

सीधूकाख्यद्वितीयस्य, **सोहागे**त्यभवद् वधूः ।
अगण्यपुण्यदाक्षिण्यलावण्यादिगुणान्विता ॥ २९ ॥

तुर्यस्य **पद्मसिंहस्य, वाल्हू**नाम्नी प्रियाऽभवत् ।
सुतस्तयोः समुत्पन्नो, **नागपाला**भिधः सुधीः ॥ ३० ॥

रूपं बलं च विभवो विषयाभिषं (पातो,) नीरोगता लवणिमा प्रियसंप्रयोगः
वातावधूतपटचंचलमेव सर्वं, विज्ञाय धर्मनिपुणैर्भविभिर्विभाव्यं ॥ ३१ ॥

अंगुष्ठमात्रं यो बिंबं, कारयेदर्हतां बुधः । सिद्धिनारीपरीरंभभवं स लभते सुखं ॥ ३२ ॥
न मनःपर्ययमवधिर्न केवलज्ञानमात्र नैवास्ति । पुस्तकलेखनमेतत्, तदृष्टिर्दृष्टिहीनानां ॥ ३३ ॥
श्रीरत्नप्रभसूरेर्गुरोः सकाशान्निजस्य सद्बंधोः । संसारांभोधितरीं श्रुत्वेत्यथ देशनां विशदां ॥ ३४ ॥
हाडापद्रपुरे चैत्ये, कारयामास भावतः । श्रीमतः **सुमतेर्बिंब**मर्हतस्त्रिजगत्पतेः ॥ ३५ ॥
आलेखयामास **किलासपालः** श्रेयःश्रिये स्वस्य पितुः प्रधानं ।
विवेकमंजरीभिधां ध्यानं (र्यभिधानमेतत्) सत्पुस्तकं निर्वृतिदीपकल्पं ॥ ३७ ॥
यावत् पूर्वाद्रिशृंगाश्रित इह जगति स्वप्रतापेन हंति
प्रोधन्नीलं (प्रगाढ) तिमिरभरमरं तापन सूत (स्तत्) समंतात् ।
यावच्छेषाहिराजः क्षितिवलयमसौ स्फूर्तिमान् संबिभार्त्ति
श्रेयोधिष्ठानयानप्रवरर . . . भः (समयः) पुस्तकस्तावदास्तां ॥ ३९ ॥
चक्षुर्लोचनविष्टपात्रिनयनप्राग्भूतसंवत्सरे (१३२२)
मासे कार्तिकनाम्नि चंद्रसहिते कृष्णाष्टमीवासरे ।
वृत्तिर्निर्वृतिमार्गदीपकलिकातुल्या विनीतात्मना
रागेण स्वयमादरेण लिखितानन्यादनिंद्याक्षरा ॥प्रशस्ति समाप्ता (श्रेयसे)॥शुभमस्तु॥
पूज्यश्री**पद्युम्नसूरि**भिः प्रशस्तिः शोधितेति ॥

७०२३ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीज्ञाताधर्म्मकथाद्यंगवृत्तिः ता. प्र. ४६

ग्रंथा ग्रं. ९०० ॥ छ ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥ संवत् १२९५ वर्षे चैत्र शुदि २ मंगलदिनेऽद्येह श्री**मदनहिल्लपाटके** महाराजाधिराज **श्रीभीमदेवविजय** कल्याणराज्ये ज्ञाताधर्म्मकथांगप्रभृतिषडंगीसूत्रवृत्तिपुस्तकं लिखितं ॥ छ ॥ छ ॥ छ ॥ मंगलं महाश्रीः ॥

॥ ९० ॥ अस्ति विस्तारवानुर्व्यामच्युतश्रीसमाश्रयः ।
नदीनः सत्वसंपूर्णो, **दीशापालान्वयोऽर्णवः** ॥ १ ॥
तस्मिन् **देउकनामा** त्रासविहीनोऽभवत् पुरुषरत्नं ।
विजयमतिरस्य पत्नी बभूव धर्मैकनित्यमतिः ॥ २ ॥
तयोरभूतां तनयौ नयान्वितौ निजान्वयव्योममृगांकभास्करौ ।
सोल्हाक वील्हाक इतिप्रसिद्धौ, **माढ**श्री (श्रि) पुत्री **धनपाल**माता ॥ ३ ॥
सोलाकस्याभवत् पत्नी, **मोहिणी**ति तयोः सुतः ।
महणाख्य इति ख्यातः, सम्यक्त्वे निश्चलाशयः ॥ ४ ॥
वील्हाकसत्का दयिता दयाढया **सोखुः** सदाचारविचारचारुः ।
संचिंत्य संसारमसारमेषा धर्मार्थमर्थव्ययमाततान ॥ ५ ॥

पुरुषार्था इव मूर्ताश्चत्वारो नंदनास्तयोर्जाताः ।
कर्तुमिव तुल्यकालं, जिनोक्तधर्मं चतुर्भेदं ॥ ६ ॥
प्रथमस्तत्र जयंतो **वीराख्य**स्तदनु दनु (ज) **तिहुणाह्वौः** ।
जाल्हणनामा तुर्यः, पंचत्वं प्राप तत्राद्यः ॥ ७ ॥
वीरस्ततोऽन्यदाऽश्रौषीच्छोकशंकुविनाशकं ।
श्रीजगच्चंद्रसूरीणां, वचः सर्वज्ञभाषितं ॥ ८ ॥

तद्यथा—

चला समृद्धिः क्षणिकं शरीरं, बंधुप्रबंधोऽपि निजार्थबद्धः ।
भवांतरे संचलितस्य जंतोर्न कोऽपि धर्मादपरः सहायः ॥ ९ ॥
कुबोधरुद्धे भुवने न बुध्यते, स्फुटं जिनेंद्रागममंतरेण ।
कलौ भवेत्सोऽपि न पुस्तकं विना विधीयते पुस्तकलेखनं ततः ॥ १० ॥
स्वभ्रातुः श्रेयसेऽलेखि ततस्तेन सबंधुना ।
ज्ञाताधर्म्मकथांगादिषडंगी वृत्तिसंयुता ॥ ११ ॥
जंघरालाभिधस्थाने, युगादिजिनमंदिरे ।
संघस्य पुरतो व्याख्यातैषा **देवेंद्रसूरि**भिः ॥ १२ ।
यावत् व्योमसरःक्रोडे, राजहंसौ विराजतः
तावत्कृतकृतिस्वांतानन्दं नंदतु पुस्तकं ॥ १३ ॥

सं० १२९७ वर्षे व्याख्यातमिति ॥ शुभं भवतु ॥ शुभमस्तु संघस्य ॥

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीयोगशास्त्रं सटीकम् (श्रीहेमचंद्रः) ता. प्र. ४७

स्वस्ति श्री विक्रमनृपतः संवत् १२५१ वर्षे कार्तिक सुदि १२ शुक्रे रेवतीनक्षत्रे सिद्धयोगे महाराजश्री **भीमदेवविजयि राज्ये** अवनिवनिताप्रशस्तकस्तुरिकातिलकायमान **लाटदे**शालंकारिणि सकलजनमनोहारिणि विविधधार्मिकविराजमाने **दर्भवती**स्थाने **श्रीमाल**वंशीय श्रे० **साभानंदनेन** जगदानंदनेन निर्मलतमसम्यक्त्वधरेण श्रे० **देवधरेण** सकलधर्म्माकामविहितेन ठ० **आभडनरसिंहादि**पुत्रसहितेन निजपुत्र **जगदेव**श्रेयोनिमित्तं **श्रीवटपद्र**कपुरप्रसिद्ध प्रबुद्ध पं० **केशवसुत-** पं० **वोसरि**हस्तेनाशेषविशेषज्ञानवतश्चमत्कारीदमप्रतिमप्रतापश्रीजिनशासनप्रभावकश्री**कुमारपाल**भूपालविज्ञापितस्य **श्रीहेमचंद्रसूरिर**चितस्य श्रीयोगशास्त्रस्य वृत्तिपुस्तकं लिखितमिति ॥ मंगलं महाश्रीः । शुभं भवतु लेखकपाठकवाचकानामिति ॥ छ ॥

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीश्राद्धदिनकृत्यवृत्तिः ता. प्र. ४८

नमः श्रीवर्द्धमानाय वर्द्धमानाय वेदसा ।
वेदसारं परं ब्रह्म, ब्रह्मवत्स्थितिनिश्चयः ॥ १ ॥

स्वबीजगुप्तं कृतिभिः कृषीवलैः, क्षेत्रेषु सिक्तं शुभभाववारिणा ।
क्रियेत यस्मिन् सफलं शिवश्रिया, पुरं तदत्रास्ति **दयावटाभिधं** ॥ २ ॥

ख्यातस्तत्रास्ति वस्तुप्रगुणगुणगणः प्राणिरक्षैकदक्षः
सद्ज्ञाने लब्धलक्ष्यो जिनवचनरुचिश्चंचदुच्चैश्चरित्रः ।
पात्रं पात्रैकचूडामणिजिनसुगुरूपासनावासनायाः
संघः सुश्रावकाणां सुकृतमतिरमी संति तत्रापि मुख्याः ॥ ३ ॥

होनाकः सज्जनः श्रेष्ठः श्रेष्ठी **कुमरसिंहकः** ।
सोमाकः श्रावकः श्रेष्ठः शिष्टधी**ररिसिंहकः** ॥ ४ ॥

कडुयाकश्च सुश्रेष्ठः, **सांगाक** इति सत्तमः ।
रवीस्वाकः मुहडाकश्च, धर्म्मकर्म्मैककर्म्मठः ॥ ५ ॥

एतन्मुखः श्रावकसंघ एषोऽन्यदा वदान्यो जिनशास (नोधमी) ।
सदा सदाचारविचारचारुक्रियासमाचारशुचिर्व्रतानां ॥ ६ ॥

श्री**मज्जगच्चंद्र**मुनींद्रशिष्यश्रीपूज्य**देवेंद्रमुनीश्वराणां** ।
तदाद्यशिष्यत्वभृतां च **विद्यानंदा**ख्यविख्यातमुनिप्रभूणां ॥ ७ ॥

तथा गुरूणां सुगुणैर्गुरूणां, श्री**धर्मघोषाभिधसूरि**राजां ।
सद्देशनामेवमपापभावं, शुश्राव भावावनतोत्तमांगः ॥ ८ ॥

विषयसुखपिपासोर्गेहिनः क्वास्ति शीलं, करणवशगतस्य स्यात्तपो वापि कीदृग् ?
अनवरतमदभ्रारंभिणो भावनाः कास्तदिह नियतमेकं दानमेवास्य धर्म्मः ॥ ९ ॥

॥ किंच—

॥ धर्मः स्फूर्ज्जति दानमेव गृहिणां ज्ञानाभयोपग्रहै-
स्त्रेधा तद् वरमाद्यमत्र यदितो निःशेषदानोदयः ।
ज्ञानं वाचनपुस्तकैर्विरहितं दातुं च लातुं च वा,
शक्यं पुस्तकलेखनेन कृतिभिः कार्यस्तदर्थोऽर्थवान् ॥ १० ॥

श्रुत्वेति संघसमवायविधीयमानज्ञानार्चनोद्भवधनेन मिथः प्रवृद्धिं ।
नीतेन पुस्तकमिदं श्रुतकोशवृद्ध्यै बद्धादरश्चिरमलेखयदेव हृष्टः ॥ ११ ॥

यावज्जिनमतभानुः प्रकाशिताशेषवस्तुविस्तारः।
जगति जयतीह पुस्तकमिदं बुधैर्वाच्यतां तावत् ॥ १२ ॥

ग्रंथा ग्रं. १३००० ॥ मंगलं महाश्रीः ॥
लेखकपाठकदातारः ॥
समस्तसंघो दीर्घायुर्भवतु ॥

श्री शां. ज्ञा. भं. खंभात.

श्रीसूत्रकृतांगमूलम् निर्युक्तिः वृत्तिः ता. प्र. ४९

*संवत् १३४९ वर्षे मार्ग शु.... अद्येह (दयाछा) (य) श्रे० **होना** श्रे० **कुमरसींह** श्रे० **सोमा** प्रभृति संघसमवायसमारब्धपुस्तकभांडागारे ले० **सींहाकेन** लिखितं ॥

श्री शांतिनाथजी ज्ञान भंडार खंभात.

श्रीव्यवहारसूत्रम् सवृत्तिः (द्वितीयः खंडः) ता. प्र. ५०.

इति श्रीमलयगिरिविरचितायां व्यवहारटीकायां पंचमोद्देशकः समाप्तः ॥ छ ॥ पंचमोद्देशके ग्रंथाग्रं. ९०५ ॥ छ ॥ मंगलं महाश्रीः ॥ ६०३ ॥ छ ॥

वरहुडिया साधु० **राहड** सुत० **लाहडेन** श्रेयोऽर्थे व्यवहारद्वितीयखंडं लिखापितमिति ॥ संवत् १३०९ वर्षे भाद्रपद सुदि १५ ॥

अस्तीह श्रेष्ठपर्वप्रचयपरिचितः क्ष्माभृदाप्तप्रतिष्ठः
सच्छायाचारुवर्णः सकलसरलताालंकृतः शस्तवृत्तः।
पल्लीवालाख्यवंशो जगति सुविदितस्तत्र मुक्तेव साधुः
साधुव्राते प्रणंता **वरहुडि**रिति सत्ख्यातिमान्**नेमडो**ऽभूत् ॥ १ ॥
तस्यासंल्लनया विशुद्धविनयास्तत्रादिमो **राहडो**
जज्ञेऽतो **भयदेव** इत्यभिधया लब्धप्रसिद्धिर्जने।
उत्पन्नो **जयदेव** इत्यवहितस्वान्तोऽत्रयांतधर्मे तत।
स्तत्राद्यस्यसदा प्रिया प्रियतमा **लक्ष्मी** तथा **नाइकिः** ॥ २ ॥
आद्याया **जिनचंद्र** इत्यनुदिनं सद्धर्मकर्मोद्यतः
पुत्र**श्चाहिणि**संज्ञिता सहचरी तस्य त्वमी सूनवः।
ज्येष्ठोऽभूत् किल **देवचंद्र** इति यो द्रव्यं व्ययित्वा निजं
सत्तीर्थेषु शिवाय **संघपति**रित्याख्यां सुधीर्लब्धवान् ॥ ३ ॥
नामंधराख्योऽथ **महाधरा**ख्योऽतो **वीरधवला**भिध**भीमदेवौ**।
पुत्री तथा **धाहिणी** नामिकाऽभूत्, सर्वेऽपि जैनांह्रिसरोजभृंगाः ॥ ४ ॥

श्री**देवभद्रगणि**पादसरोरुहालेर्भक्त्या नम**द्विजयचंद्र**मुनीश्वरस्य ।
देवेंद्रसूरिसुगुरोः पदपद्ममूले तत्रांतिमौ जगृहतुर्यतितां शिवोत्कौ ॥ ५ ॥

नाइकेस्तु सुता जातास्तत्र ज्येष्ठो **धनेश्वरः** ।
खेतूनाम्नी प्रिया तस्य, **अरसिंहादयः** सुताः ॥ ६ ॥

द्वैतीयीकस्तु साधुश्रुतवचनसुधास्वादनातृप्तचित्तः
श्रीमज्जैनेंद्रबिंबप्रवरजिनगृहप्रोल्लसत्पुस्तकादौ ।
सप्तक्षेत्र्यां प्रभूतव्ययितनिजधनो **लाहडो** नामतोऽभूत्
लक्ष्मश्रीरित्यभिख्या सुचरितसहिता तस्य भार्या सदार्या ॥ ७ ॥

अभयकुमाराभिख्यस्तृतीयोऽजनि नंदनः ।
यो दधे मानसं धर्मश्रद्धासंबंधबंधुरं ॥ ८ ॥

धर्मे सहाया **सहदेव**साधोः, **सौभाग्यदेवी**ति बभूव जाया ।
पुत्रौ च **षेढा**भिध**गोसला**ख्यौ प्रभावकौ श्रीजिनशासनस्य ॥ ९ ॥

॥ किंच–

यौ कृत्वा गुणसंघकेलिभवनं श्रीसंघमुच्चैस्तरां
श्रीशत्रुंजयरैवत प्रभृतिषुप्रख्याततीर्थेषु च ।
न्यायोपार्जितमर्थसार्थनिवहं स्वीयं व्ययित्वा भृशं
लेभाते सुचिराय संघपतिरित्याख्यां स्फुटां भूतले ॥ १० ॥

आद्यस्य जज्ञे किल **षींवदेवी**नाम्ना कलत्रं सुविवेकपात्रं ।
तथा सुता **जेहडहेमचंद्रकुमारपाला**भिध**पासदेवाः** ॥ ११ ॥

अभवद् **गोसल**साधो**र्गुणदेवी**ति वल्लभा । नंदनो **हरिचंद्रा**ख्यो **देवती**ति च पुत्रिका ॥ १२ ॥

जयदेवस्य तु गृहिणी, **जाल्हण**देवीति संज्ञिता जज्ञे ।
पुत्रास्तु **वीरदेवो, देवकुमारश्च हालूश्च** ॥ १३ ॥

शुभशीलशीलनपरा अभवंस्तेषामिमाः गृहिण्यस्तु ।
विजयसिरी–देवसिरी–हरसिणीसंज्ञा यथासंख्यं ॥ १४ ॥

एवं कुटुंबसमुदयउज्ज्वलवृषविहितवासनाप्रचयः
सुगुरोर्गुणगणसुगुरोः सुश्राव सुदेशनामेवं ॥ १५ ॥

दानशीलतपोभावभेदाद्धर्मश्चतुर्विधः । श्रयणीयः सदा भव्यैर्भाव्यभद्रपदप्रदः ॥ १६ ॥

विषयजसुखमिच्छोर्गेहिनः क्वास्ति शीलं ?, करणवशगतस्य स्यात्तपो वापि कीदृक् ? ।
अनवरतमदभ्रारंभिणो भावनाः काः तदिह नियतमेकं दानमेवास्य धर्मः ॥ १७ ॥

ज्ञानाभयोपग्रहदानभेदात्तच्चत्रिधा सर्वविदो वदंति ।
तत्रापि निर्वाणपथैकदीपं, सद्ज्ञानदानं प्रवरं वदंति । ॥ १८ ॥

कालानुभावान्मतिमांद्यतश्च, तच्चाधुना पुस्तकमंतरेण,
न स्यादतः पुस्तकलेखनं हि, श्राद्धस्य युक्तं नितरां विधातुं ॥ १९ ॥

इत्याकर्ण्य ततः स्वविभवैः सुपुस्तकेऽस्मिन् सत्पत्रैर्व्यवहारद्वितीयं खंडं लिखितम् ॥ २० ॥
यावद् व्योम.....................

श्री. शां. ज्ञा. भं. खं.

श्रीज्ञाताधर्मकथासूत्रं सवृत्ति ता. प्र. ५१

संवत १३०७ वर्षे अस्तीह. [विशेष. व्यवहारसूत्र. ता. प्र. ४६ मुजब)

श्री. शा. ज्ञा. भं. खं.

श्रीआवश्यकबृहद्वृत्तिः ता. प्र. ५२

संवत १२९४ वर्षे पोष सुद १० भौमे लिखितं (विशेष. व्यवहार सूत्र. ता. प्र. ४६ मुजव).

श्री शांतिनाथजी ज्ञान भंडार. खंभात.

श्रीआचारांगचूर्णिः ता. प्र. ५३

ग्रंथा ग्रं० ८३०० ॥ शुभं भवतु ॥ संवत् १३०३ वर्षे जेष्ट सुदि १५ लिखितमिदं ॥
(विशेष. श्री. व्य. सू. ता. प्र. ४६ मुजब).

श्री शां. ज्ञा. भं. खंभात.

श्रीभगवतीसूत्रवृत्तिः ता. प्र. ५४.

ग्रंथाग्रं १८६१६. शुभं भवतु ॥संवत् १२९८ वर्षे मार्ग सुदि १३ सोमे अद्येह **वीजापुरे** सा० **सहदेव** सा० **राहडसुत लाहडेन** सा० **देवचंद्र**प्रभृतिकुटुंबसमुदायेन चतुर्विधसंघस्य पठनार्थं वाचनार्थं च लिखापितमिति. ॥ संवत् १२९८ फागुण सु ३ गुरौ अद्येह वीजापुरे पूज्यश्री-**देवचंद्र**सूरिश्री**विजयचंद्रसूरि**व्याख्यानतः संसारासारतां विचिंत्य सर्वज्ञोक्तं शास्त्रं प्रमाणमिति मनसि ज्ञात्वा सा० राहडसुत**जिणचंद्रधणेसरलाहड** सा० **सहदेव** सुत सा० **षेढा. संघवी गोसल** प्रभृति-कुटुंबसमुदायेन चतुर्विधसंघस्य पठनार्थं वाचनार्थं च लिखापितमिति

(विशेष. श्री. व्यव० सूत्र. ता. प्र. ४६ मुजब).

श्री शां. ज्ञा. भं. खंभात.

श्रीउपासकादिसूत्रवृत्तिः ता. प्र. ५५

संवत् १३०१ वर्षे फाल्गुन वदि १ शनौ अद्येह **विजापुरे** पंचांगीसूत्रवृत्तिपुस्तकं ठ० **अरसिंहेन** लिखितं ॥ उभय ११२८ ॥ संवत १३०१ वर्षे फाल्गुन वदि १३ शनौ इहैव **प्रल्हादनपुरे** श्री**नागपुरीय**श्रावकैः पोषधशालायां सिद्धांतशास्त्रं पूज्यश्री**देवेंद्रसूरि**श्री**विजयचंद्र**सूरिउपाध्याय-श्री**देवभद्र**गणेर्व्याख्यानतः संसारासारतां विचिंत्य सर्वज्ञोक्तं शास्त्रं प्रमाणमिति मनसि विचिंत्य **श्रीनागपुरीय वरहुडिया**संताने सा० **आसदेव** (विशेष श्री पाक्षिक सूत्र वृत्तिः ता.प्र.नं.२५मुजब).*

श्री शां० ज्ञानभं० खंभात.

श्रीचंद्रप्रज्ञप्तिवृत्तिः ता. प्र. ५६

ओकेशवंशे विशदे सौवर्णिकपुंगवोऽस्ति **जयसिंहः** ।
सुश्रावकगुणयुक्तश्चत्वारश्चा (भवन्) पुत्राः ॥ १ ॥
पुत्र्यौ **पूनी वर्जू** द्वितीयका साधु वइजपुत्रेण ।
लींबाकेन व्यूढा सद्भक्तिकृतादरा . . (नित्यं)
. . (सा रत्नशेखराणां) सूरीणामुपदेशतः ।
सा वर्जु श्राविका पुण्यप्रभूतोद्भववासना ॥ ३ ॥
श्री**स्तंभतीर्थ**नगरे चंद्रप्रज्ञप्तिवृत्तिवरशास्त्रं ।
शरवार्द्धिशक्रवर्षे १४४५ शिवाप्तये लेखयामास ॥

श्री शां० ज्ञान भं० खंभात.

श्रीत्रिषष्टीय (तृतीयपर्व) चरित्रं ता. प्र. ५७

मंगलं महाश्रीः ॥ ठ ॥ ठ १२९५ वर्षे आश्विन वदि २ रवौ अद्येह श्री **वीजापुरपत्तने** समस्तराजावलीपूर्वकं तपाकीयश्रीपोषधशालायां चरित्रगुणनिधानसमस्तसिद्धांतकलोन्मानेन पारगेन **तपादेवभद्रगणि–मलयकीर्ति**पंडित**फुलचंद्र**पंडित**देवकुमारमुनिनेमिकुमारमुनि** प्रभृतिसमस्तसाधून्

---

* उपरना. ता. प्र. नं ४५–४७–४८–४९–५० ना ग्रंथो, तथा. ता. प्र. २४–२५ ना. ग्रंथो वरहुडीआ वंशना श्रावकोए सं. १२९० थी. १३१० सुधीमां लखावेला छे. आ उपरांत बीजा पण संख्या बंध ग्रंथो ताडपत्र उपर ते वंशना श्रावकोए लखावेला छे. एमांना श्री. शां. ज्ञा. भंडारमांज उपर जणावेला ग्रंथो उपरांत. श्रीयोगशास्त्रसटीक. श्रीव्यवहारसूत्र वगेरे वरहुडीया श्रावकोना लखावेला ग्रंथो छे पण तेमां संवत नहि होवाथी अने प्रशस्ति. ता. प्र. ४४ प्रमाणेज होवाथी पुनरावृत्ति दोष टाळवानी खातर तेमनी प्रशस्तिओ नोंधी नथी.

तच्चरणकमलान् भक्तपरमश्रावक साधू० **रतनपाल** समस्तसिद्धांतपुस्तकानां पौषधशालाभारनिर्वाहक परमश्रावक श्रेष्ठि **वील्हण** द्वितीयभारनिर्वाहक साधर्मिकानां वात्सल्यतत्पर परमश्रावक ठ० **आसपाल** तृतीयभारनिर्वाहक निरंतरं पुस्तकसिद्धांतनिर्विकल्पभक्त्या सारतत्पर श्रावक साधु **लाहण** प्रभृतिभिः समस्तश्रावकैः त्रिषष्टीयपुस्तकं समस्तसाधूनां श्रावकाणां पठनवाचनपुण्यश्रेयोऽर्थं लिखापितं लेखकपाठकानां शुभं भवतु.

श्री शां० ज्ञान भं० खंभात.

अनुयोगद्वारसूत्रम् तां. प्र. ५८

सं. १३०१ वर्षे अषाढ शुद १५ शुक्रे **धवलककनगर**निवासिना **प्राग्वाट**वंशोद्भवेन व्य० **पासदेवसुतेन** गंधिकश्रेष्ठि**धीणाकेन** वृहद्भ्रातृ**सीद्धा**श्रेयोऽर्थं सवृत्तिकमनुयोगद्वारसूत्रं लेखयांचक्रे ॥ छ० ॥

श्री शां० ज्ञान भं० खंभात.

श्रीअनुयोगद्वारचूर्णिः ता. प्र. ५९

संवत् १३३३ वर्षे चैत्र सुदि ११ बुधे अद्येह धवलकके ।

श्री शां० ज्ञान भं० खंभात.

श्रीसिद्धहेमअवचूर्णिः ता. प्र. ६०

संवत् **१२६४** वर्षे श्रावणशुदि **३** रवौ **श्री जयानंदसूरि**शिष्येण **अमरचंद्रेण** आत्मयोग्या अवचूर्णिकायाः प्रथमपुस्तिका लिखिता ॥ शुभं भवतु लेखकपाठकयोः ॥ छ ॥

श्री शां० ज्ञान भं० खंभात.

श्रीहैमव्याकरणम् ता. प्र. ६१

संवत् **१२९३** वर्षे आश्विन सुदि १५ सोमे **स्तंभतीर्थे** श्री**नेरश्वरि** योग्या हेमव्याकरण--पुस्तिका लिखापिता ॥

श्री शां० ज्ञान भं० खंभात.

श्रीशब्दानुशासबृहद्वृत्तिः ता. प्र. ६२

संवत् १२९८ वर्षे द्वितीयभाद्रपद वदि ७ गुरौ लिखितेयं, शुभं भवतु. **वीजापुरे** पौषधशालायां तद्वितप्रथमखंडं समस्तश्रावकैर्लिखापितं ॥

७०२२ श्री. शां. ज्ञा. भं. खंभात.

श्रीशब्दानुशासनकृद्बृहद्वृत्तिः ता. प्र. ६३

संवत् १३०० वर्षे **विजापूर**पौषधशालायां समस्तश्रावकैः कृद्बृहद्वृत्तिपुस्तिका लिखापिता। **सा० रत्नपाल** श्रे० **वील्हण** ष० **आसपाल** सा० **लाहडेन** लिखापितं।

श्री शां० ज्ञान भं० खंभात.

श्रीकथारत्नकोशः ता. प्र. ६४

(देवभद्रसूरिः)

संवत् १२८६ वर्षे श्रावण सुदि ३ बुधे अद्येह **मल्हादनपुरे** कथारत्नकोशपुस्तकमलेखीति भद्रमिति ।

श्री शां० ज्ञान भं० खंभात.

श्रीयोगशास्त्रशास्त्रविवरणम् ता. प्र. ६५

प्रशस्तिः॥ क....संवत् १२९२ वर्षे कार्तिक सुदि ८ रवौ धनिष्ठानक्षत्रे योगशास्त्रवृत्तिः—द्वितीयप्रकाशस्य लिखितेति ॥ शुभं भवतु ॥

श्री शां० ज्ञान भं० खंभात.

श्रीआचारांगसूत्रनिर्युक्तिः ता. प्र. ६६

प्रशस्तिः ॥ सर्वगाथासंख्या ३६७ आचारनिर्युक्तिः समाप्ता ॥ आचारांगवृत्तिः १२३०० आचारसूत्रं २५०० निर्युक्तिः ४४७, संवत् १३०३ वर्षे मार्गवदि १२ गुरौ अद्येह श्री**मदणहिलपाटके** महाराजाधिराजश्री**वीसलदेवराज्ये** महामात्यश्री**तेजःपाल**प्रतिपत्तौ श्रीआचारांगपुस्तकं लिखितमिति । कल्याणमस्तु श्रीजिनशासनप्रवचनाय ॥ मंगलं महाश्रीः ॥

७०२४ श्री शांतिनाथजी ज्ञानभंडार, खंभात.

श्रीजीवसमासप्रकरणं सवृत्तिकम् ता. प्र. ६७

प्रशस्तिः ॥ टी० ॥ ग्रंथाग्रं. ६६२७, संवत् ११६४ चैत्र सुदि ४ सोमेऽद्येह श्री**मदणहिलपाटके** समस्तराजावलिविराजितमहाराजाधिराजपरमेश्वरश्री**मज्जयसिंहदेव**कल्याणविजय-

राज्ये एवं काले प्रवर्तमाने यमनियमस्वाध्यायध्यानानुष्ठानरतपरमनैष्ठिकपंडितश्वेतांबराचार्यभट्टारकश्री-**हेमचचंद्राचार्येण** पुस्तिका लि० श्री०*

८०९२ श्री शांतिनाथजी ज्ञानभंडार. खंभात.

श्रीदेववंदनक आदि प्रकरणानि ता. प्र. ६८

देववंदण वंदनकं समाप्तम् ॥ छ ॥ छ ॥ संवत् १२९० वर्षे माघ वदि १ गुरु, दिने ॥ **वरहुडिया नेमड**सुत साहु**सहदेव** पुत्र सा० **षेटा, गोसलेन** मातृ **सौभाग्यदेवि** श्रेयोऽर्थं ॥ लिषापितं ॥ छ ॥ शुभं भवतु लेखकपाठकयोः ॥छ॥ लिखितं **वीजापुरे.** लिषापितं **लाहडेन, लिखितं** पंडित **अमलेण** ॥ छ ॥

श्री शां० ज्ञान भं० खंभात.

श्रीसमवायांगसूत्रसवृत्तिः ता. प्र. ६९

संवत् **१३४९** वर्षे माघ सुदि १३ अद्येह **दयावाय** श्रेष्ठि **होना** श्रेष्ठि **कुमरसिंह** श्रे० **सोम**प्रभृतिसमवायसमारब्धपुस्तकभांडागारे ल० **सिंहाकेन** समवायवृत्तिपुस्तकं लिखितं ॥ छ ॥

श्री शां० ज्ञान भं० खंभात.

श्रीधर्माभ्युदयमहाकाव्यम् ता. प्र. ७०

संवत् १२९० वर्षे चैत्र सुदि ११ रवौ **स्तंभतीर्थवेलाकुल**मनुपालयता महं० श्री-**वस्तुपालेन** श्रीधर्म्माभ्युदयमहाकाव्यपुस्तकमिदमलेखि ॥ छ ॥ छ ॥ छ ॥ शुभमस्तु श्रोतृव्याख्यातृणां ॥ छ ॥

श्री शां० ज्ञान भं० खंभात.

श्रीप्रत्याख्यानविवरणम् ता. प्र. ७१

संवत् १२४४ वर्षे जेष्ठ वदि ५ रवौ प्रत्याख्यान विवरणं लिखितमिति ॥ वा. **लक्ष्मीधरेणेति** ॥ छ ॥

श्री शां० ज्ञान भं० खंभात.

श्रीधर्मरत्नप्रकरणम् ता. प्र. ७२

धम्मरयणपगरणं सम्मत्तं ॥छ॥छ॥ ६०३ ॥छ॥ मंगलं महाश्रीः ॥छ॥ शुभंभवतु लेखक-

---

* *आ प्रत आखीये मलधारी श्रीहेमचंद्रसूरिश्वरजीए पोताना हस्ताक्षरथी लखेली छे. जेनो फोटो अमारा तरफथी प्रसिद्ध थयेल श्री जैन साहित्यसंग्रहमां आपवामां आव्यो छे.*

पाठकावधारणादिसमस्तश्रावकलोकजनानां ॥ छ ॥ सं० १३२५ वर्षे माघ वदि ९ सोमेऽद्येह **वीजापुरे** महाराजश्री**मदअर्जुनदेव**कल्याणविजयराज्ये तन्नियुक्तमहं० **श्री सोम**प्रतिपत्तौ मालवके(म्य) व्य० सा० **रामचंद्र**सुत सा० **कुस्व(खे)राक**स्य पठनश्रेयोऽर्थं स्वाध्यायपुस्तिका ठकु० **विक्रमसिंहेन** लिखिता ॥छ॥ **यादृशं**................मम दोषो न दीयते.

श्री शां० ज्ञान भं० खंभात.

श्रीसूयगडांगवृत्तिः (सूत्रनिर्युक्तिसहिता) ता. प्र. ७३

प्रशस्तिः ॥ सर्वसंख्याजातश्लोक १६६०० ॥ संवत् १३२७ वर्षे भाद्रपद वदि २ रवावद्येह **वीजापुरे** ॥

श्री शां० ज्ञान भं० खंभात.

श्रीदशाश्रुतस्कंधचूर्णिः ता. प्र. ७४

संवत् १३२८ वर्षे आषाढ शुदि १२ गुरावद्येह **पयरोदु**ग्रामवास्तव्य ठ० **चंड**सुत ठ० **लक्ष्मणेन** दशाश्रुतस्कंधस्य चूर्णिर्लिखिता ॥ मंगलं महाश्रीः । शुभं भवतु लेखकपाठकयोः

श्री शां० ज्ञान भं० खंभात.

श्रीउत्तराध्ययनलघुवृत्तिः ता. प्र. ७५

संवत् १२९६ चैत्र वदि १० सोमे बभूव सूतला....वेत्त(वण्यवेधाः) **प्राग्वाट** वंशजः ।
शिष्टाचाररतः श्रेष्ठी **धीनाको** नामसंयतः (सन्नयः) ॥ १ ॥

तत् कलत्रं तु **पद्मश्रीः रामश्री**रिव केवला ।
अभवत् **पासचंद्रा**ख्यस्तयोः सूनुः सुधार्मिकः । ॥ २ ॥

पौत्रस्तु **गुणपाला**ख्यो **धीनाकः** श्रेष्ठि अथान्यदा ।
श्री**देवेंद्र**मुनींद्रस्य देशनामश्रृणोदिति ॥ ३ ॥

ज्ञानाभयोपग्रहदानभेदाद्दानं त्रिधा सर्वविदो वदंति ।
तत्रापि तीर्थात्रुटिकारणेन सुज्ञानदानं प्रवरं वदंति ॥ ४ ॥

कालादिदोषान् मतिमांद्यतश्च तन्नो भवेत् पुस्तकमंतरेण ।
चलश्रिया शाश्वतसौख्यकारि तल्लेखनं युक्तमतः सतां हि ॥ ५ ॥

श्रुत्वेति श्रेष्ठी **धीनाकः** स्वश्रेयोऽर्थमलेखयत् ।
पुण्यं श्रीउत्तराध्यायलघुसद्वृत्तिपुस्तकं ॥ ६ ॥

यावत्........वाच्यमाना विदुषां समूहैः ॥

श्री शां० ज्ञान भं० खंभात.

श्रीतत्त्वार्थसूत्रं मूलं, वृत्तिः भाष्यसहितम् ता. प्र. ७६

संवत् १४४५ वर्षे अश्विन शुदि ४ गुरौ अद्येह श्रीस्तंभतीर्थे तत्त्वार्थभाष्येण तत्त्वार्थवृत्तिपुस्तकेन लिखिता ॥ शुभं भवतु श्रीश्रमणसंघस्य ॥

श्री शां० ज्ञान भं० खंभात.

श्रीत्रिषष्टीयचरित्रम् ता. प्र. ७७

(अष्टमपर्वः)

समस्तनिर्ग्रंथचक्रचूडामणिश्री **कृष्णराजर्षि**गच्छे सुविहितशिरोमणिश्री**पद्मचंद्रो**पाध्यायान्वये भट्टारकश्री**पृथ्वीचंद्र**सूरयस्तत्पपट्टांबरदिनकरश्री**प्रभानंदसूरीणां** सदुपदेशेन समस्तपृथ्वीतलाख्ये(ख्यात) **सुचिंतित**गोत्रपवित्रिते सा० **क्षेमंधरपुत्रः** सा० **धनचंद्र मुनिचन्द्र देपाला**भिधाः **धनचन्द्रसुतौ षीमसींह काला**भिधौ । **मुनिचन्द्रसुताः** छीहिल नोल्हू सीमसीह हालाभिधाः । **षीमसींह**पुत्रौ **लाहड नरपालौ, सोमसींह**पुत्राः सा० **धरणिग आसपाल दूल्हण काल्ह पार्श्वाभिधानाः तैः** सद्गुरूणामुपदेशलेशं निशम्य संसारासारतां विचार्य संवत १३९१ वर्षे स्वमातुः **सोमश्री**श्रेयोऽर्थं गृहीतमिदं नंदतादाचंद्रार्कं वाचकग्राहकैः सदा ।

श्री शां० ज्ञान भं० खंभात.

श्रीओघनिर्युक्तिः ता. प्र. ७८

संवत् १२८४ वर्षे फाल्गुनामावस्यां सोमे अद्येह श्री**मदाघाटदुर्गे** समस्तराजावलीसमलंकृतमहाराजाधिराजाधिराज श्री**जैत्रसिंहदेवः** कल्याणविजयराज्ये तन्नियुक्त महामात्य श्री**जगत्सिंहे** समस्तमुद्राव्यापारान् परिपंथयतीत्येवं काले प्रवर्त्तमाने सा० **उद्धरसूनुना** समस्तसिद्धांतोद्धारकैः धुरंधरेण विशुद्धसिद्धांतश्रवणसमुद्भूतप्रभूतश्रद्धातिरेकेण परमार्हत सा० **हेमचन्द्रेण** दशवैकालिक-पाक्षिकसूत्र–ओघनिर्युक्त–सूत्र पुस्तिका लेखिता लिखिता, च ठ०**साहड**सुत श्रवणोपासक ठ० **महिलण** सुत **खेमसिंहेन** । शिवमस्तु सर्वजगतः ।

श्री शां० ज्ञान भं० खंभात.

श्रीमहावीरचरित्रम् ता. प्र. ७९

संवत् ११९७ आसोय वदि १० दिने मघानक्षत्रे शुक्रयोगे च महावीरचरितं लिखितं ॥

श्री शां० ज्ञान भं० खंभात.

श्रीउपदेशमालादिप्रकरणानि ता. प्र. ८०

संवत् १३०८ वर्षे वैशाख शुदि १४ बुधे गुणदा **धारुभ्यां महणू** पुत्रिकया आत्मश्रेयोऽर्थं प्रकरणपुस्तिका ठ० **देवशर्म्म**पार्श्वे लेखिता इति भद्रं ॥

श्री शां० ज्ञान भं० खंभात.

श्रीआवश्यकटिप्पनकम् ता. प्र. ८१

संवत् १२९७ वैशाख(?) वर्षे मार्ग वदि १ शनिवारे आवश्यकटिप्पनपुस्तिका ठ० **आसपाल**योग्यो ॥

श्री शां० ज्ञान भं० खंभात.

श्रीशतपदिका ता. प्र. ८२

प्रशस्तिः—इयं च विक्रमाद् गुणरस (रवि) संख्ये वर्षे १२६३ **श्रीमदार्यरक्षितसूरि**शिष्याणां श्री**मज्जयसिंहसूरीणां** पट्टालंकृतिकर्तृभिः **धर्म्मघोषसूरि**भिर्विदब्धा ततश्च तामतिगंभीरार्थत्वात् व्युत्पन्नमतीनामेव सुखावबोधां तदितरेषां तु किंचिदायासगम्यामेव ततस्तेषामवगम्य श्री**धर्म्मघोषसूरीणां** श्रुतांतेवासिभिरपि तत्पदब्धतिब्धितैः (? . . . .) श्री**महेन्द्रसिंह**सूरिभिर्विक्रमादुदधिग्रहसूर्यसंख्ये संवत्सरे १२९४ सैव ग्रंथपद्धतिः कचिदाधानं कचिदुद्धरणं कचित्क्रमविरचनां च विधाय कानि .... वधिकान्यपि प्रश्नोत्तराणि प्रक्षिप्य सुकुमारमतीनामपि सुखावबोधा भवत्विति किंचिद्विस्तरवती विदधे ॥ छ ॥ भद्रमस्तु चतुर्विधसंघस्य .... ग्रंथाग्रं ५२०० इति शतपदिकाभिधाना प्रश्नोत्तरपद्धतिः समाप्ता ॥

८०९१ श्री शांतिनाथजी ज्ञान भंडार. खंभात.

ज्ञाताधर्म्मकथासूत्रवृत्तिः ता. प्र. ८३

प्रशस्तिः ॥ संवत् १८८४ माघ सुदि १ रवौ अद्येह श्री**मदणहिलपाटके** महाराजाधिराजश्री **विजयसिंघदेवकल्याण**विजयराज्ये ज्ञाताधर्मकथाद्यंगवृत्तिर्लिखितेति ॥

श्री शां० ज्ञान भं० खंभात.

श्रीनंदिअध्ययनटीका (मलयगिरीया) ता. प्र. ८४

सं. १२९२ वर्षे वैशाख शुदि १३ अद्यह **वीजापूरे** श्रावकपौषधशालायां श्री**देवभद्रगणि**-

पं० मलयकीर्ति पं० अजितप्रभगणिप्रभृतीनां व्याख्यानतः संसारासारतां विचिंत्य सर्वज्ञोक्तशास्त्रं प्रमाणमिति मनसि ज्ञात्वा सा० धणपालसुत सा० रत्नपाल ठ० गजस्तत् (सूत) ठ० विजयपाल श्रे० दल्हासुत श्रे० वील्हण महं० जिणदेव महं०वीकल सुत ठ० आसपाल श्रे० सोल्हा ठ० सहजासुत ठ० अरसीह सा० राहडसुत सा० लाहडप्रभृतिसमस्तश्रावकैर्मोक्षफलप्रार्थकैः समस्त-चतुर्विधसंघस्य पठनार्थं वाचनार्थं च समर्पणाय लिखापितं

श्री शां० ज्ञान भं० खंभात.

श्रीसिद्धजयन्तीचरित्रम् ता. प्र. ८५

स्वस्ति श्रीविक्रमनरेंद्र संवत १२६१ वर्षे अश्विन वदि ७ रवौ पुष्य नक्षत्रे शुभयोगे श्री-मदणहिलपाटके महाराजाधिराज श्रीभीमदेव कल्याणविजयराज्ये प्रवर्त्तमाने श्रीप्राग्वाटज्ञातीयश्रेष्ठि-धवलमरुपुत्र्या ठ० नाउ श्राविकया आत्मश्रेयोऽर्थं पंडितमुंजालहस्तेन मुंकुशिकास्थाने जयंतिवृत्ति-पुस्तकं लेखयित्वा श्रीअजितदेवसूरीणां निजभक्त्या समर्पितमिति ॥ शुभं भवतु ॥ मंगलमस्तु ॥ मंगलं महाश्रीः ॥

श्री शां० ज्ञान भं० खंभात.

श्रीउपदेशमालाविवरणम् ता. प्र. ८६

संवत् १३८३ वर्षे कार्तिक सुदि १३ शनौ अद्येह श्रीदेवगिरौ साधु राजसींह सूतसाधु विहु(यण)सिंहेन श्रीमदुपदेशमालालघुवृत्तिपुस्तिका लिखापिता । यादृशं........मंगलमस्तु....

श्री शां० ज्ञान भं० खंभात.

श्रीलिंगानुशासनम् ता. प्र. ८७

संवत् १२८७ वर्षे वैशाख सूदि गुरावद्येह वीजापुरीयश्रावकपौषधशालायां पूज्यश्री-देवेंद्रसूरिविजयचंद्रसूरि उपाध्याय श्रीदेवभद्रगणिसद्गुरूणां धर्मोपदेशतः सा० रत्नपाल सा० लाहड श्रे० वील्हण ठ० आसपाल सूत्रपुस्तिका लिखापिता.

श्री शां० ज्ञान भं० खंभात,

श्रीसिद्धांतोद्धारद्वितीयखंडः ता. प्र. ८८

प्रशस्तिः—संवत् १२१२ आषाढ वदि १२ गुरौ लिखितेयं सिद्धांतोद्धारपुस्तिका लेखक-देवप्रसादेनेति ॥ ग्रंथाग्रं १६७० द्वितीयखंडे ॥

श्री शां० ज्ञान भं० खंभात.

श्रीकल्पसूत्रम् ता. प्र. ८९

ओकेशवंश: प्रवरो विभाति सर्वेषु वंशेषु रमाप्रधानः ।
तस्मिन् सुगोत्रं प्रवरं प्रशस्यते नाम्ना महत्याः **जाहडा**भिधानं ॥ २ ॥
क्षत्रियवंशः पूर्वं श्री**राष्ट्रकूट**इतिनाम्ना । श्री **जयचंद्रो** राजा ॥

श्री शां० ज्ञान भं० खंभात.

श्रीकल्पसूत्रम् ता. प्र. ९०

संवत् १२४७ वर्षे आषाढ सुदि ९ बुधेऽद्येह श्री **भृगुकच्छे** समस्तराजावलीविराजित-महाराजधिराज—उमापतिवरलब्धप्रसाद जंगमजनार्दनप्रतापचतुर्भुज श्री**मद्भीमदेव**कल्याणविजय-राज्ये एतत्प्रसादावाप्तश्री**लाटदेशे** निरूपितदंड श्री**शोभनदेवे** अस्य निरूपणया मुद्राव्यापारे **रत्नसिंह**प्रतिपत्तौ इह श्री**भृगुकच्छे** श्रीमदाचार्य**विजयसिंहसूरि**पट्टोद्धारणश्रीमज्जिनशासनसमुच्चय-आदेशनामृतपयःप्रपापालक आबाधजनपथिकाज्ञानश्रमपीलित (?) कर्णपुटपेयपरममोक्षास्पद-विश्रामश्रीमदाचार्यश्री**पद्मदेवसूरि**शिष्याणां हेतोः परमार्थमंडपपर्यूषणाकल्पं पं० **साजणेन** लिखितेति ॥ मंगलं । महाश्रीः ॥ ग्रं. २२०० ॥

श्री शां० ज्ञान भं० खंभात.

श्रीकर्मग्रंथः सवृत्तिः ता. प्र. ९१

संवत् १४४७ वर्षे भट्टारक **देवसुंदर**सूर्युपदेशेन कर्मग्रंथवृत्तिपुस्तकं लेखयामास ॥

श्री शां० ज्ञान भं० खंभात.

श्रीनिर्भयभीमनामा व्यायोगः ता. प्र. ९२

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोखो[षो] न दीयते ॥

सं. १३०६ वर्षे भाद्रवा वदि ६ रवावद्येह श्रीमहाराजकुलश्री**उदयसिंहदेव**कल्याणवि-जयराज्ये निर्भयभीमनामा व्यायोगो लिखित इति शुभं भवतु.

श्री शां० ज्ञान भं० खंभात.

त्रिषष्टीयचरित्रेदशमंपर्वः ता. प्र. ९३

प्रशस्तिः ॥ संवत् १३२४ वर्षे मार्ग वदि १३ रवावद्येह श्री **मदुज्जय[यि] न्यां** श्री-महावीरचरितपुस्तकं सा. **देवसिंहेन** मातुः श्रेयोऽर्थं लिखापितम् ॥

श्री शां० ज्ञान भं० खंभात.

श्रीप्रज्ञापना वृत्तिः ता. प्र. ९४

इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां षट्त्रिंशत्तमं पदं समर्थितं ॥ समर्थिता प्रज्ञापना टीका ॥ शुभं भवतु समस्तसंघस्य ॥ मंगलं महाश्रीः ॥ संवत् १३८७ वर्षे वैशाष वदि १५ गुरौ श्री **स्थंभतीर्थे** प्रज्ञापनाटीकापुस्तकं लिखितं ॥

श्री संघवी पाडा जैन ज्ञान भंडार पाटण.

श्रीकल्पसूत्रम् ता. प्र. ९५

पृथक् (?) ५ पक्ष २ यक्षादि १३ श्रेष्ठि **प्रद्युम्नः** कथां व्यधात् ॥
प्रार्थितो मोढगुरुणा **श्रीहरिप्रभसूरिणा** ॥ ७४ ॥
कालिकसूरिकथा समाप्ता ॥ छ ॥ छ ॥ शुभं भवतु ॥
॥ र्५० ॥ श्रियो गृहे **घोषपुरीयगच्छे** सूरिः **प्रभाणंद** इति प्रकृष्टः ।
बभूव पूर्व्वं गुणरत्नखानिः सुचारुचारित्रपवित्रगात्रः ॥ १ ॥
विजयचंद्रगुरुः प्रवरो गुणी श्रुतमहोदधिरस्य पदेऽभवत् ।
अखिलधर्म्मसुकर्म्मविधायको गुरुरिव प्रतिभाति विचक्षणः ॥ २ ॥
तत्पट्टपूर्वाचलमौलिभानुर्दुर्वारमाररिपुशातनपंडितो यः ॥
श्री**भावदेवः** प्रबभूव सूरिः पदे तदीये श्रुतशीलयुक्तः ॥ ३ ॥
ततो जराभीरुजयी समस्ति **जयप्रभः** सूरिवरोऽस्य पट्टे ।
अर्कः प्रतापेन च चंद्रमाऽसौ कलाकलापेन बुधस्तु बुद्ध्या ॥ ४ ॥
हुडाद्रेडपुरेऽप्यस्ति श्रीमान् पार्श्वजिनेश्वरः ।
तस्य गोष्ठीपदे ख्यातो वंश एष प्रकीर्त्यते ॥ १ ॥
प्राग्वाटवंशे भुवनावंतसे विख्यातनामाऽजनि **चारुपलः** ॥
तद्गेहिनी **जासलदेवी** नाम्नी तत्कुक्षिजातास्तनयास्त्रयोऽमी ॥ २ ॥
सर्व्वलक्षणसंपूर्णाः सर्व्वधर्म्मसमन्विताः । **सहदेवश्च पेताकोऽलषमाकः** सहोदराः ॥ ३ ॥
सहदेवस्य च पत्न्याः **नागलदेव्याः** सुतौ शुभौ जातौ । **आमाहूवौ** विख्यातौ धर्म्मधुराभारवाहनदक्षौ ॥
आमाकपत्नी जिनधर्म्मतत्परा **रंभा** सुशीला सुगुणा सुवंशजा ।
तत्कुक्षिजातास्तनयास्त्रयो वरा धर्म्मार्थकामा इव जंगमा भुवि ॥ ५ ॥
सुहुणा पूनाकेन च हरदेव समन्वितेन पुण्यवती ।
मातुः श्रियोऽर्थं प्रददौ कल्पस्य पुस्तिका गुरवे ॥ ६ ॥

श्री सं. पा. जै. ज्ञान भंडार पाटण

श्रीभगवतीसूत्रवृत्तिः ता. प्र. ९६

(श्रीद्वादशांगहिमरसा(वास)समुद्रतुल्याः । कल्याणपंकजविकाशनभानुभासः ।
अज्ञानदुस्तरसरसा(तमो)भरदीपिकाभा विश्वं पुनंस्तु भुविवीरजिनस्य वाचः ॥१॥
शास्त्र फूरस्य वा सिंहा (:) श्रित—) सुकृतिमनःकंदरः स्थैर्य सारः ।
(भव(स्फू)र्जकीर्तिचूलो विनय (नय) शमास्त (तुल्य) रत्नाभिरामः ।
(दानाद्यैः शुद्धधर्मैः प्रवरवनवृतः श्रीसमिद्धः पृथिव्यामस्ति प्राग्वाट-
वंशस्त्रिदशागिरिरिवानेकसत्कृत्यशृंगः ॥ २ ॥
(योऽचीकरन्मंडपनाम तुरम्य (पुर्यां) वल्लीभिधाराहपि (लक्ष्मीभिरारायथि) तुं सुकर्म्मा ॥
ग्रामे च संडेरकनाम्नि वीरचित्तो चैत्ये (जनश्रेष्ठतमः) जनि श्रेष्ठी सामा (समा) ख्य ॥३॥
मोहिनी नाम तत्पत्नी, च मकार (करी तयोः)
यशो नागो धर्मधुर्यः वाग्धनः शुद्धदर्शनः ॥ ४ ॥
मल्हादनो जाल्हणश्च; गुणिनोऽमी तनूद्भवाः ।
वाग्धनस्य गृहिण्यासीत्, **सीता** सम्यक्त्वशीलभाक् ॥ ५ ॥
तत्कुक्षिभूरभूत्पुत्रश्चोडसिंहो विशुद्धधीः ।
सद्धर्मकर्म्मनिरतो, विजयी पूज्यपूजकः ॥ ६ ॥
पंच पुत्र्योऽभवन् **खेत्ती मूंजाला रत्नदेव्यथ** । मयणीली....(तथा) सर्घा मंगला धर्मकर्मभिः ॥७॥
इतश्च—**वीजा**भिधोऽभवन्मंत्री, **खेत्ती** नाम्नी तत्प्रिया ।
तत्पुत्री **गोगठ**विती, पुण्यकर्मसु सोद्यमा ॥ ८ ॥
(तामूढवाश्चोडसिंहस्तत्तनूजा गुणोज्ज्वलाः ।
आद्यः **पृथीभटो** धीमान्, **रत्नसिंहो** द्वितीयकः ॥ ९ ॥
वदान्यामरसिंहश्च तुर्यो मल्लस्सुविक्रमी । विवेकी **विक्रमसिंहह**ऽग्रु....जीयः ॥ १० ॥
मूंजालश्चेत्यमीषां तु, कल्पः यो (कनीयांस्तु) कृतोद्यमः ।
सुसाखो (श्च) रतो धर्मे, पत्न्यश्चेषां क्रमादिमाः....
सूहवदेवी सुहागदेव्यपरा निपुणा **नयणदेवी प्रतापदेव्य** (धीमता) ॥ १२ ॥
भादल चांपलदेवी पुरवाचाढ्य रायणा ।
असौ च पुत्राः पुत्र्यश्चाभूवन् भाग्यभरांविताः ॥ १३ ॥
श्रेष्टि....**पोधनस्य**....वृद्धि मुपेयुषि । श्री**रत्नसिंह सूरीणां** पार्श्वे शुश्राव देशनां ॥ १४ ॥
पेथड प्रवराचारः प्रयुक्तः....धुभि**हानकस्य** सदाभक्तादि....धर्मगुणार्जने ॥ १५ ॥
दातं धनं स्योत समस्तिलोके....पुनस्तु कथितं जिनेंद्रैः तत्रापि सिद्धांत....॥१६॥

इत्याकर्ण्य सांगा....भृंगावली तुल्यदेवमलीलिखत् भगवतीसूत्र सटीक मूढा ॥

श्रीसिद्धांतविचारसारः....पेथडः ॥ १७ ॥

वेदबाणहुताशेंदु (मिते) विक्रमवत्सरे (१३५४) ।

(सत्) पुस्तक (स्य) व्याख्यानं, कारयामास यः पितुः ॥ १८ ॥

तिर्य्यं—सौ युवराजतां सचिवतामारोप्य जीवे कवै ।

च्छायाक्ष्मा सुतायाः पुरावन पदं सल्लेखककत्वं बुधो गाव्यतारकः प्रकाशतां ॥ १९ ॥

संवत १३५३ वर्षे अद्येह बीजापुरे सोमतिलकसूरिभिः श्रीभगवतिसूत्रपुस्तकं व्याख्यातं । वाचितं. पं. हर्षकीर्तिगणिना शुभं भवतु ॥ श्रीसकलसंघस्य ॥

श्री सं. पा. जै. ज्ञानभंडार पाटण

श्रीसूक्तरत्नाकरः ता. प्र. ९२

॥ र्ष० ॥ सुपर्व सवल्लीतुंगः, शाखाशतसमावृतः ॥

श्रीमान्श्रीमालवंशोऽस्ति, सर्वत्रापि प्रमाणकृत ॥ १ ॥

श्रेष्ठी जयंत इत्यासीत्तत्र मुक्तामणेः समः, पोती नाम्नी च तत्पत्नी, गेहलक्ष्मीरिवांगिनी ॥३॥

श्रीसंघकृत्यधौरेयाः, सदासम्यक्त्वशालिनः ॥ तत्पुत्राः क्रमतोऽभूवन् गुरुभक्तिभृतो ह्यमी ॥४॥

विद्वान् महणनामाद्यो, मदनाख्यो महत्तमः । सामंतो झांझणाख्यश्च, लाडणोऽनल्पवासनः ॥५॥

वयज्जा-तेजीच मृते सुदुस्तपनपोदचिते । लाडणस्य तु ललतादेवीति दयिताऽभवत् ॥६॥

तत्सुता अरिसिंहाख्या, एवं वंशो विवर्द्धते । श्रीरत्नसिंहसुगुरोर्लाडणो धर्ममश्रृणोत ॥७॥

ततः स्वस्यैव पुण्यार्थी, सूक्तरत्नाकरस्य तु । चतस्रः पुस्तिकाः पुण्या, लेखयामास लाडणः ॥८॥

द्योतिर्मुक्तावतंसा गंभिरजनिकरस्फारताडंकपत्रा, ज्योत्स्नाल्कमांगरागा जलनिधिवसना स्वर्नदीहारयष्टिः॥ यावन्नर्नर्ति कीर्तिश्वरमजिनपतेर्विश्वरंगेऽत्र तावत् , मंदव्याख्याननादैः कलयतु तुलनां कंबुजैः पुस्तकोऽयं ॥छ॥ सं.१३४७ वर्षे अषाढ वदि ९ गुरौ आशापल्यां महं वीरसेन श्रीसूक्तरत्नाकरपुस्तिका लिखिता ।कल्याणमस्तु ॥

श्री सं. पा. जै. ज्ञानभंडार पाटण

श्री उपमितिभवप्रपंचकथा ता. प्र. ९३

॥र्ष०॥ श्रीमंतस्ते सतां संतु तीर्थेशा ! स्वस्तिकारणं ॥अपारभवकांतारसमुत्तारितजंतवारित, . तव॥१॥

पल्लीवाल इति ख्यातो वंशः पर्वोदितोदितः ॥

सोऽस्ति स्वस्तिकरो धात्र्यां, यत्र कीर्तिर्ध्वजायते ॥ २ ॥

प्र (पुत्रः प) वित्रोऽभाद्वंशे(तत्र)मुक्तोफलोज्ज्वलः। **वीकलाख्य** इति श्रेष्ठी सतां हृदि गुणैः स्थितः॥३॥
तत्पत्नी रत्नदेवाति, पवित्रा पुण्यशालिनी । गुणमाणिक्यमंजूषा तुषारद्युतिशीतला ॥ ४ ॥
पुत्री त्रयोः **मूल्हणि**नामधेया, सुश्राविका शीलमती बभूव ।
या देवपूजानिरता गुरूणां, पादांबुजासेवनराजहंसी ॥ ५ ॥
पुत्र पवित्रस्तत्रासीद्वंशे मुक्ताफलोज्ज्वलः ।
योगदेव (इति)....श्रेष्ठी सतां हृदि गुणैः स्थितः ॥ ६ ॥
आम्रदेवश्च वीरश्च तनयौ समयौ ततः ।
कर्पद्यामाकसाढाकाः, वीरपुत्रास्त्रयोऽभवन् ॥ ७ ॥
साढाकस्य ततो जज्ञे, पुत्र**श्चांद्रकुमारकः** ।
परोपकारदाक्षिण्यगांभीर्यविधिसेवरूधिः ॥ ८ ॥
जयतीत्याख्यया जज्ञे, गेहिनी तस्य(भूः)सत्य....तत्सुतः **पासडो** जज्ञे, **धांइरूपी** सुते तथा ॥९॥
ततः सत्पुण्यपात्रस्य, पवित्रस्य महात्मनः । **पासड**स्याभवत्पत्नीऽ**पातू**रिति (पवित्रवाक्)॥ १० ॥
तस्याः पुत्रास्त्रयो जाताः, पुमर्था इव जंगमाः । जगत्सिंहो **वज्रसिंहः**, तथा **मघनसिंहकः** ॥११॥
माल्हणिर्जगत्सिंहस्य भवत् सद्धर्मचारिणी । **सुल्हणि**र्वज्रसिंहस्य, बभूव प्रेयसी ततः ॥ १२ ॥
श्रीपूज्यो**दयचंद्राणां** पदस्योद्योतकारिणां। श्रीदेव**सूरीणा**मुपदेशेन भक्तिभाक् ॥ १३ ॥
मूल्हणिश्राविका सेयं, कुर्वाणा धर्मसंग्रहं । श्री**जयदेवसूरीणां**, विशेषाद्भक्तिशालिनी ॥ १४ ॥
(उपमितिभवप्रपंच)–स्योद्धारस्यात्र मुक्तिकामिता । साक्षात् स्वश्वश्रूणां श्रेयोऽर्थं लेखयामास ॥१५॥
यावद....तावद ॥ शुभमस्तु श्रीश्रमणसंघस्य ॥ मंगलं महाश्रीरिति ॥

श्री सं. पा. जै. ज्ञानभंडार पाटण

श्रीपच्चक्खाणसूत्रवम् ता. प्र. ९४

संवत् १३४३ वर्षे अश्विन वदि ४ भोमे ॥
श्रीपत्तनाख्ये नगरे गरिष्ठे, वर्षेऽग्निवार्ध्यैबुधिचंद्रसंख्ये (१४४३)
एतन्महाशास्त्रमनुद्रतोऽयं, लिलेख दक्षो द्विज**नागशर्मा** ॥ १ ॥
प्राग्वाटवंशे प्रवरे पृथिव्यां **देदा**वरः............ ।
वसाभिधानश्च तदंगजन्मा, तस्यापि **पोषे**त्यभिधस्तनूजः ॥ १ ॥
तस्य च **तेजलदेवी** जाया पुत्रश्च **मलयसिंहा**ख्यः ।
यो देवगुरुषु भक्तो **गेरंडकनगर**मुख्यतमः ॥ २ ॥
तस्य च भार्या **साकु**र्धर्मासक्ता सुशीलसंयुक्ता ।
यस्याश्च **मलयसिंहो मोहणदेवी** च खलु पितरौ ॥ ३ ॥

तस्याश्च पंच तनया जूठिलसारंगजयतसिंहाख्याः ।

सहिताश्च षेतसिंहाभिधमेघाभ्यां च सुगुणाभ्यां ॥ ४ ॥

पुत्र्यस्तथा चदेकुः सारुधरणूष्ठभूश्च पांचूश्च ।

रुडीमातूनाम्नी सप्तैताः (?) सुशीलगुणयुक्ताः ॥ ५ ॥

श्रीमत्तपागणाधिपसूरिश्रीदेवसुंदरगुरूणां ।

उपदेशतोऽथ सम्यग् धर्माधर्म्मौ परिज्ञाय ॥ ६ ॥

साकु सुश्राविका सौवपुत्रपुत्रीपरिवृता ।

पितृर्मेलयसिंहस्य, श्रेयसे शुद्धवासना ॥ ७ ॥

ज्योतिःकरण्डवृर्त्ति तीर्थकल्पांश्च भूरिशः ।

चैत्यवंदनचूर्ण्यादि, श्रीताडपुस्तकत्रयाम् ॥ ८ ॥

पत्तनेऽणहिल्लछोने(पाटाख्ये),वार्धिवार्ध्यब्धिभूमिते १४४४। वत्सरे लेखयामास नागशर्म्मद्विजन्मा ॥९॥

एषा संबंधिना मोषाभिधश्राद्धेन धीमता ।

पातीदेदीतनूजेन लेखितेयं सुपुस्तिका, ॥ १० ॥ छ ॥ छ ॥ श्री ॥ छ ॥

श्री सं. पा. जै. ज्ञान भंडार, पाटण.

श्रीचंद्रप्रज्ञप्तिवृत्तिः ता. प्र. ९५

ग्रंथाग्रंथ ९५०० ॥ एवं संवत् १४ आषाढादि ८१ वर्षे भाद्रपद वदि १ शनौ ॥ॐ नमः॥

श्रीश्रीमालकुले तेजामंत्री वानूश्च तत्प्रिया ॥ आसंस्तत्तनया मेलामेघासेगाह्वयास्त्रयः ॥ १ ॥

तेषां डाहीधर्मिणीकांऊनाम्न्यः क्रमादिमाः पत्न्यः ।

मेलापुत्रागोरासांइआरामदेवचांगाख्याः ॥ २ ॥

इतश्च मेघादयिता धर्मिणी धर्मसत्कथा ॥ घोघानगरवास्तव्यमंत्रिसिंघातनूद्भवा ॥ ३ ॥

कडुआधांगाबंधुप्रभृतिकुटुंबान्विता सुधर्मरता । श्रीमज्जैनेंद्रागमभक्तिभरोल्लसितचेतस्का ॥ ४ ॥

तपाधिपश्रीगुरुसोमसुंदरोपदेशतस्त्र्यष्टद्वियुगेंदु १४८३ वत्सरे ।

अलीलिखत् स्वस्य हिताय चंद्रप्रज्ञप्तिवृर्त्ति वरताडपुस्तके ॥ ५ ॥

श्री सं. पा. जै. ज्ञानभंडार पाटण

श्रीआवश्यकलघुवृत्तिः ता. प्र. ९६

अणहिल्लपुरमस्ति स्वस्तिकप्रायमुर्व्यां, नयविनयविवेकच्छेकलोकावरुद्धं ।

अपरनगरशोभागर्वसर्वस्वजैत्रं, वरजिनगृहमालासु(भि)र्विमानोपहासि ॥ १ ॥

श्रीश्रीपालकुलस्तत्र राजाख्यः श्रेष्ठिनोऽभवत् ।
नानादानादिसद्धर्मकर्म्मकर्म्मठमानसः ॥ २ ॥

तस्य **राजलदेवी**ति जायाऽजायत सद्गुणा ।
विवेकविनयप्रज्ञाशीलालंकारधारिणी ॥ ३ ॥

सांडा सोमा मेघा भूपति पांचाह्वयास्तयोः पंच ।
पुत्राः सुतीर्थयात्राद्यवाप्तसंघाधिपत्यपदाः ॥ ४ ॥

नामस्तवपञ्चशतीकार्योत्सर्गैकतत्परः सततम् ।
सांडाख्यः संघपति र्विशिष्य तेष्वद्भुतक्रियो जज्ञे ॥ ५ ॥

तेषां **सांडा**दीनां पंचानामपि पंच पल्योऽमूः । **कामलदेवी सिंगार**देवी **माणिक्यदेवी** च ॥ ६ ॥
भावलदेवी पाल्हणदेवी ख्याताः सुशीलतः क्रमतः ।
श्रीदेवगुरुषु भक्ताः सक्ताः सद्धर्मकर्मविधौ ॥ ७ ॥ युग्मम् ॥

सांडाकामलदेव्याः तनयाः पञ्चाभवन् क्रमादेते ।
श्रीधर्म्मकर्म्मकुशलाः सम्यक्त्वाद्यैर्गुणैः प्रथिताः ॥ ८ ॥

मनाख्यः प्रथमस्तेषां **धर्म्मणः कर्म्मण**स्तथा ।
डाहाख्यश्च चतुर्थोऽस्ति, **योधाख्यः** पंचमः पुनः ॥ ९ ॥

पुत्र्यौ तदा द्वौ गुणराजिराजिते, **पूरी**ति **वाछू**रिति विश्रुताऽखिले ।
यन्मानसं श्रीगुरुदेवभक्तियुक्, श्रीधर्मपीयूषरसेनपूरितम् ॥ १० ॥

दयिताः क्रमतस्तेषां विमलान्वयविमलशीलसंपन्नाः
रतनू-**कांकु**-**मांइ**-**गांकू**-**वाल्ही**ति-नामानः ॥ ११ ॥

मनाकस्य समधरः सालिगश्च सुतावुभौ ।
धर्मणस्य संघपतेर्**ईवाला**भिधौ पुनः ॥ १२ ॥

डाहाकस्य मांइ आद्या, **हंसा योधा गज**स्तथा ।
सर्वेऽप्यमीगुणमणिश्रेणिरोहणभूधराः ॥ १३ ॥

नानाविधान् धर्म्मविधीन् सृजन् सदा, विशुद्धधीः संघपतिः सुकर्म्मणः ।
श्रीज्ञानभक्तिं विशदां हृदादधद्, द्रव्यव्ययेन प्रचुरेण हर्षतः ॥ १४ ॥

श्रेष्ठिसाल्हाकसिंगारदेवीपुत्र्या पवित्रया ।
मांइ नाम्न्याऽनिशं शुद्धक्रियया प्रिययान्वितः ॥ १५ ॥

श्रीसोमसुंदरगुरुप्रवरोपदेशात्, स्वश्रेयसेद्विनववार्द्धि शशांकवर्षे (१४९२)
आवश्यकस्य लघुवृत्तिमलेखयत् श्रीताडीयपुस्तकवरे दृढधर्म्मभावः ॥ १६ ॥

श्रीसोमसुंदरसूरिगुरवो जयंतु ॥

श्री सं. पा. जै. ज्ञानभंडार पाटण

श्रीसम्मतितर्कवृत्तिः ता. प्र. ९७

संवत् १४४६ वर्षे फागुण शुदि १४ सोमे भट्टारकश्री**सोमतिलकसूरि**गुरूणां भंडारे महं० **ठाकुरसीहे**नालेखि ॥

प्राग्वाट ज्ञातीय सा० **पोषा** सुत सा० **महण** भार्या स० **गानी** पुत्र्या विहितश्रीयात्रादि-बहुपुण्यकृत्य सं० **हरिचंद** पितृ सा० **पारस** भगिन्या **चीलू** श्राविकया भट्टारकप्रभुश्री**देवसुंदर-सूरि**गुरूणामुपदेशेन **अभयचूला**प्रवर्तिनीपदस्थापनाश्रीतीर्थयात्राद्यर्थं समागतसं. **हरिचंदे**न सह प्राप्तया श्री**स्तंभतीर्थे** सं. १४४७ वर्षे संमतिपुस्तकं लेखितमिति, भद्रं श्रीसंघाय ॥

श्री सं. पा. जै. ज्ञानभंडार पाटण

श्रीपद्मचरित्रम् (प्राकृतं) ता. प्र. ९८

इति श्रीपद्मचरित्रे समाप्तमिति ॥ ग्रंथाग्रं १०५०० ॥ संवत् १४५८ वर्षे प्रथम भाद्रपद शुदि ८ अष्टम्यां रवौ श्रीपत्तने पद्मचरित्रं लिखितं ॥ शिवमस्तु ॥

प्राग्वाटज्ञातीयः श्रेष्ठी **वीरा**भिधः सुव्रतनिष्ठः ।
कीर्तिप्रथाप्रथिष्ठः शिष्टप्रष्ठोऽजनि गरिष्ठः ॥ १ ॥

प्रभूतपुण्यार्जनसावधानस्तस्यांगजोऽभूद् **वयजा**भिधानः ।
गुणै (य) सेकैरिह निस्समानः, परोपकारप्रथनैकतानः ॥ २ ॥

माकूसंज्ञा तस्य भार्या विधिज्ञाजज्ञे धन्याऽगण्यपुण्यप्रवीणा ।
कीर्तिस्फीता सर्वदोदारचित्ता, रेखां प्राप्ता स्त्रीषु शीलोत्तमासु ॥ ३ ॥

चत्वार एते तनयास्तदीया, जाता धनायाः सुकृतावदाताः ।
तेजाभिधो भद्रक**भीमसिंहः**, **सपूर्णसिंहो** भुवि **पद्मसिंहः** ॥ ४ ॥

सुता तथा **रूपल**नामधेया, गुणैरमेया शुभभागधेया ।
यस्याः पितृव्या ननु चडेण (अनूचानचन्द्राः) श्रीमज्ज**यानंदमुनींद्र**चंद्राः ॥५॥

आबालकालादपि पुण्यकार्यभरैकताना करुणार्द्रचित्ता ।
देवे गुरौ भक्तिमती सतो दा (दैव) सदा तपःकर्मणि कर्मठा या ॥ ६ ॥

श्रीमत्तपागणनभोऽङ्गणभानुकल्पश्री**देवसुंदर**गुरुप्रवरोपदेशात् ।
नंदेषुवारिधिशशांक (१४५९) मिते प्रतीते, संवत्सरे वहति विक्रमभूपतीये ॥ ७ ॥

श्रीमत् पद्मचरित्रं बहुना द्रविणेन लेखयित्वेदं ।
श्रीपत्तनीयकोशे निवेशयामास सा सिद्धचै: ॥ ८ ॥

मोक्षाध्वनीनसाधूनां ज्ञानसत्रोपमं परं ।
आचंद्रार्कमिदं जीयात, पुस्तकं प्राप्तदूषणं ॥ ९ ॥

॥ शुभं भवतु ॥

श्री. सं. पा. जै ज्ञा. भं. पाटण.

श्रीद्वयाश्रयमहाकाव्यं (प्रथमखंडम्) ता. प्र. ९९

इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशा-नद्वयाश्रयवृत्तावेकादशः सर्गः समाप्तः ॥

सकलप्रथमखंडग्रंथाग्रं १८१२ ॥ छ ॥ संवत १४८६ वर्षे श्री**डुंगरपुरे** राउल**श्रीगयपालदेव**विजयराज्ये श्रावण वदि १५ शुक्रदिने श्रीद्वयाश्रयवृत्तिप्रथमखंडं लिखितं **लींबाकेन** ॥ शुभं भवतु ॥ छ ॥ छ ॥ छ ॥ मंगलं महाश्रीः ॥

श्री. सं. पा. जैं. ज्ञानभंडार पाटण

श्रीद्वयाश्रयमहाकाव्यं (द्वितीयखंडम्) ता. प्र. १००

अष्टाविंशः पादः समर्थितः ॥ छ ॥ इति श्रीजिनेश्वरसूरिशिष्यलेशाभयतिलकगणिविरचितायां श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनद्वयाश्रयवृत्तौ अष्टाविंशः सर्गः समर्थितः ॥ छ ॥ संपूर्णं चेदं द्वयाश्रयमहाकाव्यं, तस्य पूर्णो च तद्वृत्तिरपीति शुभमस्तु ॥ छ ॥ द्वितीयखंडग्रंथाग्रं ८८५८ ॥ सकलग्रंथग्रंथाग्रं १७५७४ ॥ छ ॥ शुभं भवतु यादृशं.... ....मम दोषो न दीयते ॥

श्री सं. पा. जै, ज्ञानभंडार पाटण

श्रीक्रियारत्नसमुच्चयः ता. प्र. १०१

संपूर्णोऽयं क्रियारत्नसमुच्चयः ॥ ग्रन्थाग्रं सबीजकं ५७७९ ॥ छ ॥ संवत् १४९२ वर्षे श्री**पत्तननगर**वास्तव्य सं. **सांडा**भार्या **कमलदे** सुत सं. **कर्म्मणेन** भार्या **सांइ**युतेन स्वश्रेयसे स्वधनव्ययेन तपाश्री**सोमसुन्दरसूरि**गुरूणामुपदेशेन श्रीयुतः क्रियारत्नसमुच्चयो लेखितो, विबुधैर्वाच्यमानः कल्याणमस्तु श्रीः ॥

श्री सं, पा, जै, ज्ञानभंडार पाटण

श्रीपंचाशकवृत्तिः ता. प्र. १०२

संवत् १४४२ वर्षे भाद्रपद शुदि २ सोमे लिखितमिदं पुस्तकं, **श्री स्तंभतीर्थनगरे** लिखितं ॥छ॥

॥ ६० ॥ **आभू** श्रेष्ठी **पल्लीवालकुले** तत्सुतश्च **वीराकः** ।
तस्य सुतौ विदितौ जगति **महणसिंहाख्यवीजाख्यौ** ॥ १ ॥

वीजाकस्य श्रीरिति समजनि भार्या सुत्रात्रयस्तस्य,
ज्येष्ठः **कुमारपालो** द्वावनुजौ **भीममदनाख्यौ** ॥ २ ॥

आद्यस्य जाया **महणदेव्या**मंगभवात्रयः (खु)**राणिगोबाइराभि**–
स्तस्यप्तनाक (सलषाकश्च)चे तिनामतः ॥ ३ ॥

ते(षु) **राणिग**पुत्रस्य, **झांझण**स्यतनूद्भवाः ।
सलषाविजपालाख्यनिरयाजेसलसंज्ञिताः ॥ ४ ॥

सलषकस्यास्ति **खीमसिंह**संज्ञस्तनूरुहः ।
विजपालस्य पुत्रौ द्वौ, **जयसिंहो** गुणैकभूः ॥ ५ ॥

नरसिंहश्च नरियाकस्तस्य श्लाघ्यः गुणांबुधिः ।
भार्यायां **नागलदेव्यां**, जाताः संति सुतात्रयः ॥ ६ ॥

ते चैते **लखमसिंहो**, **रामसिंह**श्च **गोपालः** ।
सत्क्रियौदार्ययात्राद्यैः कृत्यैर्ये सज्जनोत्तमाः ॥ ७ ॥

वंशप्रौढो भीमस्याजनि **कर्पूरदेवी**जायायां ।
मदनस्य सरस्वत्यां **देपालाख्यो** बभूव सुतः ॥ ८ ॥

तस्याथ धर्मज्ञजनालिसीम्नो, **भीमस्य** निस्सीमगुणांबुराशेः ।
पुत्राः पवित्राचरितैकपात्रं, चत्वार आसन् विशदावदाताः ॥ ९ ॥

तेषामाद्यः **पद्म**नामा यदीयो, **धीधाख्यो**ऽभूत्सूनुरन्यूनबुद्धिः ॥
धोरेयो यो देवगुर्वादिकार्येष्वानाह्वानस्तस्य पुत्रोऽधुनाऽस्ति ॥ १० ॥

द्वितीयः **साहणो** यस्य, पौत्रोऽस्ति **कडुयाभिधः** ।
तृतीयस्तनयो जज्ञे, **समेतः संमतः** सतां ॥ ११ ॥

तुर्योऽथ सौवर्णिक (वर्ग)....वर्ण्य**सूराभिधः** सुधापेय (शुद्ध)**लसच्चरित्रः** ।
तस्य प्रिया **सूहवदे**विनाम्नी, तयोरभूतां च सुतौ गुणाढ्यौ ॥ १२ ॥

प्रथमोऽत्र **प्रथमसिंहः पाल्हणसिंहो** द्वितीयकः सूनुः।
तस्य च **पाल्हणदेव्यां लींबाआंबा**भिधौ तनयौ ॥ १३ ॥
अथ प्रथमसिंहस्य सौवर्णिकशिरोमणेः ।
प्रिया **भीमलदेवी**ति, पुण्यप्रेमपराऽजनि ॥ १४ ॥
तयोश्च तनयाः पंच सदाचारधुरंधराः ।
स्वावदातशतैर्भूमौ, सुस्थिरीकृतकीर्तयः ॥ १५ ॥
सोमा-रतन-सिंहाक-साल्हा-डुंगर-संज्ञिताः ।
तेषु **सोमा**भिधानस्य, सौम्यत्वादिगुणांबुधेः ॥ १६ ॥
भार्यायां **साजणदेव्यां**, चत्वारः संति तनयाः
सद्गुणा **नासण-वाला-गोधा-राघव** संज्ञिताः ॥ १७ ॥
रत्नो द्वितीयोऽजनि सिंहयुक्तो दानांबुशीतीकृतभूरिलोकः ।
संघाधिपत्वं विमलाचलादिश्रीतीर्थयात्राकरुणाद्यआप ॥ १८ ॥
(तत्) प्रियायां **रत्नदेव्याम**स्य पुत्रा गुणाश्रयः ।
धनः सायरनामा च **सहदेव**स्तृतीयकः ॥ १९ ॥
तृतीयकस्तस्य सुतोऽस्ति सिंहाभिधः सुधीरो नृपमानपात्रं,
गुणाःप्रभूताः प्रतिभाप्रभावा व्यधुस्तरां यत्र दृढानुबंधं ॥ २० ॥
श्रीमद्**जयानंदगुरुसूरिश्रीदेवसुन्दरगुरूणां** ।
सूरिपदमहश्चक्रे येन महान् खद्विभुवनाब्दे (१४२०) ॥ २१ ॥
तस्य च सहचारिण्यः पुण्याचरणैकमानसास्तिमस्तः (?) ।
सोपलदेवी दूल्हादेवी पूजीति विख्याताः ॥ २२ ॥
अंत्यभार्या द्वयोत्पन्नौ तस्य द्वावंगसंभवौ ।
आद्य **आसधरो** नाम **नागराजा**योद्वयोऽनुजः ॥ २३ ॥
तुर्योऽथ **साल्हाभिध** आत्मबंधुभक्तिस्वभावार्जवधैर्यभूमिः ।
तस्य प्रिया पुण्यपराऽस्ति **हीरादेवी** तयोः सप्त सुताश्च संति ॥ २४ ॥
इह देवराज-शिवराज-हेमराजश्च खींमराजश्च ।
भोजाख्यो गुणराजो वनराजश्चेति गुणभाजः ॥ २५ ॥
इतश्च—सर्वे कुटुम्बाधिपतेः **सिंहस्या**देशतस्तमालिन्यां,
स्तंभनकाधिपचैत्ये भूचतुरुदधींदुसंख्येऽब्दे (१४४१) ॥ २६ ॥
धनाकसहदेवाभ्यां चक्रे सूरिपदोत्सवः ।
श्री**ज्ञानसागराख्यानां** सूरीणां हर्षितावनिः ॥ २७ ॥

तथा सौवर्णिकश्रेष्ठश्चक्रुः सूरिपदोत्सवं ।
महर्ध्या लखमसिंहो रामसिंहश्च गोवालः ॥ २८ ॥
द्विवार्धियुगभूवर्षे (१४४२) प्रीणिताशेषभूतलं ।
श्रीकुलमंडनात्सूरिश्रीगुणरत्नसंज्ञिनां ॥ २९ ॥ युग्मं ॥
अत्र साल्हा कुटुंबस्य प्रस्तुते नामवर्णने ।
तस्य स्वजननामपि किंचिन्नामाद्यलिख्यत ॥ ३० ॥
सौवर्णिकोत्तंसस्यास्य, साल्हाभार्या विशुद्धधीः ।
शीलादिभिर्गुणैः ख्याता हीरादेवीति संज्ञिता ॥ ३१ ॥
सौवर्णिकशिरोरत्नलूंढा लाषणदेविजा ।
शत्रुंजयादियात्राभिः पुण्योपार्जनसादरा ॥ ३२ ॥

श्री सोमतिलकसूरिश्वर ॥ ....

श्री. सं, पा, जै, ज्ञा, भं, पाटण

श्रीपद्मप्रभस्वामिचरित्रम् ता. प्र. १०४

तप्पयपइट्ठिएहिं कईहिं सिरिदेवसूरिनामेहिं,
पउमप्पहस्सपहुणो चरियं रइयं कयच्छरियं ॥ ४२ ॥
वेयसरसुरपरिमयि (१२५४) वरिसे निवविक्कमस्स वरिसाउ ।
मग्गसिर सुददस मीतिहीय वारंमि तह रविणो ॥ ४३ ॥
रेवइनक्खत्तगए हिमकिरणोवरि (विरिय) भीमभीमस्स ।
चोलुक्कवंसमणिणो, निरवज्जेरज्जसमयंमि ॥ ४४ ॥
सिरि वद्धमाणनयरे ठिएण पज्जुम्नसिट्ठिवसहीए ।
सिरिपउमप्पहचरियं, पडिपुन्नमिमं मए विहियं ॥ ४५ ॥

संवत् १४७९ वर्षे वैशाष वदि ४ गुरौ इष्टदेवताभ्यो नमः ॥ छ ॥ छ ॥

॥ ९० ॥ ॐ नमः श्रीमज्जिनेश्वरविहारविराजमानं सद्धर्म्मकर्म्मठजनव्रजलब्धमानं ।
सौवश्रिया प्रतिहतान्यपुराभिमानं ख्यातं इडाद्रनगरं जयति प्रधानं ॥ १ ॥
तत्रौन्नत्यविशेषशालिनि गिरिप्राप्तप्रतिष्ठे शुभच्छा(स्था)ये पर्वशत(तैरन)स्तविभवे प्राग्वाटवंशे ध्रुवं।
लाषाह्वः प्रबभूत्र मौक्तिकमणिः सत्तद्वृत्तभावं श्रितः
श्रीमान् सज्जनमंडनं शुचिरुचिश्वासादिदोषोज्झितः ॥ २ ॥
तमो विजेतुः पुरुषोत्तमस्य सुदर्शनश्रीकलितस्य तस्य ।
पद्मासना भोगविलासदक्षा प्रिया गुणाढ्याऽजनि लक्ष्मीदेवी ॥ ३ ॥

तत्तन्निर्म्मलधर्म्मकर्म्मनिरतो धर्म्माभिधानस्तयोः
संजातस्तनयः प्रशस्यविनयः श्रीमान्निरस्ताऽनयः ।
आश्चर्यं प्रतिपद्यपि प्रतिकलं साकल्यनर्म्मल्यभाक्
यस्य स्पष्टमदीप्यतामृतरुचिर्निश्शेषलुंपत्तमाः (रूपोत्तमो) ॥ ४ ॥
षष्ठाष्टमादिकविचित्रतपोविधानव्यावर्णनाऽस्य ननु पुष्यति कामभिख्यां ।
संसारसागरतरंडमखंडभावः संसारतारणकृतं कृतवान् कृती यः ॥ ५ ॥
श्रीमान् वयस्थो दयितान्वितोऽपि च ब्रह्मव्रतं वत्सरपंचविंशतिं ।
स एष यावत्कथिकं प्रपालयन्न विस्मयं कस्य मनस्यवीविशत् ॥ ६ ॥
श्रीशक्रस्तवपंचकादिविधिना वारांश्चतुर्विंशतिं
तन्वानो जिनवंदनं प्रतिदिनं यावद्भवाभिग्रहात् ।
सम्यक्त्वय सुधीः शतत्रयमितैर्यो राजतैष्टंककै-
रंतर्मोदकगाहितैर्विहितवानुद्यापनं पुण्यवान् ॥ ७ ॥
इयं सतीचक्रशतक्रतूरतूरतुषन्निस्तुषशीलभृत्प्रिया ।
गुणा यदीया हृदयंगमाः सतां श्रयंत्यजस्रं श्रवणावतंसतां ॥ ८ ॥
इतश्च-श्रीमत्तपागणनभांगणभास्कराणां सिद्धांतवारिधिविगाहनमंदराणाम् ।
श्रीदेवसुंदरगुरूत्तमपादभाजां श्रीसोमसुंदरमुनीश्वरसूरिराजाम् ॥ ९ ॥
पीयूषदेश्यासुपदेशभारतीं निशम्य सम्यक् श्रुतभक्तिभावितः ।
ग्रंथं स लक्षद्वयमानमात्मनः पुण्याय धन्यः स्वधनेन लेखयन् ॥ १० ॥
सोमवसुमनु (१४८१) मितेब्दे श्री चित्कोशे
व्यलीलिखन्मोदात् । (श्री प्रभप्रभुचरितं पठनायेदं श्रमणसंघे).... त्रिभिर्विशेषकं ॥
यावद्व्योमातपत्रे ग्रहमणिखचिते मेरुसौवर्णदंडे
श्रीधर्म्मस्याधिभर्तुर्भ्रमति वरनभोरत्ननीराजनेयं ॥
तावत्तत्वार्थसार्थामृतरसजलधिर्नंदतात् स्वस्तिशाली,
ग्रंथोऽयं वाच्यमानः सहृदयहृदयानंदकंदांबुदश्रीः ॥ १२ ॥

छ ॥ शुभं भवतु ॥ छ ॥

श्री सं. पा. जै. ज्ञान. भं० पाटण.

श्रीधर्मसंग्रहणीवृत्तिः ता. प्र. १०५

संवत् १४३७ वर्षे आश्विनवदिप्रतिपदातिथौ शनिवारे धर्मसंग्रहणीनामग्रंथस्य पुस्तकं लिखापितमस्ति ॥

जैनत्वाव्यभिचारिभावसुभगाः सर्वेऽपि यस्मिञ्जना
स्तस्मिन् धर्मयशःसमृद्धिविशदे वंशेऽवकेशाह्वये

श्राद्धोऽभूत् **नरसिंह** इत्यभिधया साधुः प्रसिद्धः सुधा
स्तस्य प्रौढगुणा बभूव **नयणादेवी**ति विता प्रिया ॥१॥

तयोरभूवंस्तनयास्त्रयोऽमी **मूंजाल–माला–महिपाल**–संज्ञाः ।
मालाभिधस्तेषु विशेषधर्म्मा खवीकृतद्रोहकमोहगर्वः ॥२॥

पुण्याय पाणिग्रहणे निषेधी धीरः सुशीलोत्तमगेहमेधी ।
जिनेश्वरार्चादिविशिष्टनित्यानुष्ठाननिष्ठः सुकृतालिपुष्टः ॥३॥

साक्षात्तीर्थमिलातले सुविपुले चांद्रे कुले श्रीतपा–
गच्छव्योमविभूषणं वितमसस्तेजस्विताऽर्केंदुवत् ।
श्रीगच्छाधिपपूज्यसद्गुरु**जयानंदाह्वयाः** (भिधा) सूरयः
श्रीमंतो गुरु**देवसुंदर**इति ख्याताश्च सूरीश्वराः ॥४॥

तेषां गुरूणां उपदेशयोगादानं सदानंदरमानिदानं ।
विज्ञाय विज्ञो वनुते सप्तक्षेत्र्यां न्यायोपार्जिताऽऽत्मवित्तं ॥५॥

शास्त्रलेखनमिहापि हि सारं ज्ञानसत्रसदृशं यत एतत् ।
इत्यवेत्य विशदाशयवृत्तिर्धर्मसंग्रहिणिवृत्तिमिमां सः ॥६॥

साधुमल्ल इह लेखयति स्म **स्तंभतीर्थ**नगरे गरिमाढ्ये ।
भूधराग्निजलधीन्दुमितांके (१४३७)वत्सरेऽश्वयुजि निर्मलपक्षे ॥७॥

नंदतु तावद् ।

श्री सं० पा. जै. ज्ञान, भं० पाटण.

श्रीरायपसेणीसूत्रम् ता. प्र. १०६

ग्रंथाग्रं ३६५० ॥ छ ॥ शुभं भवतु ॥ छ ॥ संवत् १४७४ वर्षे मार्ग्ग शुदि ६ रवौ ॥ लिखितं विप्रेण नागशर्म्मणा श्री**मदणहिल्लपत्तने** ॥ छ ॥ शिवमस्तु सर्वजगतः ॥

प्रथिष्ठातेतिष्ठ कीर्त्तिवर तन्वतिनिष्ठः...........

प्रथमो **नरपालाख्यो धर्मसिंहो** द्वितीयकः । तार्त्तीयीकस्तु **पोना**ह्वः एते तद्भ्रातरस्त्रयः ॥२॥

लक्ष्मीश्रावकूनाम्नी पत्नी धर्मपरायणा ।
सतीमतल्लि शीलकालेऽतिशुद्धजलताल्लिका ॥३॥

श्रावकू लक्ष्मयोर्जज्ञे तनयो विनयोज्वलः
जातः श्रीमद्धर्मममोघर्माक्षुद्रधीनिधिः ॥४॥

तस्य भार्या गुणैरार्या धर्म्मकर्म्मपरायणा ।
रत्नू नाम्नी शुद्धशीला विशुद्धहृदया सदा ॥ ५ ॥

तपसाऽजित....चूलाभार्यंगसंवेगभूषणं
तेपोऽतिदुस्तपं पापंकदूषणशोषणं ॥

चिराव्याप्तपरिवषो विनयादि गुणालयः ।
विजयानंदनामास्य बंधुः साधुशिरोमणिः ॥ ८ ॥

श्रेष्ठी धर्म्माभिधो(भ्राता) धर्मकर्मठमानसः ।
अजिह्मं ब्रह्मचर्यंयो यौवनेऽप्युदचीचरत् ॥ ९ ॥

चतुर्विंशतिकृत्वो यः पंचशक्रस्तवैर्जिनान् ॥
प्रत्यहं वंदते भूरिभक्तिव्यक्तितरंगितः ॥ १० ॥

करोति प्रतिवर्षं यस्तपः संसारतारणं....
उद्यापना. ..दि सामग्रया कृतयात्रा महोत्सवौ ॥ १२ ॥

कर्म्मणो लक्ष्मणसिंहश्च प्रसिद्धौ पुण्यकर्मभिः ।
गोधालोछादि पुण्याढ्यौ संघेशौ यस्य मातुलौ ॥ १३ ॥

साधर्म्मिकाणां प्रतिसद्मरुप्यटंकान्वितं मोदकसमर्पयन्ः ।
क्षापर्व्यसमर्च्यसंघेन समं गुरुंश्च श्रीदर्शनोद्यापनमाततान ॥ १४ ॥

चैत्ये श्रीआदिदेवस्य श्रीदेवकुलपाटके ।
कुलोद्योतकरो देवकुलिकां यो व्यधापयत् ॥ १५ ॥

इतश्च श्रीतपागच्छक्षीरार्णवसुधाकराः (शशिप्रभाः) ।
जयंति गुरवः श्रीमत्सोमसुंदरसूरयः ॥ १६ ॥

तेषां गुरूणामुपदेशवाचं निशम्य सम्यग् वरवासनाढ्यः ।
स लेखयन् लक्षमितं जिनेंद्रागमं ह्यमुं पुस्तकमप्यलीलिखत् ॥१७॥

॥ छ ॥ शुभंभवतु ॥

श्री सं० पा. जै. ज्ञान भं० पाटण.

श्रीपार्श्वनाथचरित्रम् ता. प्र. १०७

इति श्रीप्रसन्नचंद्रसूरिपादसेवकश्रीदेवभद्राचार्यविरचितं पार्श्वनाथचरितं समाप्तं ॥
संवत् ११९९ वर्षे अश्विन वदि ६ रवौ
अद्येह[illegible] गोडान्वया कायस्थ कवि सेल्हण सूनुना पुस्तकं [illegible] इदं लिख्यते ॥

प्राग्वाटवंशविभूषणं व्य० अणंतो भार्या मदू सूता माझा सूतौय व्य० अभयपाल **सरवणस्य** गृहीतदीक्षास्वस्यश्रेयोऽर्थं ज्ञानाराऽधनार्थं च न्यायोपार्जितनिजद्रविणव्ययेन । तपा-गच्छगगनभास्करश्रीभट्टारकप्रमुश्री**जयानंदसूरी**णामुपदेशेन प्राकृतश्रीपार्श्वनाथचरित्रं गृहीतमस्ति संवत् १४४० वर्षे । मंगलमस्तु सर्वजगतः ।

श्री संघवी पाडा जैन ज्ञान भंडार पाटण.

श्रीशांतिनाथचरित्रम् ता. प्र. १०८

संवत् १३८४ वर्षे अश्विनि सुदि १३ सोमे अद्येह श्रीमाले बृहद्गच्छीयश्रीवादींद्र**देवसूरि**-संताने श्री**विजय....सूरि** शिष्य श्री**माणिक्यसूरि**शिष्यश्री**धर्मदेवसूरीणां** शिष्यैराज्ञापरिपालकैः श्री**वयरसेण** सूरिभिः साध्वी श्री मत्सुंदरि **विजयलक्ष्मी** सा० **पद्मलच्छि** सा० **चारितलक्ष्म्या** अभ्यर्थनया स्वश्रेयोर्थे....श्रीशांतिनाथचरित्रं सर्वेषामाचार्योपाध्याय प्रमुखसाधूनांवांचनार्थं पठनार्थं मलेखि । लिखिखे लिख्यते स्म लिखितं ॥ छ ॥ उदकानल चौरेभ्यो मूषकेभ्य....परिपालयेत् ॥छ॥ ॥छ॥ नंदतु श्रीशांतिनाथस्य चिरकालं यावत्पुस्तकं ।

श्री सं० पा० जै० ज्ञानभंडार, पाटण.

श्रीअनुयोगद्वारसूत्रं तथा वृत्तिः ता. प्र. १०९

ग्रंथाग्रं ५८८८ ॥छ॥ संवत् १४८० वर्षे कार्तिक वदि १२ रवौ महं **भीमासुत हरिदासेन** लिखितं । शुभं भवतु कल्याणमस्तु । मंगलमस्तु श्रीसंघस्य भद्रं भूयात् श्रीः ॥ छ ॥ श्रीः (पछीथी नंदीसूत्र प्रमाणे छे.*)

श्री सं० पा० जै० ज्ञान भं० पाटण.

श्रीपार्श्वनाथचरित्रम्

ग्रंथसंख्या ६०७४ ॥ छ ॥ संवत् १४३६ वर्षे पौष सुदि ६ गुरौ श्रीपार्श्वनाथचरित्र-पुस्तकं लिखापितमस्ति ॥ छ ॥

श्रीअर्बुदाभिधमहीधरपार्श्ववर्त्ती ग्रामोऽस्ति **दियवराभिधयानां** प्रसिद्धः ॥
श्रीवर्द्धमानजिननायकतुंग शृंग प्रासादराजपरिभावितभूमिभागः ॥ १ ॥

---

* पाटण श्री संघवी पाडाना जैन ज्ञान भंडारनी श्री दशवैकालिकवृत्ति तथा कल्प भाष्य नामनी बीजी बे प्रतोमां पण उपर प्रमाणे प्रशस्ति छे. अनुसंधान माटे जुओ ता. प्र. ११३ पानुं ७४-७५-७६

तत्रास्ते रणसिंहः सुश्रुद्धः श्राद्धधर्मधौरेयः ।
धार्मिकमतल्लिका सोऽन्यदैवमशृणोत् सुगुरुवाक्यं ॥ २ ॥

न ते नरा दुर्गतिमाप्नुवंति, न मूकतां नैव जडस्वभावं ।
भवांधतां बुद्धिविहीनतां च, ये लेखयंति हि जिनस्य वाक्यं ॥ ३ ॥

निजवित्तस्य साफल्यकृते ज्ञानावृतेर्भिदे । सत तो लेखयामास श्रीपार्श्वनाथचरितं मुदा ॥ ४ ॥छ॥

॥ छ ॥ श्रे० **वीरा आल्हू** सुतेन धार्मि**करणसिंहेन** श्रीतपागच्छगगनभास्करश्री**देवेंद्रसूरि**-तत्पट्टालंकरणश्री**विद्यानंदसूरि** तत्प० श्री**धर्मघोषसूरि**तत्प० श्री**सोमप्रभसूरि**तत्प० श्री**विमलप्रभसूरि** ॥ १ ॥ श्री**परमाणंदसूरि** ॥ २ ॥ श्री**पद्मतिलकसूरि** ॥ ३ ॥ जगद्विख्यातश्री**सोमतिलकसूरि**तत्प० श्री**चंद्रशेखरसूरि** श्री**जयानंदसूरि**चरणकमलचंचरीकाणां सांप्रतं गच्छनायकभट्टारक प्रभुश्री**देवसुंदरसूरिवराणां** श्री**ज्ञानसागरसूरि** श्री**कुलमंडनसूरि** श्री**गुणरत्नसूरि** महोपाध्याय श्री**देवशेषरगणि** पं० **देवप्रभगणि** पं० **देवमंगलगणि** प्रमुखपरिवारसहितानां, श्रीसंघसभामध्ये व्याख्यानार्थं श्री**पत्तनीय** सं. **सोमर्षि** सं० **प्रथमादि** श्रीसंघस्य लेखयित्वा समर्पितम् ॥ छ ॥

श्री सं० पा० जै० ज्ञान भं० पाटण.

श्रीपार्श्वनाथचरित्रम् ता. प्र. १११

सम्वत् त्रयोदश षड्डुत्तर वर्षे आषाढ सुदी द्वितीया शुक्रवारेण **सम्वी**ग्रामे हुव० **नागार्जुन** सुत **लुणाकेन** श्रीपार्श्वनाथचरित्रपरिपूर्णपुस्तकं सावकनेन लिखितं ॥ भग्नपृष्ठी.......... ....यत्नेन प्रतिपालयेत् ॥ १ ॥ यादृशं..................मम दोषो न दीयते ॥ २ ॥ ॥ छ ॥ कल्याणमस्तु लेखकपाठकयोः

श्री सं० पा० जै० ज्ञान भं० पाटण.

श्री शांतिनाथ चरित्रम् ता. प्र. ११२

क्षोणितलप्रसृतमूल उदीर्णशाखो धर्मैकहेतुरुरुपर्वपरंपराढ्यः ।
श्रीमाननेक गुणभृ....प्रदूर्वन (द्रुटवत् प्रदूर्वन्)**प्राग्वाट**वंश उदीर्ण(दितो)विदितोऽस्ति भूमौ॥१॥

तद्वंशलब्धिप्रभवः पूराषिदिनीर्गजतः (ऽऽसोन्तीरा) सत्यपुरोत्मूटी स्टीन (सत् स्फुट श्रीः) ।
श्रेष्ठी विशिष्टः किल **सिद्धनाग**स्तस्याथ भार्याऽभवदंपतीति ॥ २ ॥

चत्वारो....(चत्वारश्च तयोर्धीराः) तयोः पुत्राः सर्वत्र विश्रताः ।
एको **विरड**(नामा)न्यो **वर्धनो** **वोणिक**स्तथा ॥ ३ ॥

कनक रुचि शितभाम मय विघायिक कारितं वरं—तैः
यत् मुचतेऽधुना दधिपद्रे श्रीशांतिजिनभवने ।
पोटक श्रेष्ठिनास्तत्र.........देवीप्रिया(त्रया)स्तयो र्जाताः ।
(पुत्राः प्राग्वाटवंशे) सद्‌गुणाढ्याः पटा इव........ ॥ ५ ॥
तत्राद्य आम्रवदत्ताख्यो द्वितीयश्चासुवर्धनः
तृतीयः सज्जनासनन्ददायी मूर्तिश्चसज्जनः ॥ ६ ॥
येनाकार्यत निर्म्मलोपलम(धीरा)....काशशांकप्रभा....
श्वे सुपार्श्व तीर्थकरयो(श्रीमत्पार्श्व सुपार्श्व तीर्थकरयो)मूर्तिर्यशोवन्निजम् ।
भार्य(तु) स्तरय दोंपया (?) चितस(पदा)शताभ्याराधकः प्राणिनां
श्रीमद्वीरजिनेश्वरस्य भवने मह्लावृतारव्ये पुरे ॥ ७ ॥
पुत्र्यौ च पोटकस्य द्वे आसीत् सीता महत्तरा ।
अपराश्चेति गणिन्य हन्या श्रीवादेवीति विश्रुता ॥ ८ ॥
सहलच्छि सज्जनस्याथ प्रियास्त....(याभ्यां सन्मतभद्राभ्यां) समा ।
ययश्चे.........द्राभ्यां तोषिता मार्ग जणालयः (?) ॥ ९ ॥
विश्वप्रसिद्धाः कमनीयरूपाः संभाविता सर्वजनस्य कामं ।
तयोः सुता कामतुला ईवोच्चैः पंचाभवकिन्तु न साधुनिद्याः ॥ १० ॥
तत्राद्यो धवा धवलो नामा विमलो देशल स्तथा ।
तुर्यो राहड नामा तु............सो (पञ्चमो) वाहडो मतः ॥ ११ ॥
धवलस्य............लणीति प्रियासी(प्रियाऽऽ)दथा....(नयोः) ।
वीरचंद्रसुतो जातो देवचंद्रस्तथा परः ॥ १२ ॥
विजया-जय-राजान-प्रसरण मुख्यास्तत्र वीरचंद्रसुताः ।
जाता हि देवचंद्रस्य देवराजात् सुतः प्रवरः ॥ १३ ॥
पुत्री कैकासीरी जाता धवलस्य कलस्वरा ।
नरपत्पाव (नृपमान्या) भूतां च पुत्रौ विशलदेशलौ ॥ १४ ॥
राहडस्य लघुभ्राता वाहडोऽभूत्...........(ज) न प्रियः ।
भार्या जोनमतिश्चास्य पुत्रो जसडुकस्तयोः ॥ १५ ॥
सज्जनस्य तथाभूतां द्वे सुते तत्र शांतिका ।
माता शुकादिपुत्राणां द्वितीया बांधकि पुनः ॥ १६ ॥
अथ तत्र राहडो यो विशेषतः सोऽभवद्........प्राज्ञः ।
सुजनः प्रियः सुशीलः प्रियधर्मा सर्वदोदारः ॥ १७ ॥

सभद्रशालो सुविनंदनाढ्यः । सुसौमनस्थोन वपाण्डु कम्बलः
स्थैर्य प्रभावं दधदुन्नतात्मा सुपर्वभाग्राजति मेरुवयः ॥ १८ ॥

पूजां करोति विधिना स्तवनं जिनानां, साधूननूतेतदुदितं समयं शृणोति ।
दानं ददाति च करोति तपोऽपिशक्त्या, शीलं च पालयति गेहिजने ते तं (ऽनिशं)यः ॥१९॥

तस्य प्रिया देगति नाम । धर्म्मार्थिनी
(धर्मपरायणच । शीलं पवित्रं त्रिविधंदधाना) नित्यं समाराधित भर्तृचित्ता ॥२०॥

या नित्यशः सहजभूषणभूषितांगी लब्धा ऽनवद्यवसना शुचि शीलम्यो (नव्या) ॥
जैनागमश्रवणकुंडलभाक् सुवर्णालंकारभृच्छुभय(त्वचक्रा)चक्र सुकाढ्यचक्रा ॥२१॥

चत्वारस्तनया बभूवुरनयोः संपन्नकोशोच्छयाः....
(शाखा) धर्माभ्यासपराः क्रमाझरेधराः प्राप्तप्रतिष्ठाः कालौ
सत्यागा गुरुविक्रमाः सुयशसः संसुक्र (कृत्य) साराः प्रजाः
पुण्याः सद्विनयाः पुनंति सदनं संतो नरेन्द्रा इव ॥ २२ ॥

तत्राद्यः **चाहडो** नाम, **वोहडिस्तु** द्वितीयकः ।
आसडाख्य स्तृतीयस्तु तुर्य **आसाधरस्तथा** ॥ २३ ॥

पारि (प्रारोह) प्रहतिसहाः सुवाणयुक्ताः सुवंशसंजाताः ।
आद्यारूढगुणाया धनुर्ल्लता इव विराजते (दिव्याः) ॥ २४ ॥

राहडश्रेष्ठिनस्तत्र जाता वध्व इमा वराः ।
अम्बदेवी वसुंधीय, माद्दू-तेजय-राजकाः ॥ २५ ॥

तथा **यशो**धर यशोवीर **यशः कन्तादयो** ऽभवन्
पौत्राः पौत्र्यश्च ये **कुय-जासुका**ख्या जयंतिका ॥ २६ ॥

एवं कुटुम्बयुक्तस्य **राहड**श्रावकस्य तस्याथ ।
वोहडिनामा पुत्रः पंचत्वमुपागतः सहसा ॥ २७ ॥

अथ तद्वियोगविधुरः स **राहडः** श्रावकः स्म चिंतयति ।
हा धिग्धिग् संसारस्वरूपमतिर्निदितं विदुषां ॥ २८ ॥

तथा जीवितं यौवनं सद्वपुःसंपदः सारसीमंतिनीसंगमः सज्जनाः ।
सर्वमित्यादिकं सुजातं महामेघमध्यस्थविद्युल्लताचंचलम् ॥ २९ ॥

अतो मनुष्येण विधेय एव चतुःप्रकारोऽपि जिनेन्द्रधर्मः ।
उशंति तत्रापि च सुप्रशस्यं सज्ज्ञानदानं मुनिकुंजरेंद्राः ॥ ३० ॥

अतोऽहं ज्ञानदानं तत् करोमीति विचिंत्य सः ।
चरितं लेखयामास, शांतेर्बिंबं च कारितं ॥ ३१ ॥

स्वभुजोपात्तवित्तेन, पूर्वं सत्पित्तलामयं ।
गृहपूजोचितं स्फारं पुण्योपार्ज्जनहेतवे ॥ ३२ ॥

नृपति गृह मिवोच्चैः शश्वदन्तः सुवर्णं विहितरुचिरचित्रं चारुपत्रेण शांति ॥
स्फु.........क्षतपहुजो मादं पुस्तकं तवकारित्त ॥ ३३ ॥

संवत्सरे नगभुजार्कमिते (१२२७) नभस्ये, मासे पुरेऽणहिलपाटकनामधेये ।
सुश्रावके कुमारपालनृपे च राज्यं कुर्वत्यलिख्यतसुपुस्तकमेतदंगं ॥ ३४ ॥

श्रीमत्परमानंदाचार्येभ्य श्रीधराः मभाचा (भमार्येभ्यः)....

....

यावन्नभःश्रीर्जननीय तोषं, पयोधरक्षीरभवं प्रजानां ।
तनोति ताराभरणा सुपुष्पदन्ता सुतावद्भुवि पुस्तकोऽयं ॥ ३६ ॥

श्रीचक्रेश्वरसूरिः श्रीपरमानंदसूरिभिः शिष्यैर्विहिता प्रशस्तिरेषा पठ्यते पुस्तकस्यास्य ।
॥ ३७ ॥ मंगलं महाश्रीः ॥

श्री. सं. पा. जै. ज्ञा. भं. पाटण

नंदीसूत्र (अध्ययन) टीका ता. प्र. ११३

श्रीसर्वविदे नमः ॥ पुरंदरपुरस्फाति, भाति श्रीपत्तनं पुरं ।
धर्म्मन्यायमये यत्र, नित्यं लोकस्सुखायते ॥ १ ॥

विभाति गांभीर्यगुणेन नाना, राजप्रवृद्धिर्जडभावमुक्तः ।
राजन्नऽनेकैः पुरुषोत्तमैः श्रीः श्रीमालवंशाबुनिधिर्न्नवीनः ॥ २ ॥

तस्मिन् समग्रव्यवहारिरत्नमप्रभधामाऽनुपमानकीर्त्तिः ।
निर्दूषणः सद्गुणधाम धर्ममयैककर्माऽजनि कर्मसिंहः ॥ ३ ॥

प्रियाऽस्य गोइत्यभिधा, सराग वचःप्रपंचा सदमाजयताऽद्भुता ।
विशुद्धशीलादिगुणैरनुत्तरै, र्या सीतया स्वंतुल्या बभूवुषी ॥ ४ ॥

तदंगभूर्भूरिसमृद्धिधाम महेभ्यसीमाऽजनि मालदेवः ।
बुधा अबुध्यंत भवांबुधौ यं, धनेश्वरस्य प्रतिबिंबमेव ॥ ५ ॥

श्रीगुर्जरेश्वरनियोगिनि रत्नपाल, तद्ग्रहयत्यपि बलेन जनं समग्रं ।
एकादशीव्रतमधासे बहुधाप्रकारै, स्तद्भापितोऽपि दृढदर्शनधीस्सुधीर्यः ॥ ६ ॥

अहो अनेकैः सुकृतोत्सवैर्जनं, सदैकधर्मात्मकतां नयन्नपि ।
अनंतधर्मात्मक वस्तुदेशिनो, जिनेशितुश्शासनमत्यजन्न यः ॥ ८ ॥

जगदंतगता विमुक्तवत्, ध्रुवमानंत्य जुषोऽपि यद्गुणाः ।
ग्रहचक्रमिवस्थिरा अपि, क्रममाणाश्च जगत्सु कौतुकं ॥ ९ ॥
श्रीदेवसुन्दर युगोत्तमसेवयाऽऽप्त—श्रीमज्जिनागमविचारमहारहस्यः
नंदीश्वरस्तवनमुख्यस्तवाल्लवातीचारांश्च यो निरुपमानमतिश्चकार ॥ १० ॥
षड्विधान्यहरहः कुरुते स्मावश्यकानि कलिकालविजेता ।
यो यथोचितमयोधमदानै, दीनलोकमुददीधरदेव ॥ ११ ॥
श्रीतीर्थयात्रा—जिनबिंब—साधु—पूजा—प्रतिष्ठादिविधानधीरः ।
सदापि साधर्मिकवत्सलत्वं, दानादिधर्मैरजयत् कलिं यः ॥ १२ ॥

अथ च—

संघभारधरणैकधुरीणाः नित्यदेवगुरुभक्तिकचित्ताः ।
क्षेत्रसप्तकनियाजितवित्ता .... ॥ १३ ॥
भूतलप्रथितकीर्त्तिसमूहाः पूरितार्थिजनसर्वसमीहाः ।
भूरिभूतिपरिभूतधनेशाऽस्तेजसाविजितबालदिनेशाः ॥ १४ ॥
मर्त्यलोकहितहेतुकमिंद्रप्रेषिता इव दिवः सुरवृक्षाः ।
पंच तस्य तनया विनयाढ्या भूरिभाग्यविभवा विजयंते ॥ १५ ॥
आसीज्जनाल्हादकमूर्त्तिराद्यः केल्हाभिधस्तेषु धियां निधानं ।
प्रभावकालंकरणस्य यस्य दशाप्यशोभंत दिशो यशोभिः ॥ १६ ॥
आस्ते जगत्ख्यातयशा द्वितीयो हीराभिधानो व्यवहारिहीरः ।
रमांबुधेस्तस्य गुणास्तरंगा, इवास्तसंख्याजगतीं स्पृशंति ॥ १७ ॥
निखिलव्यवहारिवर्गमौलिर्वीराकः सुकृती, सुतस्तृतीयः ।
कलयत्यधुना प्रयत्नशीलः श्रेष्ठींद्रोरुपमां सुदर्शनस्य ॥ १८ ॥
भक्तः श्रीगुरुपदयोः सदापि धर्माधारः श्रीजिनशासनप्रभावकः
त्रैलोक्यप्रथितयशा विशां प्रधानं, पाताकः समजनि तत्सुतश्चतुर्थः ॥ १९ ॥
सन्नंदकः स्फुटविराजिसुदर्शनश्री—
लक्ष्मीविलासवसतिः पुरुषोत्तमोऽत्र ।
तस्यांगमूर्जयति पंचमकः क्षमायां धर्मकर्मसु कदापि न रीणाः
गोविंद इत्यभिधया विदितो गुणैश्च ॥ २० ॥
यौवनेऽपि दधता किल शीलं, येन धीरपुरुषाचरितेन ।
स्मारितः स्मररिपुः परिभूय, स्थूलभद्रमुनिवृत्तमिदानीं ॥ २१ ॥
केल्हा भिधानस्य जनी विनीता, ख्यातास्ति हर्षूरिति यत् हुडुर्व्यां ।
श्रेयद्रुमः (?) श्रीगुरुदेवभक्ति रसैः प्रवृद्धः फलतीप्सिताऽर्थैः ॥ २२ ॥

चतुरंबुधिवारिकीर्त्तय–श्चतुराशाजनतामनोमताः
तनुजा मनुजालिमंडनं चतुरास्संति चतुर्मितास्तयोः ॥ २३ ॥
व्यवहारिवर्गमंडनमखंडदानादिधर्मविधिनिरताः ।
डाहा–भोला–मंडन,–माणिक्य इति क्रमाद्विदिताः ॥ २४ ॥
जगदद्भुतसौंदर्य, भार्ये **हीराभिधस्य** जयते द्वे ।
आद्या **शाणीनाम्नी, हीरादेवी** द्वितीयाच ॥ २५ ॥
भाग्यदाक्ष्यविनयादिगुणा द्वौ ते क्रमेण तनयावसुवातां ।
आदिमा **विजयकर्ण**, सकर्णं भूरिभूतिमपरा **गजाह्वं** ॥ २६ ॥
मायादिदोषरहिता विभाति, **वीराभिधस्य** कृदकूरनुकूलचित्ता ।
या यौवनेऽपि विमलं प्रतिपद्य शीलं, योषासु धैर्यविरहाप यशः पुमार्हि ॥२७॥
सुतौ तयोर्भाग्यभृतौ विनीतौ, प्रमुतभूती गुणभूरभूतां ।
आद्यः कृती नंदति **देवदत्त**स्तथा द्वितीयो **गुणदत्त**नामा ॥ २८ ॥
....नाभिधानव्यवहारिमौलेरुभे अभूत दयिते विनीते ।
तत्रादिमा सच्चरितैः पवित्रा, **प्रतापदेवी** रतितुल्यरूपा ॥ २९ ॥
अपरा **पदमलदेवी**, नित्यं श्रीवीतरागभक्तिपरा ।
तनुजौ मनुजौ प्रवराविमे क्रमेणासुवातां द्वौ ॥ ३० ॥
श्रीजिनेंद्रपदपंकजभक्तः सर्वदा सुकृतकर्मसु सक्तः ।
आदिमो विजयते **नगराजः** कीर्त्तिपूरजित**शारदराजः** ॥ ३१ ॥
उदयराज इति प्रथितोऽपरस्सकलपौरविभूषणमंगजः ।
जयति देवगुरूत्तमभक्तिकृत् मरमणी रमणीयगु (णा) लयः ॥ ३२ ॥
गोविंदनाम्नो दयितास्ति **गंगादेवी** सदा श्रीगुरुदेवभक्ता ।
न जातु धर्मामृतशीतलं, यन्मनः कलिस्तापयितुं समर्थः ॥ ३४ ॥
तयोर्जयंत्यऽब्धिमिताः सुताः श्रीपदं महाभाग्यभृतो विनीताः ।
भृताश्चतस्रोपि दिशो यशोभिर्येषां (?) हिमरुक् महोभिः ॥ ३५ ॥
आद्यो **हरिश्चंद्र** इति प्रतीतः सूनुर्द्वितीयः किल **देव** ंद्रः ।
ततस्तृतीयो **जिनदास**नामा .... ॥ ३६ ॥
अथच–श्रीजैनशासनसमुद्धरणैकधीराः श्री**देवसुंदरयुगप्रवरा** विरेजुः ।
तेषां पदे जनमुदे विहितावताराः श्री**सोमसुंदरगुरुप्रवरा** जयंति ॥ ३७ ॥
निश्शेषलब्धिभवनं भुवनातिशायि, महात्म्यधाम भरतोत्तमसंयमाढ्याः ।
किंचात्र सर्वगुणसुंदरशिल्पसीमाभूता जगंत्यपिजिनेश्वरशासने ये ॥ ३८ ॥

चत्वारः श्रीमदाचार्याः स्थापितास्तैर्युगोत्तमैः ।
एकपादपि यैर्धर्मश्चतुष्पादमऽवत्कलौ ॥ ३९ ॥

शांतिस्तवेन जनमारिहृतस्सहस्रनामावधानिबिरुदा महिमैकधाम ।
तेष्वादिमा वि.वधशास्त्रविधानधातृतुल्या जयंति मुनिसुंदरसूरिराजाः ॥ ४० ॥

षट्त्रिंशता सूरिगुणैरलंकृतास्तथा द्वितीया विजयं वितन्वते ।
जगन्नुताः कृष्णसरस्वतीति सद्यशः श्रियः श्रीजयचंद्रसूरयः ॥ ४१ ॥

गाढंजयंति महविद्याविडंबनप्रभृतिशास्त्रविवृत्तिकृतः ।
श्रीभुवनसुंदरगुरूत्तमास्तृतीया यशोनिधयः ॥ ४२ ॥

तुर्या जयंति जगति विदिता निखिलांगपाठपारगताः ।
श्रीजिनसुंदरगुरवः प्रज्ञाऽवज्ञातसुरगुरवः ॥ ४३ ॥

अतश्च—गणाधिपश्रीगुरुसोमसुंदरप्रभूपदेशं विनिशम्य सुंदरं ।
श्रुतस्य भक्तैरधुना जिनाधिपप्रवर्त्तमानागमलेखनेच्छया ॥ ४४ ॥

गोविंदनगराजाभ्यां, नंदेभमनुवत्सरे(१४८९) । लेखितः पुस्तको
जीयादाचंद्रार्कं प्रमोददः इति प्रशस्तिः ॥ श्रीः ॥छ॥श्रीः ॥ ४५ ॥

श्री सं. पा. जै. ज्ञा. भं. पाटण.

श्रीपंचांगीसूत्रवृत्तिः ता. प्र. ११४

संवत् १४५५ वर्षे ज्येष्ठ सुदि ३ गुरु पंचांगी सूत्रवृत्ति पुस्तकं लेखयांचक्रे ॥

श्रीकायस्थविशालवंशगगन(चंदो)ऽत्र जानाभिधः
संजातः सचिवाग्रणी (गुरुमतिः) श्रीस्तंभतीर्थे पुरे
तत्सूनुस्थिरयन् क्रियैककुशलो भीमाभिधो मंत्रीराट्
तेनायं लिखितो बुधावलिमनः प्रीतिप्रदः पुस्तकः ॥ १ ॥

शुभं भवतु श्रीसंघभट्टारकस्य ॥ श्रीः ॥ नमः श्रीसर्वज्ञाय ॥

प्राग्वाटवंश मुकुटः प्रकटप्रतिष्ठः श्रेष्ठी बभूव भुवि लाषण इत्यभिख्यः ।
(शीतांशुर विमलवद् रसेषु कीर्तिपुण्य सर्वतोऽपि धरणीं) धवली चकार ।
एतत् (पाणि) गृहीति विश्रुतादि (श्राद) शीला
जिनवचन बद्धरमाया गंगामनुसरति निजचरितैः ॥ २ ॥

आल्हूरित्यभिधाना सकर्णजनवर्णनीयगुणनिवहा ।
अभवत्तयोस्तनूजा जिनाङ्घ्रिपूजाविधानरता ॥ ३ ॥

तामुपयेमे सुकृतिर्मंत्री वण विर(धमदोपमा)यो विशदबुध्धिः ।
(धीसखः शतमखविदा चांपलदेवी प्रभूततनूजन्मा ॥ ४ ॥

सत्पात्रवाप सफलीकृत (भूरि) वित्ता श्रीधर्मकर्मकरणप्रवणैकचित्ता ।
या स्वैः विशुद्धचरितैः विदुषामदोषश्लाघास्पदं समजनि (मूल) सत्प्रतिष्ठा ॥ ५ ॥

श्रीमत्तपागणनभोंगणसूरसूरिश्रीदेवसुंदरगुरुप्रवरोपदेशं ।
श्रुत्वा सुधासममसीमगुणा समाना सा श्रावकाचरणचारुरतऽथ आल्हूः ॥ ६ ॥

मत्वा सारतरं धनं धनफलं धिष्णुर्निजश्रद्धया
वेदेषूदधिशीतदीधिति १४५४ मिते संवत्सरे वैक्रमै
लक्ष्मीविश्रयणनातिशायिजनते श्रीस्तंभतीर्थाभिधे
द्रंगेऽलीलिखदेतदद्भूततमं पंचांगिकापुस्तकं ॥ ७ ॥

आचंद्रादित्य ....
मेतच्च जीयात् ॥ शुभं भवतु श्रीसंघस्य ॥

श्री० सं० जै० ज्ञा० भं० पाटण०

श्रीहेमधातुपारायणवृत्तिः ता. प्र. ११५

संवत् १३०७ वर्षे चैत्र वदि १३ भौमे श्रीविसलदेवकल्याणविजयराज्ये बाम........ (महं श्री धांधा प्रभृति) पंचकुले प्रतिपत्तौ श्रीचंद्रगच्छीयश्रीचंद्रप्रभसूरिशिष्यैः । आचार्य-श्रीनेमिप्रभसूरि........श्रीहेमचन्द्रधातुपारायणवृत्तिपुस्तिका लेखिता । लिखिता च. ठ० देव.

श्री० सं० जै० ज्ञा० भं० पाटण०

श्रीजीवाभिगमवृत्तिः ता. प्र. ११६

समाप्ता जीवाभिगमाध्ययनशास्त्रोपदेशटीका ॥ कृतिर्हरिभद्राचार्यस्येति ॥ ग्रंथाग्रं १२०० ॥ संवत् १४४४ वर्षे फागुण सुदि १५ शनौ अद्येह श्री पत्तने ॥

ओकेशो भद्रेश्वरगोत्रे नारायणीवशालायां ।
वृद्धो वणिगिति विदितो नरसिंहः साधुवर आसीत् ॥१॥

तस्य च भार्या मोही तनूद्भवाः तस सांगणः प्रथमः ।
झीणा कापा देदा सिंदु रामा [illegible] ॥२॥

सांगणवधूर्धनश्रीः पुत्रौ द्वौ एतयोश्च नरदेवः ।

जगसिंहश्च लघुर्बंधू जेयतश्रीरंगजाजयश्चामी ॥ ३ ॥

आद्यो हि गोना-वइजाभिधानौ तृतीयबंधुः किल देवसिंहः ।

यो देवगुर्वादिकधर्मकार्ये कृताभियोगः शुभभाग्ययोगः ॥ ४ ॥

वइजाकस्य तु भार्या जयश्रीरंगजाश्चतुःसंख्याः ।

साधुवरवरनामसिंहच्छाजल-नरवर्म-दूदाख्याः ॥ ५ ॥

साधोश्च देवसिंहस्य भार्या कर्म्मसिरीति ।

त्रयाणां पुरुषार्थानां पात्रं सुपात्रमास्ते कुलं हृदः ॥ ६ ॥

श्रीमत्तपागणनभोगणभास्कराणां श्रीदेवसुन्दरगुरूत्तमसूरिराजां ।

धर्म्मोपदेशवशतोऽवगताप्तवाक्यः स्वोपार्जितार्थनिवहस्य फलं जिघृक्षुः ॥७॥

सुधीः सहस्रानिह देवसिंहो ग्रन्थाग्रतः पंचदश प्रमाणान् ।

श्रीताडपत्रेषु जिनागमस्य स लेखयत्संप्रतिपुस्तकेऽत्र ॥८॥

सिद्धप्राभृत-जीवाजीवाभिगमवृत्तिकेऽलेखयत् ।

अणहिल्लपाटकनगरे त्रिवार्द्धिवार्धीन्दुमिते वर्षे (१४४३) ॥ ९ ॥

॥ शिवमस्तु ॥

श्री० सं० पा० जै० ज्ञा० भं० पाटण०

श्रीयोगशास्त्रम् ता. प्र. ११७

संवत् १२७४ वर्षे मार्गवदि ८ गुरावद्येह प्रल्हादनपुरे ॥

श्री० सं० पा० जै० ज्ञा० भं० पाटण०

श्रीदशवैकालिकनिर्युक्तिः ता. प्र. ११८

ग्रंथाग्रं भाष्यसहितं ७५५० ॥छ॥ शुभं भवतु । सर्वेषां कल्याणमस्तु ॥छ॥ संवत् १४८९ वर्षे ज्येष्ठमासे कृष्णपक्षे द्वितीयायां तिथौ गुरुदिने लिखितं डूंगरपुरे पचाकेन ॥ छ ॥

श्री० सं० पा० जै० ज्ञा० भं० पाटण०

श्रीदशवैकालिकवृत्तिः ता. प्र. ११९

संवत् १३२६ वर्षे मार्ग सु. ४ गुरौ प्रभातेऽद्येह श्रीमदणहिल्लपाटके समस्तराजावली समलंकृतमहाराजाधिराज श्रीमद्अर्जुनदेवराज्ये महामात्य श्रीमालदेवप्रतिपत्तौ श्राव........ धर्मार्थं सत्पुरेस्यते....श्री वीतराग प्रसादात् धनपाल सु.श्रा.मुक्ताकाभ्यामात्मनः शुद्धयै लिखितमिदं॥

श्री० सं० पा० जै० ज्ञा० भं० पाटण०

श्रीकथारत्नसागरः ता. प्र. १२०

(अंतर्गत अगडदत्तकुमार चरित्र)

इति श्रीमलधारिशिष्यश्री**नरचंद्राचार्य**विरचितकथारत्नसागरे अगडदत्तकुमारचरितं नाम पंचदशस्तरंगः ॥ संवत् १३१९ वर्षे भाद्रसुदि ५ शुक्रे अद्येह **श्रीमत्पत्तने** महाराजाधिराज-श्री**मदर्जुनदेव**विजयराज्ये तन्नियुक्तमहामात्यश्री**मालदेव**प्रतिपत्तौ महं० **वीजाशालायां** ठ० **धनपालेन** तरंगकथापुस्तिका लिखिता ॥ मंगलं महाश्रीः ॥

श्री० सं० पा० जै० ज्ञा० भं० पाटण०

श्रीज्ञानपंचमीकथा. ता. प्र. १२१

संवत् १३१३ वर्षे चैत्र शुदि ८ रवौ महाराजाधिराजश्री**वीसलदेव**कल्याणविजयिराज्ये तन्नियुक्तश्री**नागड**महामात्ये समस्तव्यापारान् परिपंथयतीत्येवं काले प्रवर्त्तमाने (**धवलकनगरे**........ **ललितसुंदर** गणिन्या) ज्ञानपंचमी पुस्तिका लिखापिता ॥ छ ॥ छ ॥

श्री० सं० पा० जै० ज्ञा० भं० पाटण०

श्रीद्वयाश्रयमहाकाव्यम् ता. प्र. १२२

संवत् १३३५ वर्षे श्रावण शुदि १५ सोमे अद्येह **श्रीपत्तने श्रीसारंगदेवराज्ये** द्वयाश्रयमहाकाव्यं ठ० लषणेन लिखितं ।

श्री० सं० पा० जै० ज्ञा० भं० पाटण०

श्रीप्रत्याख्याननिर्युक्तिः ता. प्र. १२३

संवत् ११९८ अषाढ सुदि २ गुरु दिने ॥ अद्येह श्रीसमस्तराजावलीसमालंकृतपरमभट्टारक-परमेश्वरश्रीमद्**अर्णोराजदेव**विजयकल्याणराज्ये, श्रीमद**जयमेरु** अथ स्थित श्री**पृथ्वीपुरे**, प्रतिवसति स्म, आर्जिका, बांधुमतिस्यार्थे, **नैगमान्वयकायस्थ** । पं० ॥ **माढलेन** आवश्यकपुस्तिकेयं लिखितेति ॥ शुभं भवतु लेखकपाठकयोरिति ॥ छ ॥ यादृशं .... मम दोषो न दीयते ॥

श्री० सं० पा० जै० ज्ञा० भं० पाटण०

श्रीषडशीतकवृत्तिः ता. प्र. १२४

संवत् १२५८ वर्षे पोष वदि ५ रवौ अद्येह श्री**मदणहिल्लपाटकनगरे** समस्तराजावलिविराजितमहाराजाधिराजश्री**भीमदेव**राज्ये षडशीतिवृत्तिः **गणयचंद्र** विरचिता ॥ ग्रंथाग्रं २००० ॥

श्री सं० पा० जै० ज्ञा० भं पाटण

श्रीशतकचूर्णिटिप्पकनम् ता. प्र. १२५

श्री श्रीमालकुले विपुले जज्ञे श्रेष्ठी **यशोधनः** ।
समभूत्तदीयदयिता जीवहिता **नागदेवीति** ॥ १ ॥
सा चतुरोऽसूत सुतांश्चतुरः **श्रीवच्छ** इति ततोऽप्यन्ये ।
सालिग सोहिक पासुक संताश्च **यशोमतिश्च** सुता ॥ २ ॥
इतिश्च–अस्मिन्नेव सुपर्व्वणि वंशेऽभूदु**सभ** इति शुभः श्रेष्ठी ।
तस्य **श्रीरिति** जाया तयोः सुता **वलुके**त्यस्ति ॥ ३ ॥
तां **सालिगो**ऽनु**रूपां** परिणिन्ये **नयवतीं** तयोस्तनयः ।
शासनदेवो गुरुदेवचरणयुगकमलकलहंसः ॥ ४ ॥
स जनन्याः श्रेयोऽर्थं **श्रेष्ठमतिः** शतकचूर्णिटिप्पनके ।
लेपयतिस्म ततोऽदान्म**हिमा गणिनी** पठनहेतोः ॥ ५ ॥
भूमिर्नभः सुमेरुः सवितृशशिनौ चराचरा सुभृतः ।
यावदिह संति लोके तावदिह पुस्तिका नंद्यात् ॥ ६ ॥

श्री सं० पा० जै० ज्ञा० भं० पाटण

श्रीप्रकीर्णकसूत्रम् ता. प्र. १२६

संवत् १२९० वर्षे प्रथम श्रावण वदि १० शनावद्येह श्रीमद्दे**वपत्तने गंडश्री**विनेयप्रभृति पंचकुल प्रतिपत्तौ **महं सीहाकेन** नीतिवाक्यामृतसूक्तपुस्तिका लिखापिता ॥ मंगलं महाश्रीः ॥ **शुभं** भवतु ॥ लेखकपाठकयोः ॥ छ ॥ छ ॥ यादृशं .... मम दोषो न दीयते ॥ छ ॥

श्री सं० पा० जै० ज्ञा० भं० पाटण

श्रीआचारांगसूत्रवृत्तिः ता. प्र. १२७

संवत् १४५० वर्षे भाद्रपद वदि १ शुक्रे रेवत्यां पुस्तकं लिखितं ॥ ९० ॥
सद्धर्म्म व्यवहारी **देसल**सुतः ख्यातः क्षितौ सर्वतः
प्राग्वाटान्वयमंडनं समभवन् **मेघा**ख्यसंघाधिपः ।
जाया **मिणलदेवी** नाम विदिता तस्य प्रशस्याशया
पुत्री **पुण्यवती** तयो **गुणवतीस्याणि**ति संज्ञाऽभवत् ॥ १ ॥
सम्यग् ज्ञानमिदं मधिकसुतः (**शमाधिक पदं**) श्रद्धाभूषर्माग्रणीः

जिनमगपदेसू.-शिगाहाना (श्रीमज्जैन महोपदेश सुभगो) (धानाक नामाधनी)
. . . जाया साजनितस्य धन्य चरिता पुण्यकीया (सत्पुण्य कार्य क्षमा)
नित्यं श्रीजिन पुजनैक रसिकादानादि बद्धादरा ॥ २ ॥
श्रुत्वा श्रीगुरुदेव सुंदरमहाधर्म्मोपदेशं तया
वर्षे विक्रमतो नभशरनदिनागेंदु संख्ये (१४५०)
सुदी द्वितीयां पुस्तकमिदंस्वश्रेयसे लेखितम्
नित्यं ....

श्री सं० पा० जै० ज्ञा० भं० पाटण

श्रीन्यायकंदलीवृत्तिः ता. प्र. १२८

संवत् १२४२ फाल्गुन वदि ६ गुरौ पं. **परमचंद्रगणिना** देशनामासाद्य **पं० महादेवेन** न्याय-कंदलीवृत्तिसूत्रं समाप्तमिति ॥

श्री सं० पा० जै० ज्ञा० भं० पाटण

श्रीधर्मशर्म्माभ्युदययकाव्यम् ता. प्र. १२९

संवत १२८३ वर्षे श्रीहरिचंद्रकविविरचितधर्म्मशर्म्माभ्युदयकाव्यपुस्तिका **श्रीरत्नाकरसूरि-**आदेशेन **कीर्तिचंद्रगणिना** लिखितेति भद्रं ।

श्री सं० पा० जै० ज्ञा० भं० पाटण

श्रीयोगशास्त्रम् ता. प्र. १३०

संवत् १२५५ वर्षे मार्ग शुदि १ रवौ ॥ अद्येह श्री**पत्तन** श्री**देवाचार्य**वसत्यां, श्री**धनेश्वर-सूरीणां** हेतोर्द्वादशसहस्रयोगशास्त्रवृत्तिं परमश्रावक ठक्कुर **वर्द्धमानेन सुदर्शनग्राम**वास्तव्य पारि० **वीशल** पार्श्वात् लिखापिता ॥ छ ॥ शुभं भवतु ॥ प्रथम प्रकाशवृत्ति ग्रंथ १८०० अष्टा-दश शतानि ग्रंथ संख्या ॥ शिवमस्तु ॥ छ ॥ छ ॥

श्री सं० पा० जै० ज्ञा० भं० पाटण

श्रीतित्थोगालीप्रकीर्णम् ता. प्र. १३१

॥ ९० ॥ श्रीयोगिनीपुरवासिभिमहर्द्धिकै राजमान्यैः सकलनागरिकलोकमुख्यै ठ० **दूदा** ठ० **ठकुरा** ठस **पदमसीहैः** स्वपितुः सा० **राजदे** श्रेयसे अनुयोगद्वार चूर्णिः । षोडशकसूत्रवृत्ति ति-थ्थोगाली श्रीताडे ॥ तथा श्रीरुषभदेवचरित्रं १२ सहस्रं कागदे पंच पुस्तिका तपागच्छ नायक श्री**देवसुंदरसूरीणामुपदेशेन** सं० १४५२ श्री**पत्तने** लेखिता इति भद्रं ॥ छ ॥

श्री सं० पा० जै० ज्ञ० भं० पाटण

श्रीकुलकप्रकरणम् ता. प्र. १३२

सर्वसंख्या ग्रंथ ॥ ३२४० ॥ संवत् १२७९ वर्षे चैत्र वदि ३ रवौ अद्येह श्री **चंदावत्यां** श्री-**सोमसिंहदत्त**विजयराज्ये पुस्तिकेयं समर्थिता लिषिता ॥ मलयचंद्रेण ॥ छ ॥ छ ॥ शुभं भवतु ॥

श्री. सं. पा. जै. ज्ञा. नं. पाटण.

श्रीनिरयावलीसूत्रम् ता. प्र. १३३

संवत १३१० वर्षे ॥ **गंभुकायामु**पांग पंचकस्य वृत्तिर्लिखिता ॥

श्री निरयावलीसूत्रम्

संवत् १४७३ वर्षे सुदी १० गुरौ अद्येह **स्तंभतीर्थे** लिखिता ॥

श्री. सं. पा. जै. ज्ञा. नं. पाटण.

श्रीशांतिनाथचरित्रम् ता. प्र. १३४

.... प्राग्वाटान्वयमंडनं समजनि श्रीशालितः शालिरित्याख्यातिं (प्रगतः) ।
पुमाननुपमार्हद्भक्तियुक्तोऽस्य तु । वंशे **शक्तिकुमारतः** समभवत् **आसाहीरिति** स्फातिमान् ।
तत्पुत्राः **शिवदेवि**कुक्षिसरसि (सो) हंसा इमे जज्ञिरे ॥ १२ ॥
वोसिरि साढल सांगण नामानः **पुण्यसिंह** नामाच ।
स्वपितुः पुण्यायाष्टापदचैत्यं ये विरचयांचक्रुः ॥ १३ ॥

श्री**देवसूरि**प्रभवः प्रतिष्ठां चक्रेस्तथा श्री**मुनिदेवसूरिः** तदीयसहाय्यवशेन नव्यं श्री-शांतिनाथस्य तथा ॥ चरित्रं ॥ ग्रंथाग्रंथ ४८५ ॥ शुभं भवतु ॥

श्री. सं. पा. जै. ज्ञा. भं. पाटण.

श्रीयोगशास्त्रम (तृतीयः प्रकाशः) ता. प्र. १३५

संवत् १२९५ वर्षे भाद्रपद सुदि ११ रवौ ॥**स्तंभतीर्थे** महामंडलेश्वर राणक श्री**वीसलदेव**-विजयराज्ये तन्नियुक्तदंडाधिपति श्री**विजयसीह**प्रतिपत्तौ श्री **संडेरगच्छीय** गणि**आसचंद्र** शिष्यपंडित**गुणाकरस्य** **सौवर्णिक पल्लीवाल** ज्ञातीय ठ० **विजयसीह** ठ० **सलषणदे**व्यो सूनु **जसौ व० तेजःपालेन** लेखयित्वा आत्मश्रेयसे पुस्तिका प्रदत्ता ॥ लिषिता ठ० **रतनसीहेन** ॥
॥ **मंगलमस्तु** ॥ **ग्रंथाग्रं १३००** ॥

श्री. सं. पा. जै. ज्ञा. भं. पाटण.

श्रीदेशीनाममाला ता. प्र. १३६

संवत् १२९८ वर्षे अश्विन सुदि १० रवौ अद्येह **श्रीभृगुकच्छे** महाराणाक श्री **वीसलदेव** .... महं श्री **तेजपाल** सुत महं श्री **लूणसीह**प्रभृतिपंचकुलप्रतिपत्तौ आचार्यश्री **जिणदेव** .... देशीनाममाला लिखापिता । लिखिता च कायस्थ ज्ञातीय **महं जयंतसिंह** सु....

श्री. सं. पा. जै. ज्ञा. भं. पाटण.

श्रीसिद्धहेमलघुवृत्तिः ता. प्र. १३७

सं० १३७० आश्विन वदि ४ **स्तंभतीर्थे** पूज्य **श्रीरत्नाकरसूरीणां** आदेशेन ले० **सागरेण** पुस्तिका लिषिता ॥ छ ॥ ग्रंथाग्रं ३४०० ॥ छ ॥

श्री० सं० पा० जै० ज्ञा० भं० पाटण

श्रीउपदेशमालावृत्तिः ता. प्र. १३८

॥ ९० ॥ संवत् १३९४ वर्षे कार्त्तिक सुदि प्रतिपदायां शुक्रे श्रीयुगादिचैत्यमंडिते **मडवाडा ग्रामे** श्रीउपदेशमालावृत्तिः सुगुरुश्री **सर्व्वदेवसूरि**वाचनक्रियायोग्यायं पं. **अभय**.... ना लिखिता.

श्री० सं० पा० जै० ज्ञा० भं० पाटण

श्रीदशवैकालिकलघुटीका ता. प्र. १३९

सं. १२४८ वर्षे श्रावण सुदि ९ सोमेऽद्येह **श्रीपल्यां** दंड० श्री **अभयड**प्रतिपत्तौ लघु दशवैकालिकटीका लिखिता ॥

श्रीसित्तरीभाष्यम् ता. प्र. १४०

संवत् १२५८ श्रावण सुदि ७ सोमे श्री **मदणहिल्लपाटिका** श्री**हर्षपुरीय**गच्छे श्रीमलधारि सत्का **अजितसुन्दरी**गणिन्या पुस्तिका लिखापिता ॥

श्री० सं० पा० जै० ज्ञा० भं० पाटण

श्री नागानंद नाटकम् ता. प्र. १४१

सं. १२५८ वर्षे ॥ श्री**मदणहिलपाटके** । **मुनिचंद्रेण लोकानंदयोग्या** पुस्तिका लिखिता ॥

श्री० जै० सं० ज्ञा० भं० पाटण

श्रीदशवैकालिकसूत्रम् ता. प्र. १४२

संवत् १२९३ वर्षे भाद्रवा सुदि १० बुधे ॥ पुस्तिकेयं लिखितेति श्राविका **वांचल** योग्य

लिखिता एषा पुस्तिका ॥ उदकानलचौरेभ्यो मूषकेभ्यस्तथैवच । रक्षणीया प्रयत्नेन यस्मात् कष्टेन लिख्यते ॥ शुभं भवतु ॥

श्री० जै० सं० ज्ञा० भं० पाटण

श्रीअष्टमपर्व (त्रिषष्टीयं) ता. प्र. १४३

संवत् १४३४ माघवदि सप्तम्यां तिथौ अद्येह युवराजवाटके पुस्तकं श्रीनेमिनाथस्य अलेखि।

श्री० सं० पा० जै० ज्ञा० भं० पाटण

श्र व्याकरणटिप्पनकम् ता. प्र. १४४

संवत् १२८८ वर्षे आषाढ वदि अमावास्या दिने भौमे राणक श्री **लावण्यप्रसाद** देवराराज्ये **वटकूपके** वेलाकुले, प्रतीहार**शखाट**प्रतिपत्तौ श्री**मद्देवचंद्रसूरि**शिष्येण **भुवनचंद्रेण** क्षुल्लक-**धर्म्मकीर्त्ति**पाठयोग्या व्याकरणटिप्पनकपुस्तिका लिखितेति ॥ छ ॥ पं० **सोमकलशेन** शोधिता च ॥ छ ॥ यादशं .... मम दोषो न दीयते ॥१॥ शिवतातिरस्तु श्रीजिनशासनस्येति ॥छ॥

श्री सं० पा० जै० ज्ञा० भं० पाटण

श्रीपुष्पमालावृत्तिः ता. प्र. १४५

संवत् १४८५ वर्षे भाद्रपद वदि ५ भोमे पुष्पमालावृत्तिः संपूर्णा लिखिता ॥ ठ ॥ स्वस्ति **ओकेशवंशे** श्राद्धधर्मधुरीणोऽरीणदानादिपुण्यकृत्यकरणनिपुणः **ठ० पूना**भिधानः श्रावक पुंगवो भूत्। ततपुत्रः पवित्रः ठ० **धणपालइति** तस्य सहचारिणी सदाचारिणी पापप्रवेशवारणी **ठ० धांधलदेवीति** जज्ञे ततकुक्षिसमुद्भवेन अतिअद्भुतसुकृतप्रोद्भूतश्रीदेवताप्रसादसाधिताधिकतरसकलशुभकृत्यनिवहेन **ठ० मोषा**भिधेन पूज्य **भ० अभयसूरि** सद्योग्यामृतवृष्टिसमुत्पन्नभावनाकल्पवल्लीप्रभावात् श्रीपुष्पमालावृत्तिपुस्तकं स्वपित्रोः श्रेयोऽर्थमलेखयत् शुभवृद्धये ॥

वृद्धः पुत्रः **ठ० देपाल** लघु **धनपाल** नामाभूत् **मोषा** लघुभ्रात **पेताक** आसीत् ॥

श्री० जै० सं० ज्ञा० भं० पाटण

श्रीत्रिषष्टीयं अष्टमपर्व ता. प्र. १४६

संवत् १४३६ वर्षे भाद्रपद वदि ५ भूमे लक्षता पं० **मलयचंद्रशिष्य आल्हाकेन** लिखितमिति भद्रं ॥ भग्न....परिपालयेत् ॥

श्रीमाल्हे भुवनोत्तंसे वंशे मौक्तिकवत् पुरा देवसिंहाभिधः श्रेष्ठी जातो जिनमतोच्छ्रितः ॥ २ ॥

विमुक्त माया जाया च तस्य **देवलदेव्यभूत्** ।
माउ नाम्नी हितापुण्य **सामंत**स्य तु भ्रातृजा ॥ ३ ॥
दयादाक्षिण्यदमतादानमानादिभिर्गुणैः ।
माउ नाम्नीं विहायान्यां नाज्ञासुर्वयं भुवि ॥ ४ ॥
इतश्च—श्रीमत्**कोरंट**गच्छाब्धि समुल्लाससुधानिधिः ।
सूरिः सैद्धांतिको जज्ञे **सार्वदेव**प्रभुः पुरा ॥ ५ ॥
तत्पट्टकमलाकेलिशैलः शीलकलोज्वलः ।
श्री**नन्नसूरि**सूरींद्रस्ततो जयति संप्रति ॥ ६ ॥
तन्मुखादेशनां श्रुत्वा पित्रोः पुण्यविवृद्धये ।
श्रीजिनाजितनाथस्य सा चरित्रमलीलिखत् ॥ ७ ॥

॥ मंगलं भूयात् ॥

श्री० जै० सं० ज्ञा० भं० पाटण

श्रीउपदेशकंदलीवृत्तिः ता. प्र. १४७

संवत् १२९६ वर्षे फागण सुदि ९ शुक्रे समस्तराजावलीपूर्वं महाराजाधिराज श्री**भीमदेव**-कल्याणविजयराज्ये तन्नियुक्तमहामात्यदंडश्री**ताते**श्रीश्रीकरण परिपंथयतीत्येवंकाले पुस्तकमिदं लिखितमिति ॥

श्री० जै० सं० ज्ञा० भं० खंभात

श्रीकुमारपालप्रतिबोधः ता. प्र. १४८

संवत् १४५७ वर्षे द्वितीय भाद्रपद शुदि ४ तिथौ शुक्रे श्री**स्तंभतीर्थे** बृहद्पोषधशालायां भट्टा० श्री **जयतिलकसूरीणां** उपदेशेन श्रीकुमारपालप्रतिबोधपुस्तकं लिखितमिदं ॥ कायस्थ ज्ञातीय महं **मंडलिक** सुत **पेता** लिखितं ॥ चिरं नंदतु ॥ छ ॥

श्री जै. सं. ज्ञा. भं. खंभात.

श्रीआवश्यकवृत्तिः (द्वितीय खंड) ता. प्र. १४९

संवत् १४४२ वर्षे श्री**स्तंभतीर्थे** पौषधशालायां आवश्यकवृत्तिद्वितीयखंडपुस्तकं लिखितं ॥

श्री० जै० सं० ज्ञा० भं० पाटण

श्रीकालिकाचार्यकथा. (कल्पसूत्रंयुतं) ता. प्र. १५०

॥ ९० ॥ ओकेशवंशे भुवनाभिरामच्छायासमाश्वाश्रितसत्वसार्थे ।
शौराणकीयास्ति विशालशाखा साकारपत्रावलिराजमाना ॥ १ ॥
तत्राभवद् भवभयच्छिदुरार्हदंह्रिराजीवजीवितसदाशयराजहंसः ।
पूर्वः पुमान् गणहरिर्गणधारिसारसे ।

(पत्राणि त्रूटितानि)

यान्धि(प्रेयान् श्री वी)**रदेवस्य हरिदेवो**ऽस्ति बांधवः । **हर्षदेवी**भवाः पुत्रा **नरसिंहा**दयोऽस्य च ॥१५॥

सहोदर्यः सपौन)०पुण्ष)स्य **लष्मिणि**धर्म्मकर्म्मठा। **कर्मिणिर्हरिसणि**श्च पुत्र्यस्तिस्रो गुणश्रियः ॥१६॥

गुणधरस्य यो भ्राता कनिष्ठो **धुंधुका**भिधः । **षेढा** नामास्ति तत्पुत्रः पवित्रगुणसंततिः ॥१७॥

अथ गुरुक्रमः—श्रीराजगच्छमुकुटोपम**शीलभद्र**सूरेर्विनेयतिलकः ।कल **धर्मसूरिः** ।

दुर्वादिगर्वभरसिंधुरसिंहनादः श्री**विग्रहक्षितिपते**र्दलितभादः प्रभावः ॥१८॥

आनंदसूरिशिष्यश्री**अमरप्रभसूरि**तः । श्रुत्वोपदेशं कल्पस्य पुस्तिकांनूतनामिमां ॥१९॥

उद्यमात् **सोमसिंहस्य** स पुण्यः पुण्यहेतवे, अलेखयच्छुभालेखां निजमातु**र्गुणश्रियः** ॥२०॥

यावच्चिरं धर्म्मधराधिराजः सेवाकृतां सुकृतिनां वितनोति लक्ष्मीं

मुनींद्र नृदिद्वि(वृन्दैहि)ह वाच्यमाना तावत् मुदं यच्छतु पुस्तिकासौ ॥२१॥

संवत् १३४४ वर्षे मार्ग्ग० शुदि २ रवौ **सोमसिंहेन** लिखापिता ॥

आ० श्री० वि० दा० सु० सं० श्री० वी० वि० शा० सं० छाणी

श्रीसार्द्धशतकवृत्तिः ता. प्र. १५१

प्रशस्तिः ॥ ग्रंथाग्रं० ३६४३ ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥ संवत् १३१३ वर्षे पौष-सुदि ७ सोमे अद्येह **आशापल्यां श्रीपद्मप्रभसूरि**शिष्यनैष्ठिकशिरोमणि वाचनाचार्य**विनयकीर्ति**-योग्यसार्द्धशतकवृत्तिपुस्तिका ठ० **विल्हणेन** लिखिता । इति भद्रं ॥ छ॥ शुभंभवतु लेखकपाठकयोः

आ० श्री० वि० दा० सं० उ० श्री० वी० वि० शा० सं० छायापुरी

श्रीयोगशास्त्रम् ता. प्र. १५२

प्रशस्तिः ॥ श्रीयोगशास्त्रचतुर्थप्रकाशः ॥ समाप्तः ॥ छ ॥ छ ॥ संवत् १२८५ वर्षे ज्येष्ठ शुदि ८ गुरौ श्री **देवपत्तने साढल**योग्या स्वाध्यायपुस्तिका लिखिता ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥

आचार्य श्रीमद् विजयनेमिसूरिश्वरजी संग्रहित चित्कोश. खंभात

श्रीअनेकांतजयपताकावृत्तिः ता. प्र. १५३

सा० **वरदेव**कुलकमलमार्तंडस्वगुर्वा चिता माणिक्यालंकृतोत्तमाङ्ग सा० **विमलचन्द्र** श्रावकरत्नसुतोत्तमाभ्यां **श्रीस्वर्णगिरि**शिखरालंकारश्रीचंद्रप्रभश्रीयुगादिदेवश्रीनेमिनाथ प्रासाद विधा-पन श्री **शत्रुंजयोज्जयन्तादि**महातीर्थसर्वसंघयात्रा कारापण उपार्जित पुण्यप्रासाद रोपित

कलशध्वजाभ्यां सा० क्षेमसिंह सा० चाहड सुश्रावकाभ्यां स्वश्रेयसे संवत १३५१ माघवदि प्रतिपदि श्री जिनप्रबोधसूरि पट्टोदयाचलालंकार श्रीजिनचन्द्रसूरि सुगुरु उपदेशेन श्रीमल्हादनपुरे व्याप्तत्रिलोक्यतलमिथ्यात्वमहीपतिविजयव्याप्त पताकां श्री अनेकांतजयपताकापुस्तकं मूल्येन गृहितं। भा चंद्रार्कनंदतात् ॥ शुभं भवतु गच्छस्य । ९०००

आ० श्री० वि० ने० सं० चित्काश, खंभात.

श्रीवद्धमान स्वामी चरियम् ता. प्र. १५४

संवत १३२६ वर्षे श्रावणसुदि २ सोमे अद्येह धवलकके महाराजाधिराज श्रीमद्अर्जुन-देवकल्याणविजयराज्ये तत्पादपद्मोपजीविनि महामात्यश्रीमल्लदेवे स्थंभती निवासिन्या पल्लीवाल ज्ञातीय भण० लीलादेव्या आत्मनः श्रेयोऽर्थं इयं महापुरुषचरित्रपुस्तकं लिखापित-मिति। मंगलं महाश्रीः ॥ शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाःदोषाः—प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः

आ० श्री० वि० ने० सं० चित्कोश, खंभात.

श्रीकथाकोशप्रकरणम् ता. प्र. १५५

श्रीजिनेश्वरसूरिविरचितं कथाकोशः प्रकरणं समाप्तमिति। शुभं भवतु श्रीश्रमणसंघस्य। संवत १४८७ वर्षे आषाढमासे शुक्लपक्षे चतुर्दश्यां तिथौ रविदिने श्रीडुंगरपुर नगरे राउल श्रीगइपाल-देव विजयराज्ये कथाकोश प्रकरणं लिखितं लिम्बाकेन मंगलमस्तु लेखकपाठकयोः ॥

आ० श्री० वि० ने० सं० चित्कोश खंभात

श्री उत्तराध्ययन वृत्तिः ता. प्र. १५६

इति परिसमाप्तौ ब्रवीमीति पूर्ववदुक्तोनुगमः सम्प्रतिनया(स्ते च प्रा)ग्वदेव ॥ इति उत्तराध्ययन-श्रुतस्कंधटीकायाम् श्रीशांत्याचार्यविरचितायां शिष्यहितायां जीवाजीवविभक्तिनामकं सदशमं (षट्त्रिंश) शत्रुंस(त्तम)मध्ययनं समाप्तमिति ॥ (अस्ति निस्ता) ....रवानुर्व्यां गुरुशाखासमन्वितः।

आसेव्यो भव्यसार्थानां श्रीकोटिक गणद्रुमः। तदुत्थवैरशाखायामभ्युदायतिशालिनी।

विशालाप्रतिशाषेव श्रीचन्द्रकुलसंततिः ॥

तस्याश्चैत्यद्यगानस्थदनिवयसद्भावक (: चैत्याद्यगाधच्छद् निच यलसद्भाव) कर्णान्वियोतथ श्रीथारापद्र गच्छ प्रसव भर(ध्वनानावलोकान्)ल्ल....नान् श्रीशांत्याचार्य मृंगोय ....(दगरदवशोवो) श्रोत्रपेयं तद् भो भव्याखिदोषप्रशमकरमतो गृह्यता लिह्यतां च ॥

श्रीमल्लिनलिहलशेखरशांत्यगत्य निर्मापिताऽणहिलवाटकचैत्यगेहे । (**स नृत्य**) **संपकनहतन** कारितो रुसौवर्णरम्यकलशान्वयमूर्त्तिकीर्तिः ॥ ४ ॥ श्री**शांतिसूरि**रकरोद् गुणसेन मुनीशितुः सहायेन । शिशुबोधां च सनिर्युक्त्युत्तराध्ययनवृत्तिमेनाम् ॥ ५ ॥ प्रख्यापिता..................सूरिणानणु-गुणक विशिष्य वर्यो ॥ ६ ॥ सिद्धांतस्वाध्यायव्यसनीष्वन्यासु वृत्तिषु सतीषु । यद्विरचितेयमपरा तत् सद्भिर्मर्षणीयं मे ॥ ७ ॥ यस्याददुत गुरुरा–(ने) सीदाकरुराद्दशमा गुणनिधिः श्री**सर्वदेवाह्वयः**, सूरी**श्रोऽभयदेवसूरि**रवनिख्यातः प्रमाणेऽपि च । तस्येयं सुगुरुद्वया........नाय चिरंभुइ प्रवर........ ....यस्यकृपवा वृत्तिः ए क्लृप्ताऽनघा, व्याख्यानाय चिरं मुनीन्द्रनिचये भूयादलंघ्यध्वरा ॥८॥ (पूर्णा) **कश्रेष्ठिना** श्रेष्ठं, श्रेयोनिःश्रेयसार्थिना । लेखितं गुरुभक्त्यास्याः प्रथमं प्रतिपुस्तकम् ॥ ९ ॥ अनाथ-पिंडदादीनां, द्दष्ठिवेष्टित चेष्टितैनिजैर्येन । श्रद्धायित श्राद्धः, स (तुल्यः) केन कथ्यताम् ॥ १० ॥ १८००० ॥

आ. श्री. वि. ने. सू. सं. चित्कोश. खंभात.

श्रीश्रावकधर्मप्रकरणवृत्तिः ता. प्र. १५७

........जिनपतिसूरिपट्टलक्ष्मीतिलकश्री**जिनेश्वरसूरि**विरचिते श्रीश्रावकधर्मप्रकरणे पूर्व्वपाठमाहात्म्याविर्भावश्चतुर्थप्रस्तावो वृत्तितः संपूर्णः ॥

सत्सूत्रानुगसन्निवेशसुभगं तत्तत्कथारूपकै–
विश्वाश्चर्यपदं चतुर्मुखमिव प्रस्तावलोलायितैः ।
श्रीमत् श्रावकधर्मवत् प्रकरणं पुण्यं पवित्राशयं
श्रुत्वा भव्यजनाः सदा श्रुतपूभा(?)माराधयन्तूत्तमम् ।
नमो अर्हद्भयः, नमः श्रीसंघाय, नमः श्री श्रुतदेवतायै ॥ अर्हम् ॥
यो दोषानपहस्त्य कुग्रहकृतान् सिद्धांतदृष्ट्या वस-
त्या वादं गुरुसिद्धिलब्धमिलितप्रामाणिकत्वं नयन् ।
स्थाने **दुर्लभराज**शक्रगुरुतां प्राप्तसूरीप्रान्वयो- (?)
त्तंसः **सूरिजिनेश्वरः** समभवत्त्रैविधवंध................क्ता (क्रमः) ॥ २ ॥
संवेगरंगशाला जयति सदापि सुधाप्रपेव मुक्त कृता ।
श्री**जिनचन्द्रसूरीन्द्रे** नात्याज्ञायते ॥ ३ ॥
येनालंकृत्य वृत्या किमपि किल कृता श्रीनवाङ्गी नवांगी
श्रीपार्श्वं स्थंभने यो दशममिव महासेवधिं व्याञ्जयच्च ।
यौगप्राधान्यलक्ष्म्या अपि पतिमुचितं मेनिरे यं द्विषंतो
ऽप्येष श्रीजैनचंद्री पदवीमभयदेवाख्यसूरेर्विलेभे ॥ ४ ॥

साक्षो यस्य यशःकुमार उदितः श्रीतारकाधीश्वरं
चित्रं न कृतवांस्त्रिलोकमपि च प्रासाधयंल्लीलया ।
तीर्थे श्रीजिनवल्लभो गणपतिः शास्ति स्म सोऽयं ततः
केनायं नहि नूयते पटुधिया धर्मे गतो धुर्यतां ॥ ५ ॥
तत्पट्टे जिनदत्तसूरिरुदगाद् यः संततं दैवतैः
सेव्यो देवगणैर्भृशं मदभृतै रास्तिक्यभागभिर्नरैः ।
आराध्यो नृपसत्तमैः....शयैस्तैः तैः सदालंकृतः
आख्यातोऽम्बिकया नामकथनात् सर्वोत्तमः स्व........सान्वयः ॥ ६ ॥
येस्यैकस्य कृते प्रकर्षविधया वाचस्पतिं दुःप्रभा
कृद्रत्नाकरकल्पपादपसुधाश्रीराजहंसादिना ।
विश्वे नोत्तमवस्तुना व्यतनुताभ्यासं विधाता ध्रुवं
श्रीमान् श्रीजिनचंद्रसूरिरभवत् चित्रास्पदं तत्पदे ॥ ७ ॥
तत्पादांभोजलीनः स्वपरसमयविद्धर्मधूर्धारणो आ-
श्चर्यं तान्यभवंस्तदपमलयशोगीतकोलाहलेन ।
आस्यान्याशांगनानां शिवपदकमलाकार्मणं यश्च मुद्रां
गच्छस्यादत्त सोऽभूज्जिनयतियतिराट् तत्कपट्टेऽभिषिक्तः ॥ ८ ॥
नित्यं चैत्यगृहे बताद्भुततरैः सारस्वतोऽधात्तदा
त्वोदस्तैः स्तवनामृतैस्ठढनकं तन्वन् जिनेंद्रान् प्रति ।
कीर्त्या शंसितदिङ्मुखः सुविदितो वाचंयमाग्रेसरो
प्यासीच्छ्रीजिनशेखरो गुरुपतिस्तत्पट्टसिंहासने ॥ ९ ॥
दीक्षादानजिनेन्द्रहैमघटसद्दंडप्रतिष्ठोत्सवा—
स्तन्वानस्य सदाप्यमुष्य सुगुरोर्नोद्वाति हस्ताम्बुजं ।
कालं श्रीसुषमां व्यभूषयदयं तेनावतीर्णे ऽत्र[सा]मान्ये
जैनमतेऽमुनाऽसमिता (ततां) सांप्रत्यपि प्रेक्षते ॥ १० ॥
भाग्यस्यावधिरेव नास्ति कतरा वाचां पुरस्तात् सुधा
रूपेणाधरितः पुना रतिपति र्बुद्ध्या सुराणां गुरुः ।
पूज्यानां किमिवोच्यतां ननु सदा प्रत्यर्थिनोऽप्यक्षयं
कुर्वन्ति प्रतिपत्तिमुन्मदरिधः (हृदः) स्वकेभ्यो गुरुभ्योऽधिकां ॥ ११ ॥
आलस्यैकगृहा धियाऽतिदशदः शक्ता न वर्णानपि
दृष्टानुचरितुं सदापि विदुषां हास्यास्पदंयोऽभितः (?) ।

पूज्यैस्तेऽपि विलोकिता मधुरया दृष्ट्या दिनैः कैश्चिद्—
प्युद्यद्बोधविलासतः विदधते शास्त्रं दृशो गोचरं ॥ १२ ॥
करणमेतदपूज्या स्तृतीय मिव चक्षुः
भव्यानां सद्बोधनैश्वरितां रचयतु चक्रुः ॥ १३ ॥
येषां शिष्यकणः श्रीमान् **लक्ष्मीतिलका**भिधोऽभिषेकवरः ।
तत्पादकल्पवृक्षच्छायासीनस्तदादेशात् ॥ १४ ॥
एतां प्रकरणवाचंयामिस्वां स्वमतिविभवौचित्यात् ।
विलसद्दीर्घालंकारप्रदानतः पूजयामास ॥ १५ ॥
पण्डितः श्री**जिनरत्नसूरि**सुगुरुर्भूत्वा प्रातोमांद्रां कथां स्वयं ।
यत् साहित्यरहः सुकार्भकमिव प्रत्येकबुद्धेः कथा ।
संशु बंधेऽध्यापयति स्म किंचन तदेव अत्रन्य धामस्म्यहो ॥ १६ ॥
श्री**बीजापुर**वासुपूज्यभवने हैमः सदंडो घटो
यत्रारोप्यत वीरचैत्यमसिधत् श्री**भीमपल्यां पुरि** ।
तस्मिन् विक्रमवत्सरे मुनिशशित्रेतेन्दुमाने....(१३१७)
.... **जावालीपुर्या** विभोः ॥ १७ ॥
वीरार्हद्विधिचैत्यमंडनजिनाधीशां चतुर्विंशतेः
सौधेषु ध्वजदंडकुंभपटलिं हैमीं महिष्ठैर्महैः ।
श्रीमत्सूरि**जिनेश्वरा** युगवराः प्रत्यष्ठुरस्मिन् क्षणे
टीकालंकृतिरेषकापि समधात् पूर्त्तिप्रतिष्ठोत्सवं ॥ १८ ॥ युग्मम्
जाग्रतसमग्रविद्यः सुवर्णकृतपाठितो मयैव कविः ।
.........................**अभयतिलकगणिः** ॥ १९ ॥
यत् साहित्यपथातिगं न सहते यत् शब्दशास्त्रोदितं
क्षोदं यत्र जिनेंद्रतंत्रमपि च स्याद्बाधकं (तद)नह्यपि ।
किंचिन्न्यास्थमहं निसर्गजडधीस्तद्यूयमुत्कणः (त्क्षणाः)
सम्यक् शोधयन....पकरोपि शोधन सिद्धयेस्म सुधियो बद्धांजलिर्वः प्रति॥२०॥
एतां वृत्तिमलंकृतिं सुकृतिनां कान्तां विनिर्माय या
पुण्यश्रीर्मयकाऽऽर्जि काचन तयाऽर्हतशासनप्रासितः ।
सर्वाप्यस्तु शुभर्धिभाजनमिह ग्रंथे सहस्रा सहै—
कत्रिंशेन शतेन पंचदश संजज्ञे प्रतीता (बुधैः) ॥ २१ ॥

....

सप्रशस्तिः ॥ ग्रं. १५१३१ ॥ शुभमस्तु सर्वस्य संघस्य ॥

जातस्य पुंरत्नगणस्य यस्य सदा समृद्ध्ये विंधुवत् सदब्धेः ।
खानिः सुराणामपि सैष पृथ्व्याम्**मूकेशवंश**ः प्रवरोऽर्थहेतुः ॥ १ ॥

मुक्तामणिस्तत्र बभौ **सलक्षण**ः प्रिणीतवान् यः सततं विचक्षणान्
गुणानुविद्धातर उज्वलात्मको. हृदि प्रधार्यो मुनिपुंगवैरपि ॥ २ ॥

प्रह्लादनस्तस्य बभूव **नंद**नो यशोवनामोदविधूतनंदनः ।
तेजोऽतिदीप्तादविविक्तमाश्रितो वियुज्य **सूराद्** गुदणाद्विधिभ्यतः(?) ॥ ३ ॥

तत् प्रिया **नायिका** जज्ञेऽर्चितश्रीतीर्थनायका ।
निनाय कापि यां शीलभूषा शाश्वतिकीं श्रियं ॥ ४ ॥

तयोस्तनूजौ **जिनदे ब्रह्मादेवौ** महाशयौ ।
उदारस्फुरतेजस्कौ, महौजस्कौ शुभाश्रयौ ॥ ५ ॥

प्राप्तामात्यपदस्य राय**मलयात् सिंहा**ग्र उद्यत्प्रभो....
येस्यारातिगणः समूलमगमन्नाशं प्रभावेऽनघे ।
श्री**जावालिपुरे** द्वितीयजिनराजोऽष्टाहिकां योऽद्भुतां
चैत्रे मासि तृतीयिकां वितनुते मन्ये वृषोद्यानिकां ॥ ६ ॥

इन्दुः पूर्णभदन्तरोचिरिषवः सन्मानसंक्रोडना
वल्हावह्लोदर्शनराजहंससुभगं ज्योतिःप्रकृष्टात्मकम् ।
लक्ष्मीर्दान वशीकृता प्रतियुगं यस्याभवत् सेविका
सोऽयं धर्ममुखैः चतुर्मुखकृत....भिः सभ्रममब्रह्मदेवः परः ॥ ७ ॥

प्रह्लादनस्य तनया विनयान्विता इमाः,
सा **चाहिनी** ननु **सुवर्णनिका सरस्वती ।**
तुर्या च **संपद**भिधा जिनधर्मवासिता
आवासिता अविकलोज्वलशीलकेलिभिः ॥ ८ ॥

शीलालंकरणं विभाति विमले श्री ब्रह्मदेवस्य सा, [भा....यकादेया]
दाक्षिण्यादिगुणोज्वला अपमला पुत्री तथा कर्मिणी ॥ ९ ॥

श्रीजावालिपुरे जिनेशभवने स्वश्रेयसेऽष्टाहिकां
चैत्रे मासि चतुर्थिकां गुरुतरां [यश्वत] चक्रे तथा स्वस्तिकं । ॥ १० ॥

सोदार्याः सुकृतश्री....**स्वर्ण**गिरेस्तथा स्वजननीश्रेयोऽर्थमष्टाहिकां
चैत्रे मासि तृतीयकामथ सुवर्णीन्याः शुभायाश्विने ।
षष्ठीमारचयन् सदापि हि महं ज्याभ्रश्रीभीमदेवः सुनेव्यांधी
पुण्यफलावलिं स्वजनसात्कृत्वा स्वयं....

एतस्या भ्रातृपूर्णिनी पूर्णिमा लांध्वानूत्वं
हन्तात्यं ततोध्वं समाना ॥ ११ ॥
गंगाप्रवाहा इव तस्य पुत्रात्रयः पवित्रा **जयदेव**नामा।
कुमारसिंहोऽपि च **लक्षणश्च**, स्वच्छाशया धर्म्यरसेन पूर्णाः ॥ १२ ॥
षोढावश्यककारिणी....तस्य गुणोदकुःधिका समभव **प्रह्लादन**स्यां ऽगजा
प्रागुक्तैव **सरस्वती** प्रणयिनी पुण्योर्मिसंवर्मिता ॥ १३ ॥
पुत्राः सन्त्यनयोर्नयोदयमया मूर्त्या सुधासूतयो
वाचेक्षुप्रविवर्षिणः प्रशमतो मुन्यावताराः किधांशुप्रभाःदोगजात्सिंहकः (?)॥१४॥
तेषु **लक्षणसिंहस्य,** भार्या **लक्ष्मीनिका**ऽभवत् ।
भांडशालिकश्री**क्षेत्रासिंहस्य** दुहिताऽर्हति ॥ १५ ॥
धर्मस्नेहभृता पात्रदिरु प्रदर्शनदीपिका
सतृम(कर्म)स्वेकलावत्रया विशेषण दिधा ....**ब्रह्मदेवो**ऽ नघः ।
लालादिस्लकभागिनेयसहितो भव्याक्षरैः पुस्तके
वृत्तिं श्रावकधर्म (क) प्रकरणस्यालेखयामासिवान् ॥ १६ ॥
सूरीशितु**र्जिनपतिप्रभु**पट्टचूलालंकारिणो युगवरस्य जोने **जिनसूरेः**

श्री हु. मु. जै. ज्ञानभंडार. सुरत

श्री चतुर्विंशतिका. ता. प्र. १५८

जैनसिद्धांततत्वषट्पदमकरंदास्वादमधुपेन तपागच्छस्वच्छहृदयमुनिमुखमंडनेन श्वेतांबरव्रतिव्रातत्वारा ताचार श्वेतरुचिना वाचनाचार्य पं. **गुणकरेण** इयं संसारार्णवनिमज्जमानजनपारनयन-भंगिनी साहित्यविचारवैदग्ध्यहृदयोल्लासपंकजप्रबोधचंद्रिका चतुर्विंशतिजिनानां स्तुतिर्लिखापिता। इति श्री **वैद्यनाथ**मकृतांतकस्य स्नानेन कश्मिरजकर्दमेन–नश्य ज्ञायते **दर्भवती** सदायातस्याम-लेखस्थित **श्रेणकेन** विक्रम संवत १२११ पोष शुद १४ सोमे

पत्र ८४ पंक्ति ३. अक्षर ३५ थी ४० लंबाइ १४×१४॥

श्री हु. मु. जै. ज्ञानभंडार. सुरत.

श्री महानिशीथसूत्रम् ता. प्र. १५९

महानिशीथं समाप्तमिति शुभं भवतु ॥ चतुर्विधेन संघेन महानिशीथपुस्तिका लिखापिता ॥ संवत १३८२ वर्षे अश्विन शुद १३ शुक्रे लिखिता ॥ कल्याणमस्तु ॥

प्रवर्तक श्री कां. वि. सं, शा, सं, वडोदरा

श्रीशांतिनाथचरित्रम् ता. प्र. १६०

याद्दशं पुस्तकं दृष्टं ताद्दशं लिखितं मया ।

यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

संवत् १४१२ वर्षे पौष वदि १२ गुरौ अद्येह श्री**मदणहिल्लपट्टने** श्री **साधुपूर्णिमा**पक्षीय-श्री**अभयचंद्र**सूरीणां पुस्तकं लिखितं पंडित**महिमाकेन** । शुभं भवतु.

पंक्ति ४. । अक्षर ९० थी १०० ।

प्र० श्री० कां० वि० सं. शा. सं. वडोदरा

श्रीनिघण्टुशेषः ता. प्र. १६१

संवत १२८० वर्षे कार्तिक वदि ५ गुरौ निघंटुशेषपुस्तिका लिखितमिति ॥ शुभं भवतु लेखक पाठकयोः ॥ ठ ॥ संवत १३४३ वैशाख सुदि ६ सौ० **चांचल**सुत भां० **भीम** भां० श्री-**साहडसुत** भां० **जगसिंह** भां० **खेतसिंह** श्रावकैः श्री**चित्रकूट**वास्तव्यैर्मूल्येनेयं पुस्तिका गृहीता।

प्र० श्री० कां० वि० सं, शा० सं० वडोदरा

श्रीकल्पसूत्रम् ता. प्र. १६२

संवत १३७७ कार्त्तिक सुदि १ रघु (सुरा सुलुक्युके) प्रवर्तमाने अतीव दुष्षमाकाले **सागरेण** लिखिता श्री **रत्नाकरसूरीणा**मादेशेन ॥

प्र० श्री० कां० वि० सं० शा० स० वडोदरा

श्रीशतपदीप्रश्नोत्तराणि ता. प्र. १६३

नमो जिनागमाय । श्रीवीराय नमस्तस्मै,

यो दुर्ज्जाचल संस्थितः दुर्जाड्यानलस्थितिः ।

यऽज्ञानं पूज्यते पूज्यैस्तदक्षरश्रुतं स्तुवे ॥

श्री **वाग्भट्ट**मेरुमहादुर्गे पल्लीपालवंशे श्रेष्ठि**लासण**श्रावको बभूव,

तत्पुत्राः **श्रेष्ठिपाल्हय–णहुल–वीरदेवनामानस्त्रयः** ।

श्रे. पाल्हभार्या **रूपिणि** तत्कुक्षिसमुत्पन्नौ द्वौ पुत्रौ **झांझणगुणदेवसंज्ञकौ** ॥

श्रेष्ठिवीरदेवपत्नी **वीरमती मोल्ही** इति पैतृकं नाम तस्याः

सुतो गुणैर्विशालो **गुणपालः** तस्य जाया **गउरदेवी**

इति विनयज्ञा, इतश्च **हम्मीरपत्तन** वास्तव्य श्रेष्ठि **वारयनाम**तस्यांगजः श्रेष्ठि **साल्हडः** तस्य सहचारिणी सदा सदनुष्ठानविधान तत्परा श्रेष्ठि **सुहवदेवी** सुश्राविका तत्पुत्रो जिनशासनप्रभावकः सा **कडुया**श्रावकः तस्य सहोदरा भगिनीअनारतं दानशीलतपोभावनादिविशिष्टधर्मध्यानपरायणा **मोल्ही** श्राविका। तथा सा **कडुया**भ्राता **उदाक**श्रावकस्तस्यांतो **होलण**स्तेन सा **कडुया** श्रावकेण च उदाश्रावक-श्रेयोऽर्थं श्रीमत्पार्श्वनाथबिंबं श्री**वाग्भट्ट**मेरुमहादुर्गे महावीरचैत्ये सप्तविंशत्यधिके त्रयोदशशते(१३२७) स्थापितम् सा कडुयाभार्या **कर्पुरदेवी** (१३२७) तत्सुतः **पुण्यपाल**: दुहिता **वनीत**लाख्या द्वितीया प्रेयसी **कुर्मदेवी** तस्यास्तनया **धांधल**देवीति ।। एवं च कुटुम्बे प्रवर्तमाने प्रवर्द्धमाने च **भीमपल्यां** शुश्रुवेऽन्यदा धर्मदेशना। तद्यथा।। ज्ञानं दानवामवासरगणैः संपूजितं स्फुर्जितं,ज्ञानादिक (ठ) समृद्धिरूप सुकला मृणामिहानृत्रमु । ज्ञानं चेंदुरिवांतरं वितिमिरं सौभाग्यभाग्यास्पदं कल्याणैकनिकेतनं तदथवा कल्पद्रुकल्पं सदा ।।१।। इत्येतङ्गसमुखतो निशम्य श्रुत ज्ञानमेव फलं विज्ञाय श्राविका भक्तिभरश्राविका तद्भावबदर्शनात् संजातहर्षप्रकर्षा आत्मश्रेयसे सर्वसिद्धांतोद्धारसरांसि हसंदे-हद्रुमछेदननिशितकुठारधारां भव्यजनमनःप्रमोदकारिकां । **श्रीशतपदिका**भिधानपुस्तिकां लेखयित्वा वाचनाचार्यमिश्राणां वाचनाय प्रददौ इति, नंद्यात् मेरुर्हरिर्यावित्तिलकद्युतिदो दिशाम् । तावदेषा गुरुप्राज्ञैर्वाच्यमाना सुपुस्तिका ।।१।। छ ।। संवत १३२८ वर्षे आषाढ शुक्लपक्षे श्री**अणहिलपाट-**कपत्तने ठ० **वयजासुत** ठ० **सामंतसिंहेन** पुस्तिका लेखितेति भद्रं ।। छ ।।

महोपाध्यायश्रीविनयविजयगणिप्रणीतः

श्रीआनन्दलेखः ।

स्वस्तिश्रियां मन्दिरमिन्दिरालीमिन्दिन्दिरालीमिव यः पिपर्त्ति ।
रज्यत्प्रवालायितपादपद्मं पद्मं यमाहुः प्रवितीर्णपद्मम् ॥ १ ॥

स्वस्तिश्रियः सद्मनि यत्पदाब्जे रेजे नखानां ततिरच्छकान्तिः ।
दिशां दशानामपि सुन्दरीणामादर्शमालेव मणिच्छटेव ॥ २ ॥

कर्णोपकण्ठे किल कुन्तलाली कलिन्दकन्येव विभाति यस्य ।
स्वतातसन्तापमपाचिकीर्षुर्विज्ञप्तिमेषा चरिकर्ति नूनम् ॥ ३ ॥

जटाच्छटा राजति राजतीनशिरस्तटे बालकलिन्दजेव ।
वृषाङ्कमौलीस्थलमन्दिरायाः स्पर्द्धातिरेकान्नु सरिद्वरायाः ॥ ४ ॥

यत्कर्णयोर्नूनमनूनकान्तिच्छटाच्छलाच्छसति सूर्यजेति ।
बन्धोर्मदीयस्य नृशंसभावं, शुभोपदेशेन निवर्तयेश ! ॥ ५ ॥

यमी तमीश्यामशिरोजमालामिषादिदं वक्ति नु यस्य कर्णे ।
सन्तापिता पापिभिरीश ! तापी, जामिर्मदीया बत किं करोमि ? ॥ ६ ॥

यमीयमीशं श्रुतिमूललग्ना वक्तीति केशावलिछद्मतः किम् ।
समादिशेदं दुरितेन केन, प्रभोऽन्वहं खे भ्रमणं पितुर्मे ॥ ७ ॥

गङ्गातिगौरी हरचित्तचौरी, हसत्यसौ तात ! तरङ्गभङ्गैः ।
भामण्डलस्पृष्टशिरोजराजीमिषात् स्वतातं यमजामिराह ॥ ८ ॥

प्रतिष्ठिता भावलये यदीये, विभाति भातिप्रगुणेऽलकाली ।
इदं निरीक्ष्य द्रुतजाततातभ्रान्त्या किमालिङ्गति तारणेयी ॥ ९ ॥

खलेन भिन्ना हलिना हलेन, बलेन नंष्ट्वा शरणं प्रपन्ना ।
विभाति पृष्ठे यमुनैव यस्य, शङ्केऽलकानां विततेश्छलेन ॥ १० ॥

यदीयभामण्डलमध्यलग्ना न साऽलकाली शमनस्वसेयम् ।
गौरत्ववाञ्छावशतस्तटाकपाकभ्रमान्मज्जति लज्जितेव ॥ ११ ॥

॥ अथ चित्रप्रक्रमः ॥

जयिन्नयिन् ! जय श्रीमन् ! भाविनां भावुकप्रदः ।
दयादो दोषदर्भौघदवकल्पो वरान्वयः ॥ १२ ॥ (पूर्णकलशः)

जैयाय यतते तेऽहो यावता शशभृच्छ्रियः ।
यता हि सततं ज्योत्स्ना यशः सज्जिनविश्वपाः ॥ १३ ॥ (अर्द्धभ्रमः)

जैहि तापरयव्यापां जन्मोपनतविष्टपाम् ।
पापनन्दिं जिनेताघपारतैत्वनिधेऽनघ ! ॥ १४ ॥ (छत्रम्)

जैराघरीन्मनःशुद्ध्या जयन्नतनराऽनिघैं ! ।
घनचक्षद्ध्वनिर्जीयात् सुतीव्रव्रतवान् जिनः ॥ १५ ॥ (शरः)

जलधौ नौरिव ज्ञान् यस्तारयत्यवलम्बनम् ।
न तेन्द्रः स प्रभुः सिद्धिं दद्याद् विश्राणिताब्धिजः ॥ १६ ॥ (धनुः)

जनयन्ति मुदं ते श्रीजिनोद्धाविरुचिव्रजः ।
जस्तदुर्ध्यानसन्दर्भे सर्वथा ममताङ्गज ! ॥ १७ ॥ (वज्रम्)

जम्भजिद् यं स्तुते नाकी कीरो द्रुमिव तं भज ।
जराभीतोऽवतंसेन सेव्यं देवैस्तु राजभम् ॥ १८ ॥ (शक्तिः)

जडा मनुजराज्यार्त्तियोगे वीक्षेत राशिभम् ।
भजन्ते न जिनं देवं वरेण्याङ्गं गताश्रवम् ॥ १९ ॥ (भल्लः)

जलज्वलनचौराविर्भूतं सर्वारिसम्भवम् ।
बम्भज्यते भयं यस्य नाम्ना सिद्ध्यै स वोऽस्त्वजः ॥ २० ॥

जनाय सेविनेऽम्भोजवासां देहि वृषध्वज ! ।
जवेन सारहारश्रीर्वराक्षिरुचिरक्षितः ॥ २१ ॥ (द्वाभ्यां खड्गः)

जघान योऽघमन्हाय तममानं नमाम तम् ।
तथा यस्य मतिः कान्ता शावरागगरावशा ॥ २२ ॥ (रथपदम्)

---

१ अहो प्रभो ! यशः यावता शशभृच्छ्रियः जयाय यतते यत्सम्बन्धात् तावता ज्योत्स्ना यता-उपरता इत्यर्थः । 'यमू उपरमे' (सिद्ध०) इति वचनात् ।

२ हे जिन ! पापनन्दिं जहि । किम्भूताम् ? तापरयस्य व्यापो यस्याम् । पुनः किंविशिष्टाम् ? जन्मनि उपनतं विष्टपं यया । 'इताघपार !' इतः-प्राप्तः अघपारो येन सः ।

३ पारं तनोतीति पारतन् पारततो भावः पारतत्त्वम् । तस्य निधिः, पारतत्वनिधिः तस्यामन्त्रणम् । ४ नितरां हन्तीति निघः न निघः अनिघः " निघोद्घ-सङ्घोघनापघनोघ्नं निमिसरप्रशस्तगणात्याधानाङ्गासन्नम् ! " (सिद्ध० ५ । ३ । ३६) इति सूत्रेण सिद्धिः ।

५ हे जन ! हे मनःशुध्या जराघरीन् जयन्, हे 'अनिघ !' 'निघा-' बृहतिका निघं वर्त्तं ' इति बृहद्वृत्तिगत 'निघोद्घसङ्घोघ' (सिद्ध ५ ३ ३६) इति सूत्रवचनात् न विद्यते निघा निघं वा यस्येति ततः सम्बोधनम् ॥

जञ्जन्यते यकस्याङ्कयशसा शं महीस्पृशाम् ।
शान्तं जिनेन्द्रं सुशयं गम्भीरं नम विश्वपाम् ॥ २३ ॥ (मुशलम्)

जयन्त्यादिविभोः पाणिकरजा विजितोडुपाः ।
पालकाः कालपाः पाककम्पापाकररङ्कपाः ॥ २४ ॥ (शूलम्)

जपामदजयं येऽगुर्द्रागुद्रजगत्कृपाः ।
पान्तु नाभेयपादा मां पुण्येष्वाहितसौहृदम् ॥ २५ ॥ (हलम्)

जरागरातुरास्तेरु[1] त्वदधद् भिन्द्धि कामद ! ।
दम्भं दवदरं दस्युं दयोदयदयं दमम् ॥ २६ ॥ (चामरः)

जन ! स्पृहयसि स्वेभ्यो तदमुं सदयाग्रिमम् ।
मनसाननशीतांशुं शुभं जैनं नमोत्तमम् ॥ २७ ॥ (श्रीकरी)

जञ्जपूको[2] नतो येन तोयेश ! क्षिप सत्तम ! ।
मत्तसम्पन्निधे ! देव ! वन्दे मयि महोग्रिमम् ॥ २८ ॥ (शङ्खः)

जङ्गमं तं तरुं भ्रमश्चित्रं कृततमःशमम् ।
मन्दारातततदातृत्वं जिनं सततसम्पदम् ॥ २९ ॥ (श्रीवत्सः)

एभिः सप्तदशभिश्चित्रैः स्वगुरुनामगर्भितं अष्टादशारं चक्रं सम्पद्यते ।

अथ चक्रातिरिक्तानि चित्राणि—

जगतो हतभीराज जराभीरुं निहंस्यज ! ।
जस्यं हन्त भियो बीजं जवीयो विदितोऽङ्गजः ॥ ३० ॥ (कमलम्)

जन्तूनामभयं योऽदात् तं नौमीनमनंहसम् ।
सन्ततं ततसन्तापा पाता सदमसम्मदम् । ॥ ३१ ॥ (त्रिशूलम्)

नत्वा सत्वावबोधाय सोधमं जिनमादिमम् ।
देवदेवं तमेवाहं सेवे देवेश्वरार्चितम् ॥ ३२ ॥

---

१ हे प्रभो ! जरागरातुराः त्वत्–भवतः तेरुः–अतरन् ! तथा हे कामद ! दम्भं दवदरं दस्युं भिन्द्धि । त्वं किं कुर्वन् ? दयाया उदयं दयते–ददाति एवंविधं दमं दधत् ।

२ हे तोयेश ! तां–लक्ष्मीं ऊयते इति तोयः स चासौ ईशश्च तस्यामन्त्रणं हे तोयेश ! 'ऊय तन्तु-सन्ताने ' इति वचनात् । येन कारणेन अहं जञ्जपूकोऽस्मि गर्ह्यं जपतीति जञ्जपूकः 'गृलुप सदाचारे' इति वचनात् अपि नतस्तेन मयि अग्रिमं महः–ज्योतिर्लक्ष्मीं क्षिप–स्थापय ! हे आत्तसम्पन्निधे !

वासवाभिनत ! तन्तनोति ते स्तोत्रमत्रभवतः श्रियां पदम् ।
दम्भदोषरहितेन चेतसा मारुदेव ! वरवीरकुञ्जर ! ॥ ३३ ॥
तस्य हस्ते पदं श्रीविभो ! शाश्वतं, तच्चिदुद्रेकसश्रीकनित्योत्सवम् ।
तत्त्वतः पण्डितः सोऽञ्जसा यः स्तुते ते पदाब्जं विवेकी जिनाधीश्वर ! ॥ ३४ ॥
न लभेत स पामरलोकदरं रसिकं तमियर्ति च कामगवी ।
भिषजं भवभाविगदे भयदं दमवान् य इमं विनमत्यजरम् ॥ ३५ ॥ (तोटकवृत्तम्)
वामकामद्विषा जय्यमीष्टे वसुं सुप्रभास्योडुपो जन्तुकल्याणकुः ।
सङ्गसञ्ज्ञं जहौ यश्च तं वीवधं धर्मदः पातु मां यत्नतो नाभिजः॥ ३६ ॥
भजे भवन्तं गुणरत्नसिन्धुं धुतक्रुधं सुन्दर ! ते तदन्तम् ।
तं तीर्थराजं जवनाघपङ्कम्पप्रपञ्चाजजवं हरन्तम् ॥ ३७ ॥
वारां निधिं धिक्कृतकर्मपङ्क ! करोषि धेनुक्रममध्यबन्धुम् ।
धुर्यीहसं संसृतिनामधेयं यतीन्द्र ! विश्राणिततत्त्ववार ! ॥ ३८ ॥
भवन्नवनवर्ण्या स्याद् विना भाग्यं मितालक ! ।
कवेः कस्य कला कम्रा कर्मपङ्कहरा कल ! ॥ ३९ ॥
भदन्तं दन्तिदन्ताभकीर्तिं नम्रोस्म्यशावभम् ।
भग्नं भवभयं भद्रं भज भव्याऽभयो भव ॥ ४० ॥
इत्थं चामरयुग्मबन्धमधुरच्छत्रस्तवोरुस्रजा
श्रीमन्नाभिनराधिराजतनयं भक्त्युत्सुकोऽपूपुजत् ।
विश्वव्यापककीर्ति ' **कीर्तिविजय** ' श्रीवाचकाधीशितुः
शिष्योऽयं ' **विनयो** ' नयोज्ज्वलमतिः श्रेयः श्रियां सिद्धये ॥ ४१ ॥
[एतस्य सप्तदशचित्रगर्भितस्य चक्रस्य तदन्येषां च त्रयाणां
चित्राणां स्थापनाश्चित्रपट्टादवसेयाः ।]
इत्थं स्तुतो यः प्रथमो जिनेन्द्रः
सुरासुरैः खेचरभूचरेन्द्रैः ।
युगादिकाले व्यवहारचर्या–
महालताकन्दलनैककन्दः ॥ ४२ ॥

इति श्रीऋषभदेववर्णनम् ।

स्वस्तिश्रियां सन्ततिमिन्दुकान्तिर्निरस्ततान्तिः स तनोतु शान्तिः ।
यदङ्घ्रिपद्मे प्रणताऽमराली धत्ते मरालीपटलीविभूषाम् ॥ ४३ ॥
सुवर्णशालत्रयशालितस्य चतुर्मुखी संसदि यस्य भाति ।
चतुर्दिगुत्पन्नजनावनाय चतुष्टयी चन्द्रमसः किमेषा ॥ ४४ ॥
क्षणक्षणे भाविविभावनाय यस्योच्छलन् राजति पाणिपद्मः ।
नृत्यद्विजित्यौद्धुरमारवीरं तूणीरमेतन्ननु विश्वभर्तुः ॥ ४५ ॥
येनातिशौर्यान्निजमांसवस्नैः क्रीता तदानीं ननु कीर्त्तिकन्या ।
साऽद्यापि बालेव परिभ्रमन्ती चित्रं न केषां हृदि चर्करीति ॥ ४६ ॥
कपोतपोतावनहेतुयोगादुपार्जितो यः शुभकर्मपिण्डः ।
स चक्रितीर्थङ्करऋद्धिलब्धौ बभूव यस्य प्रतिभूः प्रचण्डः ॥ ४७ ॥
गर्भस्थितेनाऽपि हि येन जघ्ने विघ्नाः समस्ता भुवनेषु निघ्नाः ।
प्राभातिकार्कान्तरितोऽपि किं वा नार्कस्तमः स्तोममपाकरोति ॥ ४८ ॥
अपोहति स्मोदरमन्दिरोऽपि प्रत्यूहमङ्गीहितकल्पवृक्षः ।
हन्तुं गजं गर्भगतोऽपि सिंहः केनोत्सहेतोर्जितगार्जितोग्रः ॥ ४९ ॥
यन्नाममन्त्रस्मरणेन नैव गदापदाः स्युः समदाः कदापि ।
आस्तिक्यवाक्यश्रवणक्षणे वा दृष्टैव शान्तिर्विपभृद् विषाणाम् ॥ ५० ॥

तौ च — वृषभमृगवराङ्कौ ध्वस्तसंसारपङ्कौ
कनककमलकान्ती शान्तकर्मारितान्ती ।
त्रिभुवनजनगेयौ मारुदेवाचिरेयौ
नुतिविरचनयुक्त्या भूरिभक्त्या प्रणम्य ॥ ५१ ॥

इति महोपाध्यायश्री**कीर्तिविजय**गणिशिष्योपाध्याय -
श्री**विनयविजय**गणिना श्रीपरमगुरूणां प्राभृतीकृते
आनन्दलेखनाम्नि लेखप्रबन्धे 'स्वस्तिश्री
अमुकजिनं प्रणम्ये'ति प्रथमावयव-
व्यावर्णनरूपश्चित्रचम-
त्कारनामा प्रथमो-
ऽधिकारः ।

अथ श्रीपरमगुरु–तपागच्छाधिराजचरणतामरस–पवित्रतरश्रीस्तम्भतीर्थनगरवर्णनम्—

नन्दीश्वरस्वीकृतवापिकानां यदीयवाप्यः कलयन्ति लीलाम् ।
उत्तुङ्गशृङ्गप्रतिबिम्बदम्भादङ्गीकृता केशयशैलशीलाः ॥ ५२ ॥

आलापयन्तीव समेतबाला यदीयवाप्यश्चलवीचिमालाः ।
स्मिताननाः फेनततिच्छलेन खगारवैः स्वागतवाक्यवत्यः ॥ ५३ ॥

शशाङ्कभित्तादमलां स्वाभित्तिं विभाव्य तं जेतुमना महौजाः ।
यियासतीवोर्ध्वमदभ्रकान्तिर्मरुत्पथे वप्रभटो यदीयः ॥ ५४ ॥

वृत्ताकृतौ सारसुधातिरेके जयोद्धुरे वीक्ष्य यदीयदुर्गे ।
स्वतोऽतिरिक्तां परिखां विभाव्य शङ्के शशाङ्कः परिधिं दधाति ॥ ५५ ॥

अथवा—

यदीयदुर्गप्रचुरप्रतापाऽऽविर्भूततापातिशयादिदानीम् ।
शङ्के शशाङ्कः परिधिच्छलेन शेते मदीयान् जलकुण्डमध्ये ॥ ५६ ॥

अनेकशीर्षं विविधायुधाढ्यं यद्दुर्गमायान्तमवेक्ष्य चन्द्रः ।
भीत्याहयत् स्वं तदहो प्रसिद्धिरद्यापि सा ज्योतिषशास्त्रसिद्धा ॥ ५७ ॥

अथवा—

कलङ्कपङ्काबिलमस्थिरांगं मिथ्याभिमानादुदयन्तमिन्दुम् ।
वीक्ष्य क्रुधा वप्रविभुर्विचक्रे वपुर्महद्भीममनेकशीर्षम् ॥ ५८ ॥

इति वप्रः ।

विभान्ति यत्रोपवनानि वल्लीघनानि वेल्लत्पवनानि नूनम् ।
नृत्यन्ति नित्यं विशदास्पदातिप्रीत्या कृतार्थीकृतसम्पदानि ॥ ५९ ॥

उत्तुङ्गतालादितरूज्ज्वलेन पुरं यदुद्ग्रीविकया वनेन ।
विलोक्य हर्षादिव शीर्षमूहे विधूयते वायुधुतिच्छलेन ॥ ६० ॥

वनी यदीया नवनीतगौरैः सुमैः समन्तादवनीतलस्य ।
पूजां सृजन्ती निजमातृभक्त्या व्यक्तीकरोति स्वकृतज्ञभावम् ॥ ६१ ॥

तालादिसाला गगनाग्रलग्नाः समर्मराः किं गिरमुद्गिरन्ति ।
भो नन्दनादीनि वनानि यूयं गतानि किं मेरुमिमामपास्य ? ॥ ६२ ॥

धिग् धिक् समृद्धिं भवतामुदारमन्दारसारामपि दानशून्याम् ।
एतानि धन्यानि वनानि यानि फलादिभिः स्वैरुपकुर्वते क्ष्माम् ॥ ६३ ॥

युग्मम् ।

यत्रावटाष्टात्कृतिकारिणोऽच्छारघट्टमालाजपमालिकाढ्याः ।
तुलां दधत्युद्भटमन्त्रिकाणां निदाघघर्मोग्रपिशाचजैत्राः ॥ ६४ ॥

इति वनवर्णनम् ।

पुरं यदष्टादशवर्णशोभावभासितं सङ्गतसार्द्धवर्णाम् ।
दिवं जयत्यत्र किमद्भुतं स्यान्न कृच्छ्रजय्यो बलिना बलोनः ॥ ६५ ॥

वर्णागमोऽर्थातिशयेन योगो यत्रास्ति नो वर्णविपर्ययश्च ।
न वर्णलोपो न च तद्विकारस्तथापि यत्रेष्टपदार्थसिद्धिः ॥ ६६ ॥

विनोपसर्गं बहुधा तु यत्र धातोर्विशुद्धा द्विविधार्थसिद्धिः ।
पुरं कथं व्याकरणस्य जैत्रं पुरं नयच्चित्रमनन्ययार्थम् ॥ ६७ ॥

लसद्बहुव्रीहि सकर्मधारयं भृतं च तत्तत्पुरुषैर्बहुद्विगु ।
सदाव्ययीभावमविप्रयोगवद् द्वन्द्वं तथाप्यङ्ग न यत्समासवत् ॥ ६८ ॥

अविप्रयुक्तानपि विप्रयुक्तान् घनान् जनान् यन्नितरां बिभर्ति ।
अद्वन्द्वनामापि लसद्विलासिद्वन्द्वं विशालं च सुशालमेव ॥ ६९ ॥

यस्यातिचातुर्यवतः पुरस्य पुरः स नाकोऽपि पशूपमानः ।
युक्तं ततस्तस्य कृतं कवीन्द्रैर्गुणागतं गौरिति गोत्रमत्र ॥ ७० ॥

अथवा—

निरीक्ष्य यस्याः पुरतो भयेन लङ्कां सशङ्कां जलधौ निमग्नाम् ।
अवध्यतायै तविषोऽपि नूनं सुधीर्दधौ गौरिति नामधेयम् ॥ ७१ ॥

कदाप्यरङ्गं न ततोऽन्विताख्यं यत्राऽस्ति ' नारङ्गसरो 'ऽभिरामम् ।
गर्जन्निमज्जज्जयकुञ्जरोरुसिन्दूरपूरारुणितोर्म्मिमालम् ॥ ७२ ॥

शङ्के सपङ्केरुहमच्छनीरं निरीक्ष्य सुस्वादु सरो यदीयम् ।
क्षीरोदधिः क्लृप्तकलुषस्वरूपः क्षारोदधेः प्राघुणतामियाय ॥ ७३ ॥

पयोनिधिर्यामधिगम्य लीलानिकेतनं सुन्दरमिन्दिरायाः ।
स्थाने नरीनृत्यत इत्यपत्यप्रेमप्रकर्षो हि जने गरीयान् ॥ ७४ ॥

मदङ्गजायाश्चपलस्वभावमपाकरोदित्यधिकादजर्यात् ।
संलग्नवेलावलयच्छलेन यामालिलिङ्गेव मुदा पयोधिः ॥ ७५ ॥

पुरा मुरारिप्रमुखाणि पुत्रि ! स्थानानि तान्यस्थिरयोज्झितानि ।
अथेदृशं प्राप्स्यसि नेति गर्जन् पयोनिधिः शिक्षयतीव लक्ष्मीम् ॥ ७६ ॥

वार्धिर्जगादेन्दुमिदं प्रमादादभ्रङ्कषोदस्ततरङ्गहस्तैः ।
स्थिरस्वभावास्ति तवाऽत्र जामिर्मुधा किमु भ्राम्यसि तां दिदृक्षुः ? ॥ ७७ ॥

द्वीपान्तरोत्तीर्णविचित्रवस्तुभृतानि यस्मिन् वहनानि भान्ति ।
इह स्थिताया निजनन्दनायाः कृतेऽम्बुधिप्रेषितढौकनानि ॥ ७८ ॥

इति समुद्रः ।

यत्रानिशं भूरिविलासिलोकैरुत्कीर्णकृष्णागुरुधूपधूमैः ।
विधोरधो ध्यामलितं तलं यल्लक्ष्मेति लोकैः परिचिन्त्यते तत् ॥ ७९ ॥

यत्रापणश्रेणिषु सञ्चितानि मुक्ताप्रवालानि निजानि वीक्ष्य ।
वेलामिषाद् वारिनिधिः स्वदेहमास्फालयन् भित्तिषु पूत्करोति ॥ ८० ॥

यत्र च—

यदा यदा तुङ्गविहारशृङ्गे निषेदतुः श्रान्तिभिदेऽर्यमेन्दू ।
तदा तदाविःकुरुतः स्वकीयं खगस्वभावं प्रथितप्रभावौ ॥ ८१ ॥

प्रसह्य चेतोहरतामुपेतां यदा यदा यां परिहृत्य याति ।
तदा तदा सत्वरनुन्नरथ्यो दिनानि भानुर्लघयत्यवश्यम् ॥ ८२ ॥

यदा यदा यां समया समेति तदा तदा तैः कुतुकप्रकारैः ।
व्यग्रारुणानुन्नतुरङ्गराजिर्दिनाधिनाथो महयत्यहानि ॥ ८३ ॥

यत्रेभ्यगेहाश्चलकेतुचेलाः सूर्येन्दुतापाङ्कगदापनुत्यै ।
ध्रुवं व्यवस्यन्ति सदोपकारिलोकानुषङ्गात्तथास्वभावाः ॥ ८४ ॥

यत्रार्हतां वेश्मसु तुङ्गशृङ्गसुवर्णकुम्भावलिषु प्रविष्टः ।
क्रमाद् भ्रमन् राजति भानुमाली दमीयभिक्षाक इव प्रभायै ॥ ८५ ॥

यत्रातितुङ्गार्हतमन्दिरेषु शिरःस्फुरत्केतुमरुत्तरङ्गैः ।
रव्यादयः खेऽपि पथि श्रमघ्नीं ग्रहा महारामरतिं लभन्ते ॥ ८६ ॥

यत्रान्वहं श्रीजिनमन्दिरेषु पूजासु नृत्यन्मनुजानुवृत्त्या ।
नृत्यन्ति शृङ्गस्थितकेतवोऽपि समीरसम्पातधुतिच्छलेन ॥ ८७ ॥

इत्यालयान् यत्र बहून् विलोक्य सकेतुयष्टीन् गगनाग्रलग्नान् ।
नेशुर्विमानानि भयेन नूनं नाद्यापि दृग्गोचरमापतन्ति ॥ ८८ ॥

इति जिनमन्दिरेभ्यमन्दिरवर्णनम् ।

उपाश्रया यत्र वसन्मुनीशस्वाध्यायनिर्घोषनिकृत्तदोषाः ।
नयन्ति पोषं निपुणाङ्गितोषं धर्मक्षमानायकराजधान्यः ॥ ८९ ॥

उपाश्रयेषूर्ध्वमधित्यकानां लसन्ति सोपानपथं श्रयन्तः ।
मुमुक्षवः किं ग्रहचक्रचारमिच्छन्ति संवादयितुं जिनोक्तम् ॥ ९० ॥

अथवा—

यत्रासकृन्नित्यमधित्यकाग्रारोहावरोहौ मुनयः सृजन्तः ।
सुस्थां गुणस्थानकपङ्क्तिमन्थामारोढुमभ्यासमिव श्रयन्ति ॥ ९१ ॥

व्याख्यागवाक्षे यदुपाश्रयस्य विभान्ति येऽत्यन्ततता वितानाः ।
नित्यं गुरूपासनपुण्ययुक्ता मुक्तामयाः स्युः किमिवात्र चित्रम् ॥ ९२ ॥

विराजते यत्र सदोपदेशवातायनः काञ्चनकोशशाली ।
सिंहासनं शाक्रमिवाशु जेतुं युद्धे कुधेवोर्जितसज्जवर्मा ॥ ९३ ॥

इत्युपाश्रयवर्णनम् ।

क्षणक्षणे यत्र सभा विभाति विभातिसम्पन्नमहेभ्यसभ्या ।
कल्पद्रुमाणां पटलीव पुष्पफलोज्ज्वलाऽऽमोदमयी वदान्या ॥ ९४ ॥

गुरुक्रमाब्जोपनमन्महेभ्यकुमारकोटीरमणिप्रभाभिः ।
अकृत्रिमा चित्रिततोरणस्रक् चित्रीयते कस्य मनो न यत्र ? ॥ ९५ ॥

यत्रार्यलोकान् विलसद्विवेकान् सुरासुराकम्पितधर्मबुद्धीन् ।
निरीक्ष्य मन्ये बहुमन्यमाना न नाकिनः क्ष्मां चरणैः स्पृशन्ति ॥ ९६ ॥

उपासिका यत्र पवित्रगात्रा लसच्चरित्रा विशदागमज्ञाः ।
सुरूपशीलोन्नतिभङ्गकस्थाः शेषां त्रिभङ्गीमपहस्तयन्ति ॥ ९७ ॥

नानाविभूषाकुसुमावदाताः कौसुम्भवासः किशलालिरम्याः ।
दानप्रधानाः करचारुशाखाः स्ववैल्लितुल्याः किल यत्र नार्यः ॥ ९८ ॥
अस्मन्मुखैर्निर्जित एष चन्द्रो लज्जाजडो यास्यति कुत्र रङ्कः ।
इतीव चेलान्तरितास्यपद्माः पद्मोपमा यत्र चरन्ति वध्वः ॥ ९९ ॥
यत्राङ्गना काञ्चनभङ्गगौर्यः स्नेहोद्धता मन्दिरदीप्तिदिक्षाः ।
पतत्पतङ्गायितकामिनेत्राः कलामधुर्दर्पकदीपिकानाम् ॥ १०० ॥
अधर्म एको नगरे गरीयानस्मिन् सदा पुण्यपरायणेऽपि ।
पतन्ति यद्दक्षमृगेक्षणानां कटाक्षकुन्तैर्दलिता युवानः ॥ १०१ ॥
यत्रेभ्यगेहेषु चलापि लक्ष्मीः श्रेयोमहाश्रृङ्खलजालबद्धा ।
गन्तुं न शक्ता सितमर्कटीवालिन्देष्वटन्ती प्रकृतिं पिपर्ति ॥ १०२ ॥

इति स्त्रीपुंसवर्णनम् ॥

प्रथीयसी यत्र महाट्टवीथी निशीथिनीमप्यतिथीभवन्ती ।
तमोमयीं दीपकदीप्रपङ्क्तिर्ज्योतिर्मयीं कान्तिमयीं करोति ॥ १०३ ॥
यत्रापणाली विधवां निशां यद् व्यभूषयद्दीप्रमणिप्रभाभिः ।
परोपकारप्रवणाङ्गिसङ्गादहो सुसंसर्गगुणो गरीयान् ॥ १०४ ॥

अथवा—

यत्रापणश्रेणिषु दीपतेजः शशाङ्ककान्ता नितमामुपास्ते ।
चिरन्तनं तज्जडकान्तसङ्गाज्जातं जडत्वं किमपाचिकीर्षुः ॥ १०५ ॥
यत्रोरुधर्मोत्सवतूर्यनादकोलाहलै रथ्यतुरङ्गमानाम् ।
सन्त्रासविद् गच्छति दक्षिणेन रविः पुरीं यामथवोत्तरेण ॥ १०६ ॥

इति चतुष्पथवर्णनम् ।

तत्रेदृशि श्रीमति सर्वशत्रुवित्रासिभूमीश्वरशासितायाम् ।
विष्वङ् नभोमण्डलचुम्बिलुम्बिलताम्रवत्यां पुरि **ताम्रवत्याम्** ॥ १०७ ॥

इति महोपाध्यायश्री**कीर्त्तिविजय**गणिशिष्योपाध्याय-
श्री**विनयविजय**गणिना श्रीपरमगुरूणां
प्राभृतीकृते आनन्दलेखनाम्नि
लेखप्रबन्धे 'श्रीमति तत्रे' त्य-
वयवव्यावर्णनरूपोऽलङ्कार-
चमत्कारनामा द्वितीयो-
ऽधिकारः ।

अथोदन्तप्रक्रमः ।

सरोवरं यत्र मरुत्तरङ्गोच्छलत्तरङ्गोत्तरलं समन्तात् ।
अमुद्रमानेन समुद्रमानं समुद्रमानन्दि जिगीषु नूनम् ॥ १०८ ॥

महातटाकः कुतुकं दिदृक्षुर्वृत्या पुरान्तः प्रविशन् निषिद्धः ।
अद्यापि जाने स्थितयोस्तथैव तयोर्विवादस्तदवस्थ एव ॥ १०९ ॥

तटाकवृत्योर्भवतीह युद्धं तथ्यं तदेतत् कथमन्यथेत्थम् ।
वणिक् स नष्टो निकटाङ्गवासी युक्ता स्थितिर्नो कलहे ममेति ॥ ११० ॥

एकः सरस्तीरजलानुषङ्गी नमन्निदन्तालतरुः किमाह ।
मा प्लावयास्माँस्तव सेवकाः स्म सर्वैः सगोत्रैरहमाहितोऽस्मि ॥ १११ ॥

दृष्ट्वा सरोवारिभिराहतस्य मध्यस्थबब्बूलतरोः स्वरूपम् ।
तीरस्थतत्काष्ठमिषान्ममार त्रातुं सगोत्रानिव ताल एकः ॥ ११२ ॥

सरोजले सर्पति यत्र दर्पातिरेकतो नावससार वापी ।
उल्लोलकल्लोलभृतोदरी सा मग्ना बभूवैव कथावशेषा ॥ ११३ ॥

मध्ये ब्रुडन्ती सरसोऽम्बु वापी करेण भो ! मामवतेति वक्ति ।
पार्श्वस्थिता कण्ठनिमग्नमूलबब्बूलचूलाचलनच्छलेन ॥ ११४ ॥

वृत्तिर्यदीयाग्रगतुङ्गशृङ्गा शृङ्गारितानेकलताप्रसूनैः ।
हरिन्मणिव्रातविनिर्मितेवाऽन्तरान्तरारैरचनाविचित्रा ॥ ११५ ॥

शिरस्तिरः कम्पयतीव मानाद् यदा वृतिर्वायुधुतिच्छलेन ।
वप्रस्य सौन्दर्यमहो मदग्रे सत्या जनोक्तिः कपिशीर्षशालि ॥ ११६ ॥

यदा वृतौ द्राग् प्रियना मुकालकलासु पुष्पाणि विकासभाञ्जि ।
घनाभ्रकालेऽपि दिनावशेषं शंसंति यत्नाहितयन्त्रयुक्त्या ॥ ११७ ॥

वृत्या वृतं संस्कृतिचातुरीतं गोरूपयुक्तं दधिशब्दशालि ।
सूत्राञ्चितं वर्णविभक्तिहारि यकत् पुरं व्याकरणानुकारि ॥ ११८ ॥

चतुष्टयी यत्र जिनालयानां हिमालयानामिव मालयानाम् ।
विभज्य दत्ता निलया जिनेन वादे नु धर्मस्य चतुर्विधस्य ॥ ११९ ॥

राज्ञो गृहे स्यान्महिषी किलैका गृहे गृहे ता इह सन्ति बह्व्यः ।
जनैः समस्तैरभयैरुपेतं द्विधा ततो राजगृहाधिकं यत् ॥ १२० ॥

प्रतिप्रभातं पृथुगोरसानां विलोलनोद्भूतनिनादवादैः ।
निद्राविमोक्षो भवतोश्वराणां तथा गवां भाङ्कृतिगीतनादैः ॥ १२१ ॥

गृहे गृहे यत्र च कामगव्यो गृहे गृहे यत्र पयः सुधाश्च ।
हरीश्वराणां गणना न यत्र कथं न नाकादतिरिच्यते तत् ? ॥ १२२ ॥

उत्तालहिन्तालतमालतालरसालसालावलिशालितान्तम् ।
नितान्तमन्तः करणं जनानां प्रसाधयत्यध्वचितश्रमाणाम् ॥ १२३ ॥

श्री 'हीरसूरीश' वचोऽतिरक्ताः सुश्रावका यत्र वसन्ति भक्ताः ।
दानप्रधानाः श्रुतिसावधानाः सम्यक्त्वरत्नं विशदं दधानाः ॥ १२४ ॥

यत्रास्तिकानां हृदयालवाले धर्मद्रुमः पुष्यति पुष्पमाली ।
समृद्धयः सद्मनि तत्फलानि पुष्पाणि नानाभरणानि देहे ॥ १२५ ॥

किं वर्णयामश्च गुणान् यदीयान् श्रीपूज्यपादैरनुभूतपूर्वान् ।
वस्तुष्वदृष्टेषु हि वर्णनं स्यात् प्रायश्चमत्कारकरं कवीनाम् ॥ १२६ ॥

तथापि दिङ्मात्रमुदाहरामः फलं कवित्वस्य मुदा हरामः ।
ऋते कवित्वादफलं वहेम प्राज्ञत्वमेतत् तु यदाह **हेमः** ॥ १२७ ॥

तथा च **श्रीहेमसूरिपूज्यपादाः**—

" वक्तृत्वं च कवित्वं च विद्वत्तायाः फलं विदुः ।
शब्दज्ञानादृते तन्न द्वयमप्युपपद्यते ॥ "

इति **बारेजा**पुरवर्णनम् ।

ततः पुराद् **द्वारपुरा**भिधानाद् द्वारोपमाद् द्रंगपरीसरस्य ।
सानन्दमुल्लासपयोदवृष्टिप्रोद्भूतरोमाञ्चमनोरमाङ्गः ॥ १२८ ॥

उत्कण्ठया प्रस्फुटया पटीयान् हर्षाश्रुनीरप्लुतनेत्रपत्रः ।
पवित्रगात्रः पृथुभक्तिभिश्च विनम्रमौलिर्विनयोदयेन ॥ १२९ ॥

ललाटपीठीघटिताञ्जलीकस्त्रिधा विशुद्धिक्षमितव्यलीकः ।
औत्सुक्यतो विस्मृतशेषकृत्यः सदाश्रवः श्रीगुरुनित्यभक्तः ॥ १३० ॥

अनादृतावाससुदर्शनाख्यासंख्यामिताऽऽवर्त्तकवन्दनेन ।
प्रणम्य सम्यग् **विनयो** विनेयो विज्ञप्तिपत्रं वितनोति भक्त्या ॥ १३१ ॥

चतुर्भिः कलापकम् ।

यथाकृत्यं चात्र—

मार्तण्डभूपागमनोत्सवेऽग्रपथं तदग्रेसरवैनतेयः ।
चक्रेऽतमः पङ्कमपास्ततारापाषाणखण्डं शुचिकुङ्कुमाक्तम् ॥ १३२ ॥

आच्छाद्य गम्भीरतमोऽम्बरेण निजं प्रसुप्तेषु जगत्सु नेता ।
अर्कः करैः कर्कशकर्कराभैः प्राबोधयत् स्वस्वनियोगहेतोः ॥ १३३ ॥

जगत् तमः श्यामलयत्यगौरं रक्तश्च रक्तं कुरुते पतङ्गः ।
यो यादृशः स्यादपरं स्वसङ्गात् स्वतादृशं वै न चिरात् करोति ॥ १३४ ॥

सद्वृत्तता भङ्गमनीयुषां यः कष्टप्रसङ्गो न चिरं हि तिष्ठेत् ।
इतीव वक्तुं पुनरारुरोह पूर्वाद्रिसिंहासनमंशुमाली ॥ १३५ ॥

अथवा—

जगन्त्युपद्रूय कुतः प्रनष्टं तमः क्व ताराः शशिनः सहासाः ।
इतीव पूर्वाद्रिशिरोऽधिरुह्य प्रद्योतनः पश्यति कोपताम्रः ॥ १३६ ॥

ध्वस्ताः समस्ता रिपवस्तमांसि क्षुण्णानि सूरेण किलैककेन ।
गुणानुरागादिति दिग्मृगाक्ष्यः क्षिपन्ति बालातपकुङ्कुमानि ॥ १३७ ॥

तत्र प्रतिप्रातरुदीतभानौ भानौ सुराधीशदिगद्रिसानौ ।
सा नौरिवोदेति सभा सभार्यसभार्यसभ्या सुकृतैकलभ्या ॥ १३८ ॥

तत्र— षड्भिः कुलकम् ।

स्वाध्यायतः स्वायतिसुन्दरस्य व्यनज्मि 'जीवाभिगम'स्य सूत्रम् ।
अर्थापयामि प्रथितोत्तरादेर्नूत्नां प्रशस्ताध्ययनस्य वृत्तिम् ॥ १३९ ॥

श्रीशासनोन्नत्यविभावनानां प्रभावनानां भवनं कदाचित् ।
सानन्दमानन्द समास्तिकानां नन्द्या अनिन्द्याश्च महामहौघाः ॥ १४० ॥

शुद्धोपधानोद्वहनं प्रधानशिवोपधानप्रतिमं जनानाम् ।
अध्यापनं चान्तिषदां सुयोगक्रियाकृतिः शोधनबोधने च ॥ १४१ ॥

एवं च सर्वेष्वपि धर्मजेषु कार्येषु निष्पत्तिवधूवरेषु ।
क्रमागतं पर्व सुपर्वसेव्यं श्रीवार्षिकं पर्वशिरःकिरीटम् ॥ १४२ ॥

तत्रापि—

दिनानि भानुप्रमितानि जन्तुजीवातुजीवाभयडिण्डिमश्च ।
तिलन्तुदानामथ मैनिकानां क्रियानिवृत्तिः सुकृतप्रवृत्तिः ॥ १४३ ॥

स्नात्राण्यमात्राणि जिनालयेषु पूजाः पुनः सप्तदशप्रकाराः ।
विहायितं गायनयाचकानां सद्भावनाभावननर्त्तनानि ॥ १४४ ॥

क्षणैः क्षणाढ्यैश्च निधानसङ्ख्यैरर्थापनं कल्पसुबोधिकायाः ।
विचित्रवादित्रपवित्रनृत्योत्सवेन तत्पुस्तकपूजनं च ॥ १४५ ॥

चतुर्थषष्ठाष्टमपञ्चकाष्टाहिकादिकानां तपसां विधानम् ।
क्रमेण चैत्यप्रणतिः सगीताविगीतसङ्गीतकयुग्महौघैः ॥ १४६ ॥

अखण्डखण्डापुटनालिकेरप्रभावना स्मेरतराब्दिकीह ।
कृता प्रतिक्रान्तिरनेकलोकैः साधर्मिकाणां क्षमणं मिथश्च ॥ १४७ ॥

अनेकपक्वान्नसुपाकशाकघृतामृतस्यन्दिदलैः सनैः (?) ।
पयःप्लुताभिः पृथुकप्रथाभिर्विशालशालिस्फुटदालिभिश्च ॥ १४८ ॥

ततः परं गौररसाक्तकूरैस्ताम्बूलदानैर्बहुमानपूर्वम् ।
सधर्मणां वेश्मसु भोजनानि स्त्रैणस्य पौंस्नस्य च नैकवारम् ॥ १४९ ॥

महामहैरेवमनेकधर्मकर्म प्रथाशालिभिरारुरोह ।
संसिद्धिशालाशिखरं सुखेन तद्वृद्धमप्यद्भुतमेतदत्र ॥ १५० ॥

सम्प्रत्यपि प्रीतिकराणि धर्मकर्माण्यविघ्नान्युपयन्ति सिद्धिम् ।
सर्वत्र तत्रोत्तमपूज्यपूज्यपादप्रसादोदय एव हेतुः ॥ १५१ ॥

इति महोपाध्यायश्री**कीर्तिविजय**गणिशिष्योपाध्याय—
श्री**विनयविजय**गणिना श्रीपरमगुरूणां प्राभृतीकृते
आनन्दलेखनाम्नि लेखप्रबन्धे 'उदन्त'
व्यावर्णनरूपस्तृतीयोऽधिकारः ।

अथ श्रीपरमगुरुगच्छाधिराजवर्णनम्—

रूपं यदीयं मदनोऽनुकर्तुं हराक्षिवन्हौ स्वतनुं जुहाव ।
अनङ्गतां प्रत्युत सोऽथ लेभे नाभाग्यभाजः फलिनोऽभियोगः ॥ १५२ ॥
ज्ञातं कुजातं बत पुण्डरीकमिन्दुः कलङ्केन मलीमसश्च ।
स चात्मदर्शो मसितानुषङ्गी केनोपमानं लभतां तदास्यम् ? ॥ १५३ ॥
तैस्तैस्तपोभिर्ध्रुवमात्मदर्शो जातोऽपि लोके जनदर्शनीयः ।
पृष्ठे मुखे चेत् सदृशोऽभविष्यत् तदा यदास्योपमतामयास्यत् ॥ १५४ ॥
मुखं सुखं तर्जितवद् यदीयं ततः परिच्छिन्नमृदुस्वभावम् ।
व्यग्रं समग्रं ग्रसते शशाङ्कं स सिंहिकाया वितनुस्तनूजः ॥ १५५ ॥
यदा शरत्पार्वणशर्वरीशं विधिर्विधत्ते घुसृणावलिप्तम् ।
तदा लभेताऽपि न वा लभेतां सद्वन्द्ववस्तुप्रथनप्रतिष्ठाम् ॥ १५६ ॥
सूरः स शूरो बहुशो यदेष स्नेहेन सेहे ननु शाणपीडाम् ।
इन्दुर्जडोऽयं यदि तां सहेत तदा लभेतैव यदास्यदास्यम् ॥ १५७ ॥
निरूप्य रूपं रुचिचारु यस्य कामं निकामं कतमः स्तवीति ।
ततः स विश्वोपरि दूनचेताः सर्वं शरैस्ताडयतीति मन्ये ॥ १५८ ॥
यशः........प्रसराभिभूतौ यस्य प्रशान्तोप्ररुचोऽर्यमेन्दू ।
एकर्क्षगौ मन्त्रयतः समानापमानदुःखौ ननु........मासि ॥ १५९ ॥
यत्प्रतापविजितोऽनलोऽविशद् युक्तमश्ममणिकाग्रपङ्क्तिषु ।
वाडवाग्निचपले किमकार्ष्टां जग्मतुर्जलधिवारिददस्यू ॥ १६० ॥
श्रेयोनिधानं च युगप्रधानोपमानमानन्दितभव्यलोकम् ।
न कः स्तुते यं जगदर्चनीयाऽभिधानमुद्दामगुणासमानम् ॥ १६१ ॥
चित्रं यदीये हृदये समस्तो माति स्म सिद्धान्तसरिद्विवोढा ।
अचिन्तनीया ऋषयोऽथवा किं नापोप्यदब्धिं स्वमदादगस्त्यः ॥ १६२ ॥
यदीयगाम्भीर्यजितः स तोयनिधिर्न्यधात् तीरतरत्तृणौघः ।
तृणं मुखे युक्तमिलाविलोठी पराजितानामियमेव रीतिः ॥ १६३ ॥

सुधां नगारिः कमलां मुरारिर्जह्रुः सुराश्चोत्तमधेनुमुख्यम् ।
शेषं गभीरत्वमपाहरद् यो मन्येऽम्बुधिस्तल्लवणावशेषः　॥ १६४ ॥

भवेद् गभीरत्वमथाम्बुधौ चेत् कथं मुधा गर्जति सारशून्यः ।
विचारसारं तत एतदेव येनैव जह्रेऽस्य गभीरभावः　॥ १६५ ॥

यदीयवाणी विजिताऽभिभूता स्पर्द्धा भवत्या न ममेति वक्तुम् ।
पातालमुत्तालगतिर्विवेश सुधा हि दिव्यं ननु कर्तुकामा　॥ १६६ ॥

सुवर्णरूपापि यदीयवाणी लौही कृपाणीव विषादवृक्षम् ।
समूलमुन्मूलयतीति चित्रं न कर्कशो वा कतमः स्वकृत्ये　॥ १६७ ॥

दधाति दिव्याय विधोः सुधापि यद्वाक्यमीतायसमुष्णगोलम् ।
न मन्यसे चेदवलोकयोर्ध्वं नादर्शकार्यं करकङ्कणे स्यात्　॥ १६८ ॥

यद्गीर्जितोऽपीक्षुरदक्षचेता दधौ शिखां मूर्ध्नि वृथाभिमानात् ।
यन्त्रेषु निष्पीड्य ततोऽस्य सारमादीयते क्रुद्धतमेन धात्रा　॥ १६९ ॥

स्पर्धावतीं यद्वचसा सितां तां ज्ञीत्वादवन्ध्यां स विधिर्विधिज्ञः ।
नित्यं शलाकाप्रविभिन्नकर्णां पुरे पुरे चारु करोत्यटन्तीम्　॥ १७० ॥

धियश्चतस्रो हृदये यदीये कीर्तिः श्रुता दिक्षु च तावतीषु ।
धर्मं चतुर्धोपदिशञ् जनानामहो सुचातुर्यमदो यदीयम्　॥ १७१ ॥

सिद्धान्ततत्त्वानि नतानि तानि स्थितानि हार्नि लवतो लभन्ते ।
यस्मिन्नतः स्मेरतरा प्रसिद्धिर्युक्तं जगत्यां धुरि कोष्ठबुद्धेः　॥ १७२ ॥

जातेन येन प्रथिता बभूव **श्रीरोह**नाम्नी नगरी वरेण्या ।
वैडूर्यरत्नेन विदूरभूमिर्हीराङ्कुरेणेव च रोहणाद्रिः　॥ १७३ ॥

श्रीवन्तवंशोधिगतप्रशंसः प्रदीपिकादण्डसुहृत् कथं नो ।
यच्छृङ्गसङ्गी भुवनप्रकाशमङ्गीकरोति प्रतिराट् प्रदीपः　॥ १७४ ॥

शृंगारदे यं तनयं प्रसूय रत्नप्रसूकीर्तिमधाद् वधूषु ।
यथेह रिक्तास्वपि चारुमुक्ता शुक्तिर्यशः शुक्तिषु मौक्तिकानाम्　॥ १७५ ॥

प्राग्वाटवंशे हि पुटानि सप्त स्थाने यदीदृग् नररत्नपात्रम् ।
यक्षेन्द्रियेष्वक्षिण पिधानगुप्तिः सर्वो हि रत्नस्य करोति यत्नम्　॥ १७६ ॥

औन्नत्यधैर्यादिसमप्रसारमादाय मेरुर्विजितः स येन ।
शृङ्गप्ररूढाङ्कुरभारदम्भात् तृणानि मूर्ध्ना वहते दरिद्रः ॥ १७७ ॥

यस्योपदेशस्य रसान्निपीय माध्वीकमाधुर्यमदस्य जैत्रान् ।
जनाः स्वकर्णाञ्जलिभिः स तृष्णां छिन्दन्ति संसारतपर्तुपूर्त्तिम् ॥ १७८ ॥

सूरोऽपि दूरोज्झितपापतापः सोमोऽपि नो स्वीकृतदोष एव ।
सुमङ्गलोऽप्यङ्ग गतौ न वक्रो बुधोऽपि सौम्योऽपि न मित्रदस्युः ॥ १७९ ॥

गुरुः सुराणामपि नास्तिको नो न केकराक्षः कविरप्यनस्तः ।
शनैश्चरो नाप्यसितो न मन्दो यश्चातमाः सद्गतिसैंहिकेयः ॥ १८० ॥

केतुं न के तुङ्गगुणं वदन्ति प्रमोदहेतूदयमप्यमन्दम् ।
एवं विरोधोपचितोऽपि नित्यं यश्चाविरोधी विदितो द्विधापि ॥ १८१ ॥

यदतिशायिगुणान्निजबिन्दुभिर्गणयितुं भुवमेति नवाम्बुदः ।
शरदि याति पुनर्गतसङ्गरस्त्रिजगतीहसिनो भसितोज्ज्वलः ॥ १८२ ॥

लसति यस्य रजोहरणं करे रजनिजानिकरोत्करसुन्दरम् ।
दयितया दयया प्रणयार्पितं विततकेलिसरोजमिवोज्ज्वलम् ॥ १८३ ॥

सकलजीवकृपालयपालक बहुलपक्षभयादभयाश्रमाम् ।
मुखपटीमिषतः शशिनः कला इति वदन्ति नु यं श्रुतिसङ्गताः ॥ १८४ ॥

अथ शेषचित्रमक्रमः—

नाकपाडकुटकाकरती र सामला कडकडा जडपाडी ।
लोकपाटति सुखाटनमूर्तिर्यस्य कीर्त्तिरिह हंसवलक्षा ॥ १८५ ॥

(भाषाचित्रम्)

पुष्पुभालतुहिनद्युतिभित्तं यस्य लुण्टति विचक्षणचित्तम् ।
यस्य कीर्त्तिसुरशैवलिनी च यां पवित्रयितुमुक्तमिहान्यत् ॥ १८६ ॥

(गुप्तक्रियाकम्)

यस्य नामपरमोत्तममन्त्रादश्नुते गुरु सुखं जनराजी ।
यस्य लोचनचमत्कृतिनुन्ना सप्रयासबनवासमुपास्ते ॥ १८७ ॥

(गुप्तकर्तृकम्)

आस्यमस्य कमलादमलाक्षं चन्द्रपङ्कजरुचामभिभूत्या ।
यस्य शस्यगुणमत्र च कर्म सक्रियापदमुदीरितमेव ॥ १८८ ॥

(गुप्तक्रियाकर्मकम्)

यस्सुमाशुगशरैरपीडितस्तर्जिताखिलसुरासुरशक्रैः ।
पण्डितैर्नरवरैरधुनोक्तं शेषवाच्यमवधेहि सुबुद्धे ! ॥ १८९ ॥

(गुप्ताव्ययक्रियाकम्)

प्रातरेव परमं पुरुषेषु यं नमस्यति नमस्यपदाब्जम् ।
स क्षणेन कुशलाकलय त्वं युज्यते यदिह तत्तु मयोक्तम् ॥ १९० ॥

(गुप्तान्वयम्)

यस्यास्यकान्तेः किमसि प्रतिष्ठां लिप्सुर्वराकाऽनिशमुज्ज्वलायाः ।
त्यजेतरेच्छां सुखमद्धि भिक्षां बुधात्रसम्बोधनमस्ति गूढम् ॥ १९१ ॥

(गुप्तामन्त्रणम्)

किमर्ज्यते दक्षभृशोद्यमेन सा या न स्थिरेति प्रथिता भुवि श्रीः ।
प्रणम्य यं संसृतिवारिधिं तर व्याप्तं बुधास्मिन् करणं सुगुप्तम् ॥ १९२ ॥

(गुप्तकरणम्)

महायशोभासुररम्यमूर्त्तेर्येनानतौ यस्य पदौ जनेन ।
सत्याकृतिस्तेन शिवोद्भवाय दत्तात्र गुप्तं बुध ! सम्प्रदानम् ॥ १९३ ॥

(गुप्तसम्प्रदानम्)

मा गा विषादं भज सुप्रसादमानन्दनं पश्य तदाननेन्दुम् ।
मिथ्यात्वरूपाद् विरमाऽतिनिन्द्यादत्रास्त्यपादानपदं पदान्तः ॥ १९४ ॥

(गुप्तापादानम्)

कस्य भाग्यभरितस्य तनूजा यस्य चित्तमहरत् स्वरसेन ।
शीलसारघनसारसुगन्धेरुत्तरं कथितमेव वयस्य ! ॥ १९५ ॥

(गुप्तसम्बन्धम्)

रे पुष्पायुध ! माऽऽयुधं चपलय भ्रान्तिं वृथा मा कृथाः
पापव्यापमपाकुरुष्व कुमते ! किं वा छलेनाऽमुना ? ।
रे दूरीभव मोहसन्ततमृषावादिस्वभावं त्यज
ध्वस्ताज्ञानतमोभरेऽत्र विबुधाधारं सुगुप्तं वद ॥ १९६ ॥

(गुप्ताधारम्)

ततां तान्तातति तात ! ततोऽतीततुतेऽतति ।
तुतात्तां तात्तते्ऽन्तान्तः तेति तत्तुतुती तत ॥ १९७ ॥

(एकव्यञ्जनचित्रम्)

नमामीनममानानाममानमुनिमाननम् ।
नामुं नाम नमेन्नोना नुन्नामो नूनमुन्ननु ॥ १९८ ॥

(द्विव्यञ्जनचित्रम्)

सदाकारानुहारा च महाभुजगभूषणा ।
स्तौति यं यः................सुन्दरा तस्य मन्दिरे ॥ १९९ ॥

(बिन्दुच्युतकम्)

कमलकलकरवदन ! सततहतमदमदन ! ।
नमदमर ! गतसमर ! जय सजय ! गणधर ! ॥ २०० ॥

(एकस्वरचित्रम्)

सदा सदानन्दनिधानदानं तनोतु नेता सततं नतानाम् ।
तदा सनासीनसनानुनीत नीतेनिताधीतिधनाधुनेन ॥ २०१ ॥

(दन्त्यस्थानचित्रम्)

सिद्धान्तवारां निधिमृद्धशुद्धिं लब्ध्या समानं गुरुगौतमेन ।
महेम हेमाम्बुजगर्भगौरदेहं मुदे हन्त मुनीनमेनम् ॥ २०२ ॥

(अतालव्यव्यञ्जनचित्रम्)

विसारि सारसे सारं संसारोरुसुराश्रये ।
सुरेश्वरहरिं सेवे **हीरसूरि**शिशोः शयम् ॥ २०३ ॥

(अवर्ग्यचित्रम्)

मदनमानधनापनुदं दमानुपमचित्तमनेकपगामिनम् ।
भजत भो जनताः ! कठिनापदाभिदमखण्डगुणं गणभूपतिम् ॥ २०४ ॥

(अनवर्ग्यचित्रम्)

श्रीबन्तनन्दनं वन्दे शान्तरां रुचिसुन्दरम् ।
दयाविधिधनं मेनाभीवमंशुदिवं विशाम् ॥ २०५ ॥

श्रीवशांधितनारावं रविवन्दितमं नमेः ।
विदेदः सुधनं भीरु यावःशावशुचिनदम् ॥ २०६ ॥

(द्वाभ्यां तुरगपदम्)

इत्थमनेकविवेकिजनैर्यैश्चित्तचमत्कृतिकोविदचित्तैः ।
वाङ्मनसाविलतापगमाय पूजितपादयुगाः सुकवित्वैः ॥ २०७ ॥

तथा च—

सुदर्शनाः सारसुधागिरो ये ऋद्धचञ्जिनीनर्ममरालकल्पाः ।
शरत्समानाः कुशलेन्दुदीप्तौ जगत्रयीशान्तिकृतावधानाः ॥ २०८ ॥
सुमेरुधीराः शशिवामरौघैर्नता नयाढ्या विमलाशयाश्च ।
ज्येष्ठश्रियः सद्गतिहस्तिमल्लाः कुमारशौर्याः सुकुमारदेहाः ॥ २०९ ॥
क्षेमद्रुवृद्धौ कुशला विवेकचन्द्रोज्ज्वलाः प्रीतियुता दयायाम् ।
चारित्ररत्ने कृतयत्नयोगाः कल्याणलक्ष्मीकुमुदेन्दुकान्ताः ॥ २१० ॥
तैस्तातपादैर्गणशीतपादैर्गतप्रमादैर्घनधीरनादैः ।
स्वाज्ञान्तिषत्कौशलशालिपत्रप्रसादनैरेष शिशुः प्रमोद्यः ॥ २११ ॥
त्रिधा त्रिसायं प्रणतिर्मदीयाऽवधारणीया महनीयपादैः ।
सा चाऽनुपूर्वा व्रतिनां प्रसाद्या श्रीपूज्यसेवाविधिपावितानाम् ॥ २१२ ॥

तत्रापि— सुदर्शनेत्याद्यकवित्वमध्ये विशेषणः सूचितनामकानाम् ।
बुधाग्रणीनां परयोर्द्वयोश्च संसूचितानां गणिनां मुनीनाम् ॥ २१३ ॥

किञ्च— समानकनकच्छटाप्रकटकान्तिदेवेन्दुभि-
नेताञ् जिनवचोऽञ्चितान् विनतवार्द्धिनेमीश्वरान् ।
इमैर्गुरुविशेषणैरभिहितान्वयाः साधवो
नमन्ति गणभूपतीन् नमति चाऽत्र सङ्घोऽखिलः ॥ २१४ ॥

इति महोपाध्यायश्रीकीर्तिविजयगणिशिष्योपाध्याय-
श्रीविनयविजयगणिना श्रीपरमगुरूणां प्राभृतीकृते
आनन्दलेखनाम्नि लेखप्रबन्धे 'तैस्तातपादैः'
इत्याद्यवसरप्राप्तश्रीगुरुवर्णनरूपः स्वर१
व्यञ्जन२ स्थानगतिनियन्त्रणच्युत-
गुप्तादिशेषचित्रचमत्कारनामा
चतुर्थोऽधिकारः ॥

अथ लेखप्रशंसा ।

दूरेऽप्यदूरे इव यो जनानां ददाति मित्रप्रियसङ्गसौख्यम् ।
मनोविनोदी विरहापनोदी लेखस्तु साक्षाद् वरलेख एव ॥ २१५ ॥

स श्यामवर्णो रसपूरपूर्णः सुहृन्मनःकेकिकृतप्रमोदः ।
चिन्तातपक्लान्तिनिराकरिष्णुः कथं न लेखो जलदोपमानः ? ॥ २१६ ॥

स्वगोविलासैः प्रियचित्तपद्मान् विकासयंश्च भ्रमणस्वभावः ।
असंशयं संशयतामसघ्नो लेखः कथं सूर्यसहोदरो नो ? ॥ २१७ ॥

अनेकवर्णोत्तमरत्नपङ्क्तिविराजितो भूरिसदर्थशाली ।
मुद्राञ्चितः स्वादररक्षणीयो लेखोऽश्नुते कोशगृहस्य लक्ष्मीम् ॥ २१८ ॥

भूपालवद् यो व्यवहारचर्यां प्रवर्तयेत् सद्गुरुवच्च शास्ति ।
विश्रम्भपात्रं प्रियमित्रवच्च लेखः कथं सर्वगुणास्पदं नो ? ॥ २१९ ॥

लेखस्य सप्त प्रभेदाः—

स सप्तधा लेख उदीरितो ज्ञैः पृथक् पृथक् कार्यफलोपदर्शी ।
व्यापारलेखः १ कुसुमेषुलेखः २ स्नेहस्य लेखः ३ स्फुटरोषलेखः ४ ॥ २२० ॥

शोक ५ प्रमोद ६ प्रभवौ च लेखौ यो धर्मलेखः, स च सप्तधा स्यात् ।
तत्रादिमो यो व्यवहारिलोकैः संलिख्यते कामिजनैर्द्वितीयः ॥ २२१ ॥

भवेत् तृतीयः स्वजनैर्मिथो यस्तुर्यो विपक्षक्षितिनायकाभ्याम् ।
स पञ्चमो यः स्वजनार्तिशंसी षष्ठो विवाहादिषु लिख्यते यः ॥ २२२ ॥

अयं पुनः सप्तम एव लेखो लेखेषु सर्वेष्वपि सार्वभौमः ।
पदे पदे पुण्यफलोदयेन यतः परत्रेह च शर्मसिद्धिः ॥ २२३ ॥

स्वस्तीतिबीजं जिनवर्णनं च मूलं पुरीवर्णनमेव शाखाः ।
पुष्पाण्युदन्ता गुरुवर्णनं च फलं लसल्लेखसुरद्रुमेऽस्मिन् ॥ २२४ ॥

लेखो हि प्रायः पिशुनेभ्यो रक्षणीयः सज्जनेभ्यश्च दर्शनीयः

इति तयोः स्वरूपलेशो लिख्यते—

सतां स्वभावोऽयमिह प्रमोदवन्तो निरीक्ष्यान्यकवेः कवित्वम् ।
इन्दुः किमक्ष्णां भवति स्वकीयो हर्षोऽतिहृद्येष्विति तन्निसर्गः ॥ २२५ ॥

ते वल्लभाः स्युर्भुवनेषु सन्तः कुर्वन्ति येऽन्यस्य गुणप्रकाशम् ।
केषामभीष्टः स समीरणो नो यः सौरभं सौमनसं व्यनक्ति ॥ २२६ ॥

ब्रवीति दोषानथ योऽन्यदीयान् दुष्टः स शिष्टोऽपि भवेदनिष्टः ।
दुर्गन्धलेशं प्रथयन् समीरो द्विष्टो न जीवातुरपीह विश्वे ॥ २२७ ॥

खलः कवित्वस्य विभाव्य दोषान् यथा प्रसन्नो न तथा गुणौघान् ।
लभेत नो सुन्दरमन्दिरेण मुदं यथाहिर्बिलवीक्षणेन ॥ २२८ ॥

किं दुर्जनानामिह याति येऽन्यश्लोकानुपश्रुत्य विषादिनः स्युः ।
गृह्णाति वार्कः किमु कौशिकानामान्ध्यं यदस्योदय एव तेषाम् ॥ २२९ ॥

प्रागेव विद्वेषतमोनिरुद्धबुद्धीक्षणाः किं परिभावयन्ति ।
गुणान् कवित्वस्य यथा दिवान्धो वेवेक्ति भानोर्ननु कौशिकः किम् ? ॥ २३० ॥

कवित्वरत्नस्य विशुद्धिभाजो गुणप्रकर्षः खलसङ्गतः स्यात् ।
दृष्टात्मदर्शे भसितानुलेपात् शुद्धिस्तथाक्ष्णोः किमु कज्जलेन ? ॥ २३१ ॥

निर्दूषणे शालिनि काव्यरत्ने कुर्यादनार्योऽपि हि दुर्जनः किम् ? ।
सुवर्णपर्यङ्कतलेऽतिसान्द्रे क मत्कुणौघो लभते प्रवेशम् ॥ २३२ ॥

कदाप्यनाभोगकृतः कवित्वे दोषो भवेत् सोऽपि गुणो गरीयान् ।
विनाऽमुना स्यात् कतमः प्रकारो मुदे गुणागृह्यधियां खलानाम् ॥ २३३ ॥

स्वचित्तगर्वोद्धुरतोच्छ्रितेन निस्सारमेकेन पदेन मत्ताः ।
दिधीर्षवो ये कविताभ्रभारं तेभ्यो नमस्टिट्टिभसोदरेभ्यः ॥ २३४ ॥

केचिच्चिदंशाधिगमेन मत्ताः खलास्तदन्ये प्रभुतामदात्ताः ।
शेषास्त्वविज्ञा बत कः कवीनां श्रमक्रमं द्रक्ष्यति लब्धलक्ष्यः ? ॥ २३५ ॥

किमेतया प्रस्तुतचिन्तया वा सन्त्येव केचित् सरलाः पुमांसः ।
ज्ञानप्रमुख्योत्तमतात्रिवेणीसङ्गोपमा भूषितभूमिभागाः ॥ २३६ ॥

इति स्वरूपं खलसज्जनानां मया निबद्धं न कुतोऽपि हेतोः ।
कादम्बरीचम्पुकथादिकारैः प्राच्यैर्बुधैर्बद्धमतो न्यदर्शि ॥ २३७ ॥

अथ स्वौद्धत्यपरिहारः—

श्रीहेमचन्द्रादिकवीश्वराणां पुरः स्फुरेद् यः कवितामदो नः ।
तार्क्ष्यस्य पक्षौ समुदीक्ष्य साक्षात् स मक्षिकाणामिव पक्षगर्वः ॥ २३८ ॥

तैस्तैः सुधीभिर्बहुभिः स्तुतान् वः स्तोतुं गुणान् कोऽहमतीवमुग्धः ।
अस्पष्टमप्यर्भकवाक्यजालं प्रियं गुरूणामिति तु प्रयत्नः ॥ २३९ ॥

स्तोतुं प्रवृत्ता भवतः कवीन्द्रास्ततोऽहमप्यत्र विधौ समुत्कः ।
निरीक्ष्य पोतौस्तरतः पयोधौ तत्रोत्सुकं नो किमु शुष्कपर्णम् ? ॥ २४० ॥

भवद्गुणौघाम्बुनिधौ निमग्नाः कवीश्वराश्चित्रमहं तु तीर्णः ।
सम्बन्धगन्धादिति युक्तमेव यथाम्बुधेर्वारिणि काष्ठखण्डः ॥ २४१ ॥

मुनीन्द्र ! यत्नो रचितो मयाऽयं प्रमोदपूर्णान् गुणिनो निरीक्ष्य ।
बालैः स्वबुद्धया रचितासु रेणुमयीषु लीलालयचातुरीषु ॥ २४२ ॥

अज्ञानभावेन यदत्र चर्च्यं 'मानन्दलेखे' लिखितं मया यत् ।
शोध्यं च बोध्यं च तदात्मबुद्धया बुधा ! मयाऽयं रचितोऽञ्जलिर्वः ॥ २४३ ॥

पर्याप्तमभ्यर्थनयाऽथवाऽऽर्या यदा किल प्रोज्ज्वलनस्वभावाः ।
अभ्यर्थितौ केन च पुष्पदन्तौ तौ शारदौ चोक्षयितुं सरांसि ? ॥ २४४ ॥

गुरुः प्रसन्नो यदि सौम्यदृष्टिः क्रूरग्रहैर्वक्रतमैः किमन्यैः ।
जङ्घन्यतेऽसौ किल दोषलक्षं ज्योतिर्विदामप्ययमेव पन्थाः ॥ २४५ ॥

ततः प्रसन्नैर्गुरुभिर्विधाय शिशौ कृपालेशमनीदृशेऽपि ।
स्मर्यः कदाचित् समये जनोऽयं विशेषतः श्रीजिनदर्शनादौ ॥ २४६ ॥

मनो मदीयं तु यथा सरोजे सौरभ्यमौन्नत्यमिवाऽमराद्रौ ।
दुग्धे जलं शैत्यमिवाप्सु वन्हावुष्णत्वमिन्दाविव कौमुदी च ॥ २४७ ॥

---

१ 'वेदूतोऽनव्ययय्वृदीचङीयुवः पदे' (सिद्ध० २ । ४ । ९८) इति सूत्रेण ह्रस्वः ।

२ 'हनो घ्नी ऽर्वघे' (सिद्ध० ४ । ३ । ९९) इति सूत्रबृहद्वृत्तौ विकल्पस्योक्तत्वाद् जेघ्नीयते जङ्घन्यते इति प्रयोगद्वयं साधु ।

माधुर्यमिक्षाविव बः क्रमाब्जे तथा गतं तन्मयतां ततः किम् ।
लिखामि यच्छ्रीगुरुनामधेयग्राहं नमाम्यार्हतपादपद्मान् ॥ २४८ ॥
युग्मम् ॥

संवत्सरे वार्द्धिनिधानचन्द्रकलामिते (१६९४) बाहुलमासि दिव्ये ।
मनोरथो मे फलिनस्तु धन्यत्रयोदशीसञ्ज्ञतिथौ बभूव ॥ २४९ ॥

यावद् धरित्रीफलके सुमेरुः शङ्कुर्निखातो दिनमानकारी ।
प्रतिष्ठितस्तावदयं प्रबन्धो जीयात् प्रबुद्धश्रवणाध्वनीनः ॥ २५० ॥

कल्याणमारोग्यमभीष्टसिद्धिः समृद्धिलब्धिश्च गुणप्रसिद्धिः ।
महोन्नतिः कीर्त्तिततिः प्रतीतिः सङ्घेऽनघे स्ताद् वितनोति भद्रम् ॥ २५१ ॥

पूज्यार्हद्भक्तभट्टारकततितरुणीचन्द्रकान् भव्यलेखा-
राध्य श्रीश्रीशसुश्रीनतपद **'विजयानन्द'**सूरीशपूज्यान् ।
ध्येयप्राधान्यधन्यांस्तपगणनृपतीन् व्यक्त**विज्ञप्तिपत्रं**
नामस्मृत्येकतानः शिशुरिति नगरे **स्तम्भतीर्थे**ऽडुढौकत् ॥ २५२ ॥

इति महोपाध्यायश्री**कीर्तिविजयगणि**शिष्योपाध्याय-
श्री**विनयविजयगणि**ना श्रीश्रीपरमगुरूणां प्राभृती-
कृते आनन्दलेखनाम्नि लेखप्रबन्धे लेखप्रशंसा
सुजन दुर्जनस्वरूप व्यावर्णनरूपो दृष्टान्त-
चमत्कारनामा पञ्चमोऽधिकारः सम्पूर्णः
॥छ॥ सम्पूर्णश्चायमानन्दलेखनामा
लेखप्रबन्धः ।

ग्राम नगराणि.

राजा महाराजाओ

गच्छपक्षादि.

आचार्यादि मुनि महाराजाओ

साध्वीजी

श्रावककुलादि

श्रावको

श्रावको पृ. म.

श्रावको पृ. म.

श्राविकाओ.

श्राविकाओ पृ. प.

श्राविकाओ पृ. प

श्राविकाओ पृ. प्र.

श्राविकाओ पृ. प्र.

श्राविकाओ पृ. प्र.

श्राविकाओ पृ. प्र.

द्वितीयो विभागः

कागदलिखितग्रन्थानां प्रशस्तयः ।

मङ्गलाचरणम् ।

यद्वदनामृत कुण्डादुदिता मुदितं करोति जननिवहम् ।
अमृतच्छटेव वाणी स जयति जिनपुङ्गवो **वीरः** ॥ १ ॥
कल्याण वल्लीजलदच्छटायै प्रध्वस्तनिः शेषतमोघटायै ।
सुरासुर श्रेणिनिषेवितायै नमोऽस्तु नित्यं **श्रुतदेवतायै** । २ ॥
इह स्थितैरप्यवलोक्यते यत्प्रभावतो विश्वगियं त्रिलोकी ।
सदा प्रकाशं तदनन्तसारं जैनेश्वरं **वाङ्मय**मानमामि ॥ ३ ॥

आ० श्री० वि० दा० सू० सं० शा० सं० छायापुरी

श्रीवन्दारुवृत्तिः प्र. १

प्रशस्तिः ॥ इति श्रीषड्विध आवश्यकविधिः ॥ छ ॥ एवं ग्रंथाग्रं २७२० कृतिरियं सुविहित-शिरोमणीनां श्री**मद्देवेंद्रसूरीणां** ॥छ॥ रसत्रिलोचनश्चैवकलासंपूर्णवर्त्तते (१२३६) । ग्रहयोगावियुक्तश्च मधौ च कृष्णपक्षके ॥ १ बृहद्गणगच्छाधीशाः सूरिश्री**शीलदेवाख्याः** ॥ तच्छिष्येणैव लिखिता **भानुप्रभो**र्वृत्तिमिमां (?) ॥१॥ प्रवाच्यमानं कृतिभिस्तु नंद्यात् ॥१॥ शुभं भूयात् ॥

७६३८ श्री० जि० चा० सू० सं० ज्ञा० भं० बिकानेर.

पंचाशिका सूत्रवृत्तिः प्र. २

ग्रंथाग्रं ८७५० संवत् १३१३ वर्षे कार्तिक वदि ८ सोम श्री**स्तंभनपुरे** पातसाहश्री**महमद**.विजयराज्ये । श्रीखरतरगच्छे । श्रीः ।

९९१० श्री० जै० आ० पु० सुरत

श्रीपर्युषणाकल्पटिप्पनकम् । प्र. ३

श्रीविक्रमाद्बाणरदेंदुवर्षे १३२५, चूर्ण्यां वीक्षस्वगुरोर्दुखाव्वा (सुखा) ज्ञात्वाऽऽनाते, पंपर्युषणा-

भिधान कल्पस्या किंचिद्विदुषे निसक्तर यदत्रोत्सूत्र मासूत्रितत्र मिथ्याऽस्तु दुष्कृतं ॥ छ ॥
ग्रंथाग्रमष्टादशाग्रं, श्लोकः शतचतुष्टयं ॥ ३ ॥

पं० श्री० भ० वि० सं० ज्ञान भं० राधनपुर

श्रीविवेकविलासः प्र. ४

संवत् १३७५ वर्षे आश्विन शुदि ९ बुधेऽद्येह **नव्यश्रीपत्तने** महाराणाधिराज **श्रीकुदबदीन**-पादैः नियुक्तमलिक श्री**साहमदीन**प्रतिपत्तौ प्राग्वाटज्ञातीयमहं० **विजयसिंह**....महं० **क्षीमाकेन** श्रीविवेकविलासपुस्तिका लिखितेति ॥ मंगलं महाश्रीः ॥ शुभं भवतु ॥ लेखक पाठकयोः ॥ छ ॥

श्री० जै० आ० पु० सुरत

श्रीसत्तरिसयठट्ठाण--स्तबकः प्र. ५

इति.............संवत् १३८७ संवत्सरि लिख्यउ इह **सोमतिलकसूरइं**। अभ्यर्थना संघवी कीधी **हेमइ** संघवी **रत्नाबाई** बेटाइ हेम इसइ नामइ नाम तेहनो, एक सत्तिए कर्मरि संख्या जेको जिननाए स्थानक भणइं सांभलइं शुभध्यांन सूपइ अर्थनइं चींतवइं ते जीव सीघ्र सम्यक्त पामइ ॥ १ ॥ लाभइ ज्ञानदर्शन चारित्र सीघ्रयांयां मेयांमइं ते जीव अमर विमान ॥ परमसुखनिधान जाइ ते जीव सिद्धिस्थानकनइं चिवइं ॥ इति.

६ए०० श्री जै० आ० पु० सुरत.

श्रीआराधना भगवती । प्र. ६

भट्टारकश्री**देवेन** साधु**खेतू**पठनाय भगवती आराधना पुस्तकं दत्तं सं. १३९७ आसाढ सुदि ५ भौमदिने । चरित्रपात्र त्रयो दश उद्धरणभट्टारकाश्री **नयसेण** जोग्ये पुस्तकं प्रहत स० वेत्ता। १३०३ मां लखेली छे.

प्र० श्री कां० वि० सं० शा० सं० वडोदरा

श्रीपिंडविशुद्धिः (सावचूरिः) प्र. ७

संवत् १४१० वर्षे आषाढ वदि द्वितीया दिने अलेखि **आनंदरत्नगणिना** परोपकराय **देवकुल-पाटक** महानगरे ॥ श्रीमच्चंद्रगच्छनायकपुरंदर श्री**सोमसुंदरसूरि**तत शिष्योपाध्यायश्री **साधु-राजगणि**शिष्यपरमाणुना ॥ शुभं भवतु श्रीश्रमणसंघाय ॥

२१०४ श्री वी० वि० सू० सं० शास्त्र संग्रह अमदावाद

श्री युगप्रधानयंत्र प्र. ८

इतिश्री **भद्रबाहु**प्रणीत दुखमाप्राभृततश्चतुरधिकद्विशहस्रयुगप्रधानस्वरूपं सुखावबोधनार्थं श्रीदेवेंद्रसूरिणा यंत्रपत्रे न्यासोचक्रे **श्रीचंद्रगच्छे** प्रद्योतनाभ **श्रीसोमतिलक**सूरिस्तेषामुपाध्याय **श्री-हंसभवनगणि**प्रसादतः श्रीशिष्य **श्रीकीर्तिभुवनेन** श्रीमति **स्तंभनकपुरे** विक्रमांत् संवत् विश्वमनु **१४१३** वर्षे लिखितं **श्रीपद्रपत्तने** श्रीवासुपूज्यप्रसत्तेः

मु० श्री हं० वि० सं० शास्त्र सं० वडोदरा

श्री सदेवंत शावलिंगा चोपाइ प्र. ९

संवत १४१५ ना वर्षे चैत्र शितात् वदि १ वार शनौ भावनगर बिंदर लख्युं छे ५० रुषि **श्रीपदेवजीजी** ऋ० **वाइलजीजी** लपिकृतं मुनि **सोमचंदः** । शुभं भवतु ॥ श्रीरस्तु । कल्याण-मस्तुः । श्रीः ॥

श्री पाक्षिकसूत्रवृत्तिः प्र. १०

पं० श्री प्र० वि० ज्ञान भंडार अमदावाद

संवत १४२३ वर्षे चैत्र वदी ५ सोमे अद्येह श्री **स्थंभतीर्थे** श्रीपाक्षिकसूत्रविवरणं लिखितं ॥ शुभमस्तु ॥

श्री शां० ज्ञा० भं० खंभात

श्रीसिद्धचक्रमाहात्म्यम् । (रत्नशेखरसूरिः) प्र. ११

संवत् १४३० वर्षे फागुण शुदि १३ सोमे **श्रीआगमगच्छे श्रीमुनिसिंहसूरि**शिष्य उदय-रत्नगणिना । लिखितं ॥ **सौराष्ट्र** देशे **मधुमति**स्थितेन ।

श्री जै. सं० ज्ञान, भं० पाटण.

श्रीषडावश्यकावचूरिः प्र. १२

एवं ग्रंथ २७२० इति भद्रमस्तु जिनशासनाय, सर्वाभिमतसुमतिज्ञानेंदुकांतिविराजमान **सर्वांगावयवसुंदर** परमपूज्यभट्टारक **श्रीसोमतिलकसूरि**पादशिष्यलवेन लिखितमस्ति । मंगलमस्तु **श्रीचतुर्विधसंघाय** ॥ **संवत् १४३२** ॥

७४३९ श्री वा० पा० जै० ज्ञान भं० पाटण.

श्रीअनेकांतजयपताका। प्र. १३

विजयतां श्रीअनेकांत इति। संवत्सर १४३६ पौष सुदि ९ रवौ एवं कालातीते लिखितं। शुभं भवतु सर्वस्य।

३६३७ श्री० जै० सं० ज्ञा० भं० राधनपुर

श्रीसंगीतरत्नावलिः प्र. १४

संवत् १४३८ वर्षे मार्गशिर वदि १४ रवौ चौलुक्य नृपप्रतीहार श्री**जगदेव** सुत श्री**सोमदेव**राज्ये विरचितायां। संगीत रत्नावल्यां संकीर्ण्ये लक्षणं नवमं प्रकरणं॥

श्री० जै० सं० ज्ञा० भं० पाटण

श्रीप्रश्नोत्तररत्नमाला वृत्तिः प्र. १५

संवत् १४४१ वर्षे चैत्र वदि ४ गुरौ प्रश्नोत्तररत्नमालावृत्तिर्लिखिता॥ श्री पत्तन वास्तव्य ठ० **पेथा** भार्या **मोणलदे** पुत्री **पूजी** श्राविकया श्री भट्टारक प्रभुश्री **जयानंदसूरि** गुरु उपदेशेन प्रश्नोत्तररत्नमाला वृत्ति निज पुण्यकर्मवृद्धये पुस्तिका लिखापिता॥ शुभं भवतु॥

श्री० जै० सं० ज्ञा० भं० पाटण

श्रीशब्दानुशासनावचूरिः प्र. १६

संवत१४४१ वर्षे पोष वदि द्वादश्यां सोमदिने भृगुपुरे पं०पद्मानंदेन न्यासपुस्तिका लिखिता. अत्र शंखादिशब्देन शंखादिसमुदायस्याभिधानात्तस्य चातुर्यागत्वादजातित्वाच्चैकवद्भावः॥ श्री **सलक्षणपुर** वासि प्राग्वाट ज्ञातीय मं० **भीमभार्या पोपट** पुत्रेण मं०ठ० **लींबाकेन** जाया **लूणादेवी** भ्रातृव्य० **मांसारंगादि** कुटुंबयुतेन सम्यक्त्वमूल द्वादशव्रत धारिणा दानादि चतुष्प्रकारधर्माराधकेन नित्यं षड्विधावश्यककरणावगण्यपुण्यानुयायिनां तपागच्छनभोभास्कर **श्रीदेवसुंदरसूरीणा**मुपदेशेन चतुष्कयास्वपुस्तान्तरे श्रीवसुदेवहिण्डि प्रथमखंडं चालेख्यत॥सुधीभिर्वाच्यमानश्चिरं नंदतात्पुस्तकोऽयमिति॥

श्री. जै. सं. ज्ञा. भं. पाटण.

श्रीशब्दानुशासनम् प्र. १७

संवत् १४४९ वर्षे कार्तिक वदि त्रयोदश्यां शनिवारदिने श्रीमति **अणहिलपत्तनपुरवरे वीरमवाटकशालायाम**लेखि॥ शुभं भवतु चतुर्विधश्रीश्रमणसंघाय॥ लेखकपाठकयोश्च॥छ॥

श्री वी० वि० सू० सं० ज्ञान भंडार अमदावाद

श्रीअजापुत्ररास । प्र. १८

इतिश्री....सत्वाधिकारे सप्तमः खंडः समाप्तः । पंडितश्री ५ श्री**नित्यविजय**गणि तत्‌शिष्य भाविमुनि **जीवविजयेना**लेखि । संवत् १४५ ? वर्षे कार्तिक सुदि ७ दिने श्रीरस्तु । कल्याणमस्तु । शुभं भवतु । लिषितं श्री**रामनगरे** लेखकवाचकयोः ॥

४४२८ श्री. नि. वि. जी. म. ज्ञा. भं. चाणस्मा

श्रीमंडलप्रकरणवृत्तिः प्र. १८

इति श्रीमंडलप्रकरणवृत्तिः संपूर्णा संवत् १४५ ? वर्षे चैत्र वदि २ ससूत्र ग्रंथाग्रं ९३१ श्लोक संख्या । सकलपंडितो श्री. श्री. श्री. पं. **रत्नकुशलग०** तत्‌शिष्य **पं. दीपकुशलग०** पं. **अमिविजय**गणि लिखितं श्री**सुरतबिंदरे** श्रीपार्श्वनाथजी प्रसादात् ॥ श्री ॥

७८७७ श्री० जै० ज्ञा० भं० विजापुर

श्रीसुपार्श्वनाथचरित्रम् । प्र. १९

संवत् १४५४ वर्षे फागण वदि ९ भौमे लिखितमिदं पुस्तकं ॥ छ ॥

श्री**कायस्थ**विशाल वंशगगनादित्योऽत्र **जानाभिधः**
संजातः सचिवाग्रणीर्गुरुयशाः श्री**स्थंभतीर्थे** पुरे ।
तत्सूनुर्लिखनक्रियैककुशलो **भीमा**भिधो मंत्रिराट्
तेनायं लिखितो बुधावलिमनःप्रीतिप्रदः पुस्तकः ॥ छ ॥ शुभं भवतुः ॥

श्री० जै० सं० ज्ञा० भं० पाटण.

श्रीपार्श्वनाथचरितम् प्र. २०

कलिकुंडे मथुरायां चारुवर्मेशंखपुरे
नागहृदे लाटहृदे स्वर्णगिरि प्रमुख तीर्थेषु ॥

पंचपंचमनुसंख्य वत्सरे १४५५ पौष मुख्य सुतिथौ दिने विधोः ।
श्रीमतिप्रथित **पत्तने पुरे** लेखकेन लिखितं सुपुस्तकम् ॥ १ ॥
श्रीमालवंशे कमलावतंसे श्रेष्टी पुराभूद् भुवि **वीरपालः** ।
देवे गुरौ वाद्‌भुतभक्तियुक्तः ख्यातो गुणैश्चंद्रकराभिरामैः ॥ २ ॥

पुण्यैकपात्रं तत्पुत्रो **नरसिंहो**ऽभवत् सुधीः ।
हीमादेवी प्रिया तस्य प्रशस्यगुणशालिनी ॥ ३ ॥
सुतौ तयो **धूंलिग मेलिगौ** च सदा सदाचारविचारवीरौ ।
सद्धर्मशास्त्रश्रवणैकचित्तो जीयाच्चिरं पूर्णशशांककीर्तिः ॥ ४ ॥
मेलादेवी तत्प्रिया भाति सौभाग्यश्रीगेहं धर्म्मकार्ये नियुक्ता ।
भक्ता देवे सद्गुरौ चातिनम्रागेहस्यांतर्जंगमा कल्पवल्ली ॥ ५ ॥
श्रीनागेंद्रगणेऽगण्यपुण्यसंभारभूषिते ।
श्रीपद्मचंद्रसूरींद्रः प्रबभूव गुणैकभूः ॥ ६ ॥
तत्पट्टपूर्वाचलभास्करः **श्रीरत्नाकरः सूरि**वरा बभूव ।
पट्टेऽस्य **रत्नप्रभसूरि**रेषः श्रीमान् जयी निर्ज्जितकामवीरः ॥ ७ ॥
तत्पदे जयति जंगमतीर्थं **सिंहदत्तगुरु**रेष गुणाढ्यः ।
यः सतां प्रथमकः कलिकार्ये चंद्रगौरयशसा प्रसृतश्च ॥ ८ ॥
श्रीमते **सिंहदत्ताय** शुद्धचित्ताय सूरये ।
न्यायोपार्ज्जितवित्तोऽयं **मेलिगः** श्रावकाग्रणीः ॥ ९ ॥
॥ पार्श्वनाथ चरित्रस्य प्रददौ पुस्तकं शुभं ॥

श्री० जै० सं० ज्ञा० भं० पाटण

विवेकमंजरी

प्र. २१

संवत् १४५९ वर्षे फागण वदि ४ रवौ मूधा (महुधा) ग्रामे लिखितमिदं प्रकरणं परात्मभणनार्थं॥
॥ छ ॥ छ ॥

श्री जै० सं० ज्ञा० भं० पाटण.

श्रीकालिकाचार्यकथा

प्र. २३

ओकेशान्वयहीरो **हीरो** नाम्ना बभूव नागपुरे ।
जिनधर्मलीनचित्तो वित्तोपचयी गुणी साधुः ॥ १ ॥

धर्मिणी नाम्नी पत्नी तस्यासीद्देवसंघगुरुभक्ता ।
पुत्रौ च **पूर्णसिंह केशव**नामा च धर्ममतिः ॥ २ ॥
देउरिति पुत्री चाबाल्यादपि शुद्धदेवगुरुभक्तिः ।
सम्यक्त्वदेशविरतिप्रमुखाद्यत्सुकृत सत तरतिः ॥ ३ ॥
सरस्वतीपत्तनवास्ययाऽभूद्धीराभिधः साधुरुदारचित्तः ।
विचित्रपुण्यप्रथितप्रसिद्धिर्विशुद्धधीः **कर्मिणि**रस्य पत्नी ॥ ४ ॥
अभूवन् पुत्राश्च तयोः **सज्जनसुभटौ** च **शालिगो** विज्ञः ।
संग्रामसिंह सरवणनामानौ पंच भूविदिताः ॥ ५ ॥
प्राप प्रतिष्ठाः व्यवहारिवर्गे सत्पुण्यनिष्ठा सुगुणप्रतिष्ठाः ।
श्रेष्ठाः सतांसच्चरितैर्गरिष्ठाः स्वेच्छा जिनेन्द्रोदिततत्त्वपंक्तौ ॥ ६ ॥
तेषु **संग्रामसिं**हेन परिणीता विवेकीनी ।
सादेउ विशदाचारा सर्वधर्मविचारवित् ॥ ७ ॥
उभयकुलोद्योतकरी निर्मलशीलप्रभान्विता नित्यं ।
सा दीपिकेव पुण्यं कुरुतेऽपूर्वा निरंजना बाढम् ॥ ८ ॥
सावद्ययोगविरतोपधानसत्पौषधादिविधिनिरता ।
वपति धनानि क्षेत्रेषु आवश्यकसत्क्रियो युक्ता ॥ ९ ॥
देवकुलपाटकपुरे व्यरीरचत् प्रौढदेवकुलिकायाम् ।
ऋषभजिनाधिपचैत्ये, प्रतिष्ठिते श्रीतपाचार्यैः ॥ १० ॥
संघार्चाजिनयात्रामालारोपादिविविधपुण्यानि ॥
कुर्वाणा सम्यक्त्वं दधाति सुलसेव या शुद्धम् ॥ ११ ॥
श्री **देवसुंदर**युगोत्तमसूरिशिष्य—
श्री**सोमसुन्दर**तपागुरुसूपदेशात् ।
साऽलीलिखद् द्विगजरत्नशरद्यथात्म—(१४८२)
श्रेयस्कृते विशदकल्पप्रतीश्च पत्र ॥ १२ ॥
॥ इति भद्रं भवतु ॥

१३३ श्री जै० वि० ज्ञा० भं० अमदावाद.

श्रीअल्पबहुत्वविचारः प्र. २४

संवत १५०१ **वर्षे** फा० सुदि ५ दिने लिखिता। **आनंददर्शन**गणिना पूज्याराध्य पं० **श्रुतशे-खरगणि**पादप्रसादात् ॥

श्री जै० सा० पु० सुरत

श्रीउपदेशमाळास्तबकः प्र. २५

सं० १५०१ वर्षे मार्गशिर शुदि ११ भृगुरेवत्यां श्री उपदेशमाला सावचूर्णिः। साहश्री **वछा** भार्या बाइ **गुरुदे** सुत साह**सहिसकिरणेन** भंडार गृहीत्वा सुत **वर्द्धमान शांतिदास** परिपालनार्थं ॥ छ ॥

श्री वाडीपार्श्वनाथजी ज्ञान भंडार पाटण.

श्रीक्रियारत्नसमुच्चयः प्र. २६

संवत् १६८१ वर्षे कार्तिक वदि प्रतिपदिने रवौ भरण्यां व्यतिपाते श्री **अहम्मदावाद**-नगरे श्री**विजयदेवसूरिभिः** **मुक्तिसागरो** गच्छान्निकासितः, तस्मिन्नेव दिने **शांतिदास**साहाय्येन सागरनाम कुमतं प्रवृत्तं, तत्र प्रथमं सागरकुमते मूलं **मुक्तिसागरः** तदनु च संवत् १६८१ वर्षे प्रथमचैत्रे शुक्लनवमीदिने पुनर्वसुनक्षत्रे नवमरवियोगे गच्छभेदमपास्य श्री**अहम्मदावाद**-सकलवाचकप्रभृतियतिसमुदायेन सकलसंघेन सह महाडंबरपुरस्सरं सकलानेकजातीयवाद्य-निर्घोषपुरस्सरं भट्टारकपुरंदरश्री**विजयदेव**सूरीणां सागरकुमतनिवारणप्रोत्साहितमनसः श्री**विजया-नंद**सूरयोऽहं शिष्योऽस्मीति वदतः पदकमलं प्रणेमुः ॥ छ ॥ अथ श्रीतपागच्छदिनकरः सागरकुमतवार्दलपटलरहितोऽधिकतेजास्वितां प्राप । तद्दिने श्रीशत्रुंजययात्रार्थं बहुसंघयुतेन समागतेन श्री**वस्तुपालतेजपाल**तुल्येन दानकल्पद्रुमसमानेन श्रीविजयदेवसूरीणां परमभक्तेन तपागच्छपरमधर्मानुरागिणा **सीरोहीवास्तव्येन** **शीरोहिदेशाधिपतिमं**त्रिमुख्येन **महं** श्री **तेजपाल**सकलसंघयुतेन निजाग्रहमाननमुदितचेतसां सर्वेषां भट्टारकश्रीसूरिवाचकपंडितसाधु प्रभृतीनां स्वर्णरूप्यादिनाणकैर्नवांगपूजाकरणेन श्रीफलप्रभावनाकरणेन च महानुत्सवश्चक्रे । गच्छभेदनिवारणतिलकं संघपतितिलकं चैकस्मिन्नेव वर्षे मं० तेजपालेन जगृहे,

धर्मतः सकलमंगलावली धर्मतः सकलसौख्यसम्पदः ।
धर्मतः स्फुरति निर्मलं यशो, धर्म एव तदतो विधीयताम् ।

पं. **उदयचन्द्र**गणिवाचनार्थम्

श्री० वि० ल० सू० सं. ज्ञानभंडार खंभात.

चैत्रीपूर्णिमादेववंदनविधिः प्र. ७६१

इति चैत्रीपूर्णीमादेववंदन ॥ १ ॥ संवत् १६८२ वर्षे **स्तंभतीर्थे** लिखितो वा० **उदय-सागर**गणिनेति भद्रं ॥

श्री० जैन वि० ज्ञा० भं० अमदावाद्

श्रीरूपसेनरासः भाषा गूजराती प्र. ७६२

प्रशस्तिः । रूपसेनरासः । संवत् १६८२ वर्षे श्री**अचलगच्छे** । ऋ० **जीवराजलिपी-**कृता । श्री शुभं भवतु ॥

आ. श्री० वि० मे० सू० सं० ज्ञान भंडार अमदावाद्

श्रीअभिधानचिंतामणिवृत्तिः प्र. ७६३

सं. १६६६ वर्षे शाके १५३१ प्रवर्त्तमाने आश्विनमासे असितपक्षे पंचमीतिथौ **अर्क-**दिवसे पश्चात्प्रहरे **जयतारणि**मध्ये लिखितं मुनि **कोरजी** लेखितं । शुभं भवतु.

प्र० श्री० कां वि० सं० शा० सं० वडोदरा.

श्रीकल्पसूत्रम् प्र. ७६४

संवत् १६६६ वर्षे आश्विनमासे कृष्णपक्षे १तिथौ बुधवासरे **मंगलपुरे** वास्तव्य श्री श्रीमा-लज्ञातीय विप्र **शामलीयाकेन** हस्ताक्षराणि ऋषि **वेला** ऋषि **गोविंद** पठनार्थं । श्री शुभं भवतु ॥
यादृशं......................न दीयते ॥

श्री. जै. आ. पु. सुरत.

श्रीनिघण्टुशेषः प्र. ७६५

इति महोपाध्याय श्री ५ श्री**मुनिविजयगणि**शिष्य पंडितश्री**नेमिविजय**गणिशिष्य-श्री**विजयगणिना**लेखि निघण्टुशेषाख्यः संवत् १६६६ वर्षे शिवतातिरस्तु लेखकपाठकयोः ।

श्री. जै. आ. पु. सुरत.

श्रीपर्यंताराधना प्र. ७६६

संवत् १६६६ वर्षे ज्येष्ठ वदि १३ शनौ लिखितं मोहो**लालजी** ॥

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

श्रीप्रतिष्ठाकल्पः प्र. ६६७

प्रशस्तिः ॥ इति प्रतिष्ठाकल्पसमाप्तमिति ॥ ग्रंथाग्र ५२५ ॥ छ ॥ संवत् १६६६ वर्षे ॥ फागुण शुदि ११ शुक्रे विप्र **सामलीया**केन हस्ताक्षराणि ॥

श्री. जैनविद्याशाळा० ज्ञा० भं० अमदावाद.

प्रश्नव्याकरणसूत्रवृत्तिः प्र. ६६८

संवत् १६६६ वर्षे आसोसुदी विजयदशमीदशमीदिने श्री**जिनभद्रसूरिशाखायां** । श्रीवाचनाचार्य **हेमराज**गणिनां शिष्य पं० **लाभतिलक**मुनीनां शिष्य पं० **चारित्रकीर्ति**मुनिना पं० **सुखकीर्ति**मुनिना लिखिता प्रतिरियं शुभं भवतु । कल्याणमस्तु श्रीदेवगुरुप्रसादात् ॥ छ ॥

आ० श्री० वि० नी० सू० सं० ज्ञा० भं० खंभात.

श्रीमहिपालचरित्रम् प्र. ६६९

संवत् १६६६ वर्षे पौषमासे शुक्लपक्षे सप्तम्यां तिथौ शनिदिने श्री**सौराष्ट्र**देशे **मंगलपुर**-मध्ये लिखितं । शुभं भवतु । श्रीरस्तु ॥ कल्याणमस्तु ॥ पंडित श्री **बुद्धिविजय**गणिशि-ष्य**लक्ष्मीविजय**पठनार्थं ॥ ग्रंथाग्रंथ २२२० ॥ श्री ॥ श्री ॥ श्री ॥

आ० श्री० वि० मे० सू० सं० ज्ञा० भं० अमदावाद.

श्रीकर्मस्तववृत्तिः प्र. ६७०

ग्रंथाग्रं ३५०० ॥ सं.१६६७ वर्षे भादरवा सुदी ५ गुरुवारे पंडितप्रवर श्री**हर्षशील**गणि-पं. श्री**ज्ञानसमुद्र**गणि (पछी हरताल मारेली छे.... ......)

आ० श्री० वि० वी सू० ज्ञा० मं० राधनपुर.

श्रीतंदुलवैकालिकप्रकीर्णकम् प्र. ६७१

संवत् १६६७ वर्षे कार्तिकमासे शुक्लपक्षे अष्टम्यां तिथौ सोमवासरे श्री**स्थंभतीर्थे** श्राविका **जीवी अजाइकेन** लिखापिता साहश्री**रिषवदास**कस्य आर्प्पिता पुण्यार्थं वा परोपकारार्थं ॥श्रीः

पं० श्री० उ० वि० ज्ञानभंडार चाणस्मा.

श्री**दशवैकालिक**सूत्रम् प्र. ६७२

स्वस्ति श्री संवत् १६६७ वर्षे फागुणमासे श्वेतपक्षे द्वादश्यां तिथौ गुरुपुष्ययोगे श्रीतपागच्छे श्री**विजयसेनसूरि**राज्ये ॥ आचार्यश्री**विजयदेवसूरि**यौवराज्ये च पंडितश्री**देवविजय**-गणिना । स्वश्रेयसे अष्टोत्तरशतप्रतिः लिखापिता तन्मध्या देषा चतुर्थी बुधैर्वाच्यमाना चिरं जयतु ॥ छ ॥ श्रीरस्तु ॥ कल्याणं भवतु ॥ श्रीः ॥

प्र० श्री० कां० वि० सं० शा० सं० वडोदरा.

श्री**प्रशमबोधः** प्र. ६७३

संवत् १६६७ वर्षे श्रावण वदि १४ दिने । सोमवासरे । पंडित**विनयसागर**मुनिना-लिखितः कृतोऽपि ॥ छः ॥ श्री**दिल्लीनगरे** । श्री**जहांगीरपाति**साहिराज्ये ॥शुभं भवतु ॥श्रीरस्तु॥

प्र. श्री. कां. वि. सं. शा. सं. वडोदरा.

श्री**प्रश्नव्याकरण**म् प्र. ६७४

संवत १६६७ वर्षे वैशाख वदि नवमी शनौ श्रीमालज्ञातीय साह **नेनसी** भार्या सुश्राविका **नवरंगदे** सुत सा० **धर्मदासइ** ए प्रति विहरावी **मालपुर**मध्ये गणि **वीरकुशलनइ** ॥

मु० श्री० हं० वि० सं० शा० सं० वडोदरा.

श्री**अनिट्कारिका सद्वृत्तिः** प्र. ६७५

संवत् १६६८ वर्षे आषाढ वदि १४ दिने श्री**विक्रमनगरे** । महाराजाधिराज श्री**रायसिंहजी** विजयराज्ये श्रीबृहत्खरतरगच्छे । वा० **मुनिप्रभगणि**शिष्य पं. **हेमसिंह**लिखितं स्ववाचनार्थं ॥

आ० श्री० वि० वी० सू० ज्ञा० भं० राधनपुर.

श्रीअण्णायउञ्छकुलकम् प्र. ६७६

संवत् १६६८ वर्षे वैशाख सुदि १० गुरौ पंडितोत्तम स. प. श्री ६ **पुण्यविमल**गणि-शिष्य पं. **मतिविमल**गणिनालेखि ॥

आ० श्री० वि० वी० सू० ज्ञा० भं० अमदावाद्

श्रीअंजनासतीरासः प्र. ६७७

इति ,, संपूर्ण लिखितं **समानगर**मध्ये । संवत सोलसडसट्ठा वर्षे वैशाख सुदि दसमी गुरो । छ । गणि**शांतिकुशल**लिखितं ।

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

श्रीअंजनासुंदरी चोपाइ प्र. ६७८

प्रशस्तिः ॥ इति श्री अंजनासुंदरी चउपइ संपूर्णः ॥ संवत् १६८३ वर्षे फागुण शुदि ३ गुरुवारे लिखिता.

मु० श्री हं० वि० सं० शा० सं० वडोदरा.

एकवीशस्थानप्रकरणं सस्तबकम् प्र. ६७९

लिखितं ऋषि श्री पं. **उत्तमजी**तच्छिष्यजीवर्षिणा लिपीकृतं ॥ सं. १६८३ वर्षे कृष्णपक्षे प्रथम वान **महिम्न**पुरे लिपीकृतं । शुभं भवतु ॥ श्री ॥

श्री० मु० वि० शा० सं० छाणी

श्रीकलावतीरासः प्र. ६८०

सं. १६८३ श्रावण शुदि २ भृगु दिने वास्तव्य श्री**दीवबंदिरे** लिखितं । शुभं भवतु ॥

आ० श्री० वि० नी० सू० ज्ञा० भं० खंभात.

श्रीहेमचंद्राचार्यकृतं व्याकरणम् प्र. ६८१

लेखिता च श्री **पुण्यप्रधानोपाध्यायपुंगवैः** श्री**विक्रमपुरे** संवति १६८३ वर्षे विजयदशम्यां

प्रदत्ता च प्रशिष्य **विनयसागर**गणये स्वहस्तेन वाच्यमाना चिरं नन्दतादाचन्द्रार्कम्। श्रीरस्तु। श्री श्री श्रीपूज्यानां ज्ञानकोशे ज्ञानादिगुणवृद्धये न्यस्तं **क्षमाप्रमोदेन** हैमशब्दानुशासनम्॥१॥

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

श्रीउत्तराध्ययनसूत्रम् प्र. ६८२

प्रशस्तिः॥ इति श्रीउत्तराध्ययनानि समाप्तानि॥ छ॥ ग्रंथाग्रंथ २०९५॥ शुभं भवतु। लेखकस्य॥छ॥ संवत् १६८४ वर्षे प्रथमाषाढ वदि २ बुधे श्री**राऽद्रहानगरे** श्री**अंचलगच्छा**धिराज-श्री**कल्याणसागर**सूरीन्द्रैरुत्तराध्ययनसूत्रं वाचकश्री**रत्नसिंह**गणये पठनाय प्रदत्तमिति वाच्यमानं चिरं नंदतादिह भूतले॥

पं० श्री० उ० वि० सं० ज्ञानभंडार० चाणस्मा.

जीवविचारप्रकरणम् प्र. ६८३

संवत १६८४ वर्षे ज्येष्ठ वदि ६ दिने ऋषि **जीवा** लिखितं॥ श्रा० **नानी** पठनार्थम्॥

श्री० जै० आ० पु० सूरत.

श्री**सुयगडांगसूत्रवृत्तिः** प्र. ६८४

संवत् १६८४ प्रमिते। माह सुदि पंचमीदिने। श्री**खरतरगच्छे**शयुगप्रधानश्री**जिन-चंद्रसूरि**वरपट्टप्रतिष्ठितश्री**जिनसिंहसूरि**पट्टप्रभाकरश्री**जिनराज**सूरिराज्ये॥ **पत्तन**वास्तव्य**पारिषगो-त्रीय** साह **षीमराज** सुत **समरथ** सुत **रतनसी** भार्या **लाडकी**कुक्षिजातेन पा० **धरनजी** सुश्रावकेण सुयगडांगवृत्तिपुस्तकमिदं लेखितं॥ शंकरस्स्याच्छंभुर्भगवान्॥ श्रीः॥

आ० श्री० वि० मे० सू० सं० ज्ञा० भं० अमदावाद.

श्री**ज्ञातासूत्रम्** प्र. ६८५

संवत् १६८४ वर्षे पोष सुदि ६ दिने बुधवासरे चेला० **रवजी** लिखितं॥

श्री० मोहनलालजी ज्ञा० भं० सुरत.

श्री**ज्ञातासूत्रम्** प्र. ६८६

संवत् १६८४ द्वितीयश्रावण वदि ७ दिने श्री **बृहत्खरतरगच्छे** श्री**सहजरत्न**गणिवराणां शिष्येण वा० **उदयसागरेण** शिष्य **यशःकिर्त्ति**मुनेः पठनाय श्रीज्ञाताधर्मकथांगपुस्तकं लिखापितं

श्री. जै. आ. पु. सूरत.

श्रीअर्थदीपिका प्र. ६८७

संवत् १६८५ वर्षे चैत्र सुदि २ सोमे अद्येह श्री **मंगलपुरे** लिखितं ॥ छ ॥

श्री. मु. वि. शा. सं. छाणी.

श्रीउपदेशमाला प्र. ६८८

संवत् १६८५ वर्षे श्री**बाहडमेरु**नगरे श्री**खरतर**गच्छे आसू सुदि १ दिने वा० श्री**धर्म्म-मंदिर**गणि शिष्य पं० पं० **पुण्यकलशमुनि** लिखितम् । श्रा० **सारा** पठनार्थं ।

श्री. आ. क. ज्ञा. भं. लींबडी

श्रीजंबूद्विपप्रज्ञप्तिवृत्तिः प्र. ६८९

संवत् १६८५ वर्षे शाके **१५५५** प्रवर्तमाने चैत्रमासे शुक्लपक्षे पंचम्यां तिथौ बुधवासरे श्री**राजनगर**मध्ये **पातसाहि** श्री**जाहांगीरविजय**राज्ये श्री**सागरगच्छे** पूज्य गच्छाधिराज श्री **सर्वदेव**सूरीशशिष्यसकलशास्त्रपारग पाठकचक्रचक्रवर्ति विद्वच्चूडामणि महोपाध्याय श्री .. गणि शिष्य विनयी अंतेवासी पं. **विद्यासोम**गणिना विलिखितं स्ववाचनार्थं ॥ श्री**चंद्रप्रभु**स्वामि-प्रसादात् श्रेयकल्याणमस्तु ॥ श्रीः ॥

श्री शांतिनाथजी ज्ञानभंडार खंभात

श्रीदशवैकालिकसूत्रम् प्र. ६९०

इति दसवेआलिअसुअक्खंधो सम्मत्तो ॥ संवत १६८५ वर्षे फागुणसुदि २ दिने । पंडित शिरोमणि पंडित श्री**विजयचन्द्रगणि**शिष्यगणि**कल्याणचंद्र** लिखितं ॥ श्री **करयवाडा**ग्रामे ॥ शुभं भवतु ॥ कल्याणमस्तु ॥

आ. श्री. वि. दा. सू. सं. शा. सं. छाणी.

श्रीपट्टावली प्र. ६९१

प्रशस्तिः ॥ इति श्री गुर्वावली वृत्ति संपूर्णा ॥ संवत् १६८५ वर्षे मार्गशीर्ष शुक्ल २

सोमे ॥ **मंगलपुर**वास्तव्य श्री**मालीज्ञातीय** लघुशाखायां वु० **सुरा** भार्या **गेणीसुत** वु० **पदम** भार्या **प्रेमलदे** तयोः सुपुत्र सद्धर्मचारि वु० **प्रेमजी**याख्येन स्वभुजोपार्जितवित्तेन श्रीकल्पकिरणावली पट्टावलीसमन्विता स्वश्रेयसे लिखापिता ॥ स्वपुण्यार्थं वाचनाय ॥ श्री**तपागच्छा**धिराजभट्टारक श्री **विजयदेव**सूरीश्वर आचार्य श्री **विजयसिंह**सूरीश्वरयोर्विजयराज्ये सकलपंडितशिरोमणि पं० श्री **दयाकुशल**गणि शिष्य पं० **भक्तिकुशल**गणिना प्रदत्ता वाच्यमाना चंद्रार्कं चिरं नंदतात् ॥छ॥छ॥

श्री० जै० वि० शा० ज्ञा० भं० अमदावाद.

श्री**वंकचूलरासः** प्र. ६९२

सा० **कान्हा** पठनार्थं मुनि **गुणविजय** लिखितं संवत् १६८५

श्री. आ. क. ज्ञानभंडार लींबडी

श्री**सूयडांगसूत्रवृत्तिः** प्र. ६९३

श्री संवत १६८५ वर्षे पौषमासे शुक्लपक्षे अष्टम्यां चंद्रवासरे लिखितं **राउल गोव्यंद** ॥

श्री. मोहनलालजी ज्ञानभंडार सुरत

श्री**सामाचारीशतकम्** प्र. ६९४

संवत् १६८६ वर्षे चैत्र सुदि १ दिने श्री**विक्रमनगरे** श्री**बृहत्खरतर**गच्छाधीश्वर युग-प्रधान श्री**जिनचंद्र**सूरिशिष्य उपाध्यायश्री**समयसुंदर**विरचितं सामाचारिशतकबीजं सम्पूर्णं ॥ शुभं भवतु ॥

प्र० श्री० कां० वि० सं० शा० सं० वडोदरा.

श्री**पाक्षिकसूत्रम्** प्र. ६९५

संवत् १६८७ वर्षे । कार्त्तिक सुदि १० दिने ॥ श्री तपागच्छे ॥ श्री **विजयदेव**सूरीश्वर-राज्ये ॥ पंडितश्री**ककमलविजय**गणिशिष्य पं. **कीर्तिविजयेन** लिखितं । साध्वी **हेमऋद्धि** शिष्यणी **कल्याणऋद्धि** पठनार्थम् । श्री**देवकुलपाटके** । शुभं भवतु ॥

मु. श्री हं. वि. सं. शास्त्रसंग्रह. वडोदरा.

श्री**विधिशतकम्** प्र. ६९६

संवत् १६८७ वर्षे भाद्रवा सुदि १३ दिवसे ॥ वृहस्पतिवारे श्री **राधणपुरनगरे** ॥ लिखितं वा० **विनयवर्द्धन**गणिना ॥ साहसुश्रावकदोसी साह **रत्नपाल** पठनार्थं ॥ शुभं भवतु ॥

श्री जैन आ. पु. सुरत

श्री**विशेषशतकम्** प्र. ६९७

मुनिवसुषोडशवर्षे(१६८७)गुर्जरदेशे च महति दुःकाले । मृतकैरस्थिग्रामे जाते श्री **पत्तने** नगरे ॥१॥भिक्षुकभयात्कपाटे जटिते व्यवहारिभि र्भृशं बहुभिः ।पुरुषैर्माने मुक्ते सीदति सति साधुवर्गेऽपि ॥२॥ जाते च पंचरजतैर्धान्यमणे सकलवस्तुनि महर्घ्ये । परदेशगते लोके मुक्त्वा पितृमातृबंधुजनान् ॥३॥ हाहाकारे जाते मारिकृतानेकलोकसंहारे । केनाप्यदृष्टपूर्वे निशि कोलिकलुंटिते नगरे ॥ ४ ॥

तस्मिन् समयेऽस्माभिः केनापि हेतुना च तिष्ठद्भिः । श्री **समयसुंदरो**पाध्यायैर्लिखिता च प्रतिरेषा ॥

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी

श्री**शांतिनाथचरित्रम्** प्र. ६९८

प्रशस्तिः ॥ इति श्रीशांतिनाथदेवचरितं समाप्तमिति ॥ छ ॥ संवत् १६८७ वर्षे कार्तिक सुदि ७ सोमवासरे । शुभं भूयात् लेखकपाठकयोः ॥ कल्याणमस्तु ॥ श्रीरस्तु ॥ पूज्य परम पूज्य गच्छाधिराज तपागच्छमंडण भट्टारक श्री श्री श्री श्री **सोमविमलसूरि**शिष्य पंडितश्रेणि देसविदेसविख्यात यतिशृंगार पूज्य पंडित श्री श्री श्री **रत्नसोम**गणि गजेंद्राणां तच्छिष्यमुनि **विद्यासोम** लिखितं चे० **मांनसी मुढासा**ग्रामे ॥ छ ॥ श्रीः ॥ छ ॥ श्रीः ॥ श्री रस्तुः ॥ छ ॥

आ. श्री वि. ल. सू. सं. ज्ञानभंडार खंभात

श्री**संग्रहणीसूत्रचूर्णिः** प्र. ६९९

इति श्री संग्रहणीसूत्रं सम्पूर्णमिदं **वनमालिना**लेखि यतिनात्मपठनार्थं अब्द (संवत्) १६८७ कार्तिकमासे शुक्लत्रयोदश्यां शौरिवासरे **भीमसेनपुरे** स्थिते सति शं भूयात् । श्रीरस्तु लेखकपाठकयोः ॥

मुनि श्री हुकमविजयजी ज्ञानभंडार सुरत

श्रीसंबोधसित्तरी प्र. ७००

संवत् १६८७ वर्षे मागशिर सुदि ५ दिने पं. श्री ५ श्री **धनहर्षगणि** तच्छिष्य रा० **रत्नविजयेना**लेखि.

श्री जैन विद्याशाळा ज्ञानभंडार अमदावाद

श्रीउपदेशमाळा बाळावबोधः प्र. ७०१

संवत् १६८८ वर्षे कारतिक वदि ७ गुरौ श्री **वर्हाणनिपुर**नगरे पं०प्र श्री **दर्शनविजय**-गणिचरणारविंदसेवकगणि**शिवविजय**लिखितं । शुभं भवतु । कल्याणमस्तु ॥

श्री जैन विद्याशाळा ज्ञानभंडार अमदावाद

श्रीश्राद्धदिनकृत्यस्तबकः प्र. ७०२

सं. १६८८ वर्षे आषाढ सुदि ५ शुक्रे लिखितं राउल **गोविंद** औदीच ज्ञातीय **वेगनपुर** वास्तव्यः ॥

श्री जैन विद्याशाळा ज्ञानभंडार अमदावाद

श्राद्धदिनकृत्यस्तबकः प्र. ७०३

संवत् १६८८ आषाढ सुदि १ सोमे लिखितं ॥ छः ॥ साध्वी श्री **सहिज**श्रीपठनार्थं.

श्री संवेगी उपाश्रय ज्ञानभंडार सूर्यपुर

श्रीउत्तराध्ययनसूत्रम् प्र. ७०४

संवत् १६८९ वर्षे वैशाख वदि १० रवौ लिखितं स्वस्ति श्रीमत्तपागच्छे लघुशाखायां **श्रीस्थंभतीर्थ**वास्तव्य पं० **संतोष**तच्छिष्य चे०**भवानीदासेन** लिखितं श्री **सीरोहीनगरी**मध्ये ॥

श्री. जैन विद्याशाळा ज्ञानभंडार अमदावाद

श्रीनवतत्त्वस्तबक प्र. ७०५

संवत् १६८९ वर्षे श्री **वाग्भट्टमेरौ** कारतिक वदि सप्तम्यां वार वा०श्री **धर्म्ममंदिर**गणिना-मंतेवासिना पं० **पुण्यकलशेन** लिपीचक्रे ॥ श्री ॥ साध्वी **ज्ञानसिद्धि** साध्वी **धनसिद्धि**पठनार्थम् श्रीरस्तु लेखकपाठकयोः नितराम् ॥

श्री जै. आ. पु. सुरत

श्रीशांतिनाथचरितम् प्र. ७०६

संवत १६८९ वर्षे भाद्र वदि १३ रवौ सम्पूर्णोऽयं ग्रंथः॥ **दंतीपाटक**मध्ये । श्रीऋषभदेव-प्रासादात् ॥ छ ।पाटे ९। यादृशं ....

श्री० हु० मु० सं० ज्ञा० भं० सूर्यपुर.

श्रीउत्तराध्ययनवृत्तिः प्र. ७०७

लिखिता चेयं संवत् १६९० वर्षे श्री**सीरोही**नगरवास्तव्येन वास्तोष्पतिस्तवनीय वास्तव-गुणालंकृतेन कृतसप्ताशीतितमवर्षे वर्षितपपरोलक्षनरोपकारेण कारितरत्नसानुसानूपमसानुशोभित-चतुर्मुखश्रीसुवर्णादिजिनमंदिरेण श्रीशत्रुंजयार्बुदादितीर्थयात्राविधापनतोषितचतुर्विधश्रीसंघदत्तकुशला-शीःपोषितयशोविभवसुंदरेण । स्वकीयसत्पुत्र **सं । कमा** । प० । **गुणराजादि** कुटुंबविराज ॥

श्री० गो० ना० सं० ज्ञा० भं० राजकोट.

श्रीगुणावलिः प्र. ७०८

संवत् १६९० वर्षे आषाढमासे कृष्णपक्षे नवम्यां । तिथौ गुरुवासरे जोसी **गंगदास** लिखितं श्री**नागपुर**मध्ये । शुभं भवतु । यादृशं पुस्तकं..........दोषो न दीयते ॥ बाइ **जसोदा** पठनार्थं शुभं भवतु । कल्याणं भूयात् ॥ श्रीः । श्रीः । श्रीः ॥

मु० श्री० हं० वि० सं० शा० सं० वडोदरा.

श्रीजंबूस्वामिचतुष्पदा प्र. ७०९

संवत् १६९० आश्विन २ बुधवारे श्रीखरतरगच्छे श्री**राजकलशजी** ॥साध्वी **दयासुंदरीजी** चेली **प्रभावती** लिखितं । शुभमस्तु ॥श्री**विरोज**मध्ये । लिखितं पातिसाह **जिहांगिर**राज्ये ॥कल्या-णमस्तु । शुभं भूयात्............

श्री० जैन आनंद पुस्तकालय सुरत.

श्री प्रदक्षिणा ?। प्र. ७१०

संवत् १६९० वर्षे चैत्र सुद १२ रवौ लि० **राजकीर्त्तिकेन** ॥ ऋषिश्री**वैराग्यसागर**-पठनार्थं ॥

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

श्रीविचाररत्नाकरः प्र. ७११

प्रशस्तिः ॥ इति श्रीविचाररत्नाकरप्रशस्तिः समाप्ता ॥ समाप्तश्चायं ग्रंथः ॥ लिखितश्च पं० **विनयविजय**गणिना ॥ छ ॥

दर्शन-हिमकर—गगन—ग्रैवेयकसंख्यवत्सरे (१६९०) जातः ।
आश्विनसिततुर्यायां यत्नः सफलो गुरुमहिम्ना ॥ ३६ ॥
श्रीकीर्तिविजयवाचकविनेयलेशेन **कांतिविजयेन** ।
श्री**वटपद्रपुर**स्थितचित्कोपे प्रतिरियं मुक्ता ॥ १ ॥

श्री० नि० वि० जी० म० पु० चाणस्मा.

श्रीअंजनासतीरासः प्र. ७१२

पंडितप्रवर पंडित श्री ५ श्री**विनयकुशलगणि**शिष्यगणि**कीर्तिकुशलेन** लिखितं स्वयं वाचनार्थं ॥ संवत् १६९१ वर्षे पोष वदि नवमीतिथौ गुरुवासरे ॥ **सिरसडी**मध्ये लिखितं ॥ श्री**शांतिनाथ**प्रसादात् ॥ लेखकपाठकयोः चिरं जीयात् ॥

श्री. जैन विद्याशाळा ज्ञा. भं. अमदावाद.

श्रीजीवविचारस्तवकः प्र. ७१३

संवत् १६९१ वर्षे ज्येष्ठ सुदि २ दिने गुरुवासरे पंडित श्री ५ श्री**जयविजयगणि**शिष्य-गणि**देवविजय** ग. शिष्यमुनि**दीपविजयेन** लिखितं **धुडा**ग्रामे । शुभं भवतु ॥ कल्याणं भूयात् ॥ छ ॥ श्री ॥ श्री ॥ छ ॥

मु० श्री० हं० वि० सं० शा० सं० वडोदरा.

श्रीलोगस्ससूत्रम् प्र. ७१४

संवत १६९१ वर्षे चैत्र सुदि ५ शुक्रे महोपाध्यायश्री**राजरत्नगणि**शिष्यमुनि**कीर्त्ति**-

रत्नलिखितं । शुभं भवतात् लेखकपाठकयोः । सा० **विघा** श्री **नीनी** सालणी श्रा० **लाछलदे** पुत्रीनी **सालणी होंसबाइ** पठनार्थं । यादृशं.......................

श्री० नि० वि० जी० मणि० पु० चाणस्मा.

श्री**संग्रहणीसूत्रम्** प्र. ७१५

संवत् १६९१ वर्षे **द्वितीय**भाद्रपदमासे कृष्णपक्षे त्रयोदश्यां रवौ ब्रा० **चतुर्भोज** लिपीकृतं। शुभं श्रीः।**जेसलमेर**मध्ये **भणसाली सिवराज** आत्मज **नेनसी** पुस्तकधर्मार्थे लिखापितं मुनि-(न. ज) **यविजय** पठनार्थं ॥ श्रीः ॥ छः ॥

पं. श्री. प्र. वि. सं. ज्ञा. भं. अमदावाद.

श्री**उपासकदशांगसूत्रम्** प्र. ७१६

संवत् १६९२ वर्षे श्रावण शुदि ३ भोमे **अंजार**मध्ये लिखितं **शंभूजयंता**ख्येन पुण्यार्थं **इदं** शास्त्रं मुनि**धर्मशी**पठनार्थं । लेखकपाठकयोः शुभं भवतु ॥ कल्याणमस्तु ॥

श्री उ० खा० जै. ज्ञा. मं० झींझुवाडा.

श्रीदंडकस्तवः प्र. ७१७

लिखितं **चन्द्रकीर्त्ति**गणिना संवत् १६९२ वर्षे ॥ छ ॥ श्री**अंचलगच्छे** ॥ पं. श्री**चेला**-गणिनइ श्राविका **कोडिमदेइ** विचारस्तवननी प्रति बोहरावी । **कंटालीयाग्रामे** वास्तव्य ॥

श्री० नि० वि० जी० मणि पुस्त० चाणस्मा.

श्री**सारस्वतदीपिका** प्र. ७१८

संवत १६९२ वर्षे कारतिक सुदि १४ वार शुक्रे **सेरपुरा**मध्ये लिखितं ऋषि श्री ५ **कम्भाजीना** शिष्य तत् ऋषि श्री **पृथवीमल्लजी** पठनार्थं । ऋषि **मेघजी**सुत............शुभं भूयात् लेखकपाठकयोः । ग्रंथाग्रंथः ६८५० श्री ॥ श्री ॥ छ ॥ श्री ॥

आ० श्री० वि० वी० सू० सं० ज्ञा० भं० राधनपुर

श्रीआरामतनयकथा प्र. ७१९

सं. १६९३ वर्षे आषाढ वदि १३ बुधे लिखिता गणी **लालविजयेन वावि**नगरे। शुभं भवतु ॥ श्री ॥

श्री जैन विद्याशाळा ज्ञा. भं. अमदावाद

उत्तमकुमारचरित्रम् प्र. ७२०

संवत् १६९३ वर्षे माघसुदी ५ दिने लिखितं पण्डितश्री**लब्धिविजय**गणितत्शिष्य-मु० **धीरविजय**लिखितं **नवानगर**मध्ये स्वपठनार्थे गणिश्री**नेमविजय साणरी (?) हेमविजय** मु० **प्रेमविजयः** ॥ श्रीः ॥

आ० श्री० वि० वी० सू० ज्ञानमंदिर राधनपुर

श्री**कल्पकल्पलतावृत्तिः** प्र. ७२१

महोपाध्यायश्री**गुणविजय**गणिविरचिता कल्पकल्पलतानाम्नी श्रीकल्पसूत्रलघुटीका संपूर्णा। श्रीरस्तु।

श्रीमत् श्री**गुणविजयो**पाध्यायपदाब्जचञ्चरीकेण।
उदयविजयेन गणिना लिखितोऽस्याः पुस्तकः प्रथमः ॥ १ ॥

ग्रंथाग्रं ३१०० संवत् १६९३ वर्षे पोष वदि १ पुष्यार्के लिखितेयं श्री**राजनगरे**। त्रीणि सहस्राणि साधिकानि संभाव्यंते ॥ छ ॥ मूलकर्ता भद्रबाहुस्वामी ॥

श्री. जैन संघ ज्ञान भंडार. पाटण.

श्री**नंदिसूत्रम्** प्र. ७२२

कोठारी**अमथा** लिखितं श्री**देशड**मध्ये सं० १६९३ वर्षे सरावण वद ८ दिने ॥

आ० श्री० ज्ञा० वि० सू० सं० ज्ञा० भं० खंभात

श्रीपरिशिष्टपर्व प्र. ७२३

संवत् १६९३ वर्षे कारतिक सुदि ५ गुरौ पुष्यनक्षत्रे सकल भट्टारक प्रभु श्री **तपागच्छा-धिराज** परमगुरु श्री......... ....श्री**विजयाणंद**सूरीश्वराणां चरणसरसीरुहरेणुमकरंद-

लालसचंचरीकसमानगणिश्री**कनकविजय**लघुसहोदर स्व. श्रीगुर्वाज्ञादितेयलतालजजा ? सकलमनोवांछितसुखफलकदंबकेन गणिगजेन्द्रगणिश्री**शांतिविजय**सहितेन तृतीयसहजातग० **शिवविजया**भिधानेन लिपीकृतः । स्वपरवाचनार्थं निर्जरार्थं च **देसूरिनगर्यां** ॥

श्री० नि० वि० जी० मणि० पुस्त० चाणस्मा.

श्री**प्रेमलासतीरासः** प्र. ७२४

संवत् १६९३ वर्षे **मागशिर** वदि १४ शुक्रे लिखितं ॥ छ ॥ पूज्य भट्टारक श्री श्री श्री श्री श्री श्री श्री **हीररत्न**सूरि तत् शिष्य गणेश श्री श्री श्री श्री **जसविमल** तत् शिष्य मुनि श्री **मानविमलेन** ॥ लिखितं पठनार्थं ॥ लेखकपाठकयोः कल्याणमस्तु ॥ १ ॥ शुभं भवतु । मंगलमस्तु ॥ श्रीरस्तु ॥

श्री जैन विद्याशाळा ज्ञानभंडार अमदावाद.

श्रीविपाकसूत्रश्रुतस्कंधः प्र. ७२५

संवत् १६९३ वर्षे मागशिर शुदि ९ थावरवारे लिखितं **आनंदसागर** । ग्रंथाग्रंथ १३५०।

गां० गो० ना० सं० ज्ञा० भं० राजकोट

श्री**गुणस्थानकविवरणम्** प्र. ७२६

संवत् १६९४ वर्षे माघमासे शुक्लपक्षे पंचम्यां तिथौ बुधवारे श्री **उदयपुरे** वा०श्री **ज्ञानसमुद्र**गणीनां ततशिष्यमुख्य पण्डित **ज्ञानराज** मुनीनां शिष्य मुख्य पं० **लब्धोदय** मुनीनां शिष्यपं० **जसहर्ष** मुनि लिखितं । श्रीरस्तु ॥ कल्याणमस्तु ॥

श्री० नि० वि० जी० मणि० पुस्तकालय चाणस्मा

श्री **उपदेशमालाबालावबोधः** प्र. ७२७

ग्रंथाग्रंथ १५०९ । संवत १६९४ वर्षे फागण सुदि १० भौमे । तपागच्छाधिराज भट्टारकप्रभु श्री श्री ५ **विजयानंदसूरि**विजयराज्ये सकलपण्डितसभाशृंगार प० श्री **धनहर्षगणि** शिष्य प० **रत्नविजये**नालेखि ॥

श्री० वाडीपार्श्वनाथजी ज्ञानभंडार पाटण

चातुर्मासिकव्याख्यानं (बालावबोधः) प्र. ७२८

संवत् १६९४ वर्षे मागशीर्ष सुदि ५ शनौ श्री **पत्तनमध्ये** श्रीपूर्णिमापक्षे वाचनाचार्य वा० श्री**देवसुंदर**शिष्य**कल्याणसुंदर–लाभसुंदर–लब्धिसुंदरादि**वाच्यमानं चिरं **नंद्यात्** ॥ लेखितं मुनि **कल्याण**सुन्दरेण ।

श्रीमोहनलालजी ज्ञानभंडार. सुरत.

श्रीप्रत्येकबुद्धकथा प्र. ७२९

सकलपण्डितशिरोमणि पण्डित श्री ५ **सौभाग्यविजय**गणि तत्शिष्य गणि **बुद्धिविजय**-लिखितं । संवत् १६९४ वर्षे **राजनगरे** लिखितं आपकाजे पठनार्थं ॥

श्री जै० आ० पुस्त० सुरत.

श्रीप्रश्नव्याकरणसूत्रवृत्तिः प्र. ७३०

सं० १६९४ कार्त्तिकसितपंचम्यां । श्री**स्तंभतीर्थ**वास्तव्य श्रीश्रीमालीवृद्धशाखीय । दो० **लहूया** । तद्भार्या **चंपाइ** । तयोः पुत्र दो० **सुमतिदास** दो० **कीका** दो० **केशव** । दो० **सुमतिदास** भार्या **सोभागदे** । तयोः पुत्र दोसी **जयकरणेन** । स्वबंधु दो० **कानजी** प्रमुख-कुटुंबयुतेन स्वीयकोशवृद्धये स्वश्रेयसे । ४५ आगमसूत्रवृत्तिपुस्तकं लिखापितं । तन्मध्ये दशमांगस्य वृत्तिरियं गृहीता । शुभं भवतु ॥

मु. श्री हं. वि. सं. शास्त्रसंग्रह वडोदरा.

श्रीप्राकृतनाममाला प्र. ७३१

संवत् १६९४ वर्षे आसो वदि १४ दिने । श्रीमत्तपागच्छे भट्टारक श्री **विजयाणंदसूरी**श्वर-राज्ये सकलकोविदकोटीरहीर पंडित श्री**मानविजय**गणिशिष्य पं० श्री **अमृतविजय**गणितत्-शिष्य ग० **मुक्तिविजयेन** लिखिता स्ववाचनार्थं ।

आ० श्री० वि० नी० सू० सं० ज्ञा० भं० खंभात

श्रीभगवतीसूत्रम् प्र. ७३२

श्री**स्तंभतीर्थे** वास्तव्य श्रीश्री**माली**ज्ञातीय **वृद्धशाखीय** दो० **लहुया** तद्भर्या बाइ **चंपाइ** तयोः पुत्र दो० **सुमतिदास** दो० **कीका** दो० **केशव** । दो० **सुमतिदास** भार्या **सोभागदे** तयोः पुत्र दो० **जयकरणेन** स्वबंधु दो० **कानजी**प्रमुखकुटुंबयुतेन ४५. आगमसूत्रवृत्तिपुस्तकं लिखापितं स्वश्रेयसे । तन्मध्ये श्रीपंचमांगं सूत्रमिदं गृहीतं । सं० १६९४ वर्षे कार्तिकमासे द्वितीयायां तिथाविति मंगलं ।

श्री० मु० वि० शा० सं० छाणी

श्रीमहावीरस्तवनम् प्र. ७३३

संवत् १६९४ वर्षे वैशाखमासे कृष्णपक्षे चतुर्दशीदिने बुधवासरे श्रीमद्**बर्हानपुर**-महानगरे लिखितं

श्री जैन संघ ज्ञानभंडार. राधनपुर.

श्रीशोभनस्तुतिः ७३४

संवत् १६९४ वर्षे कार्तिकमासे शुद्धपक्षे सप्तम्यां तिथौ रविवारे लिखितमिदं श्री**सूर्यपुर**-बंदिरे लिखितं। वाच्यमानं चिरं जीयात्। ग्रंथाग्रंथ श्लोक संख्या २१२॥ बाइ **कांहांनबाई** पठनार्थम्॥

पं० श्री० ला० वि० सं० ज्ञानभंडार. राधनपुर.

श्रीशांतिनाथस्तोत्रम् प्र, ७३५

इति शांतिनाथस्तोत्रं। संवत् १६९४ वर्षे कार्तिक सुदि ४। बुधवारे लिखितं० उपाध्याय-श्री श्री श्री श्री ॥ **गुणकल्लोल**गणि पंडित श्री श्री श्री**देवकल्लोल**गणि। श्री**मानकल्लोल-दानकल्लोल**लिखितं॥

आ० श्री० वि० वी० सू० ज्ञा० मं० राधनपुर

श्रीकल्पसूत्रम् प्र. ७३६

संवत् १६९५ वर्षे शाके प्रथमभाद्रपदमासे कृष्णपक्षे चतुर्थीतिथौ शनिवासरे अंतर्वाच्यं लिखितं पं० श्री**सुरतांण**लिखितं॥

श्री वाडीपार्श्वनाथजी ज्ञानभंडार पाटण

श्रीसूर्यप्रज्ञप्तिसूत्रम् प्र. ७३७

संवत् सोल पंचाणूया वर्षे **वीसलनगर**सत्कभांडागारे प्रतिरियं मुक्ता चोपडागोत्रे सं. **ओघा** पुत्र सं. **उदा** भार्या **सरूपी** पुत्र सं० **धन्ना** सं. **आभू** भगिनी श्राविका **वीरा** स्वपुण्यार्थं श्रीसूर्यप्रज्ञप्तिसूत्रउपांगं भांडागारे मुक्तं। वाच्यमानं चिरं नंद्यात्॥

गां० गो० ना० सं० ज्ञ० भं० राजकोट.

श्रीषट्नवकाररासः प्र. ७३८

संवत् १६९६ वर्षे काति सुदि ११ दिने गणि श्री ५ श्री **न्यायसागर** तत् शिष्य मुनिवर-**वीरसागर** लिखितं **गंघाणी**नगरमध्ये लिखितं ॥ शुभं भवतु ॥ श्रीरस्तु ॥ श्रीः ॥

श्री० जै० आ० पु० सुरत.

श्रीतर्कभाषासूत्रम् प्र. ७३९

लि० सं० १६९७ ज्येष्ठ वदी १४ वार रवौ श्री **बुर्हानपुर**नगरे............विजयराज्ये महोपाध्यायश्री ५ श्री **देवविजय**गणिचरणसेवकगणि**धर्मविजयेन** लिपीकृता । स्ववाचनार्थं । शुभं भवतु लेखकपाठकयोः ॥

मु. श्री. हं. वि. सं० शा. सं. वडोदरा.

श्रीदशवैकालिकसूत्रबृहद्वृत्तिः प्र. ७४०

संवत् १६९७ वर्षे आषाढमासे शुक्लपक्षे चतुर्थीदिने वार शुक्रे ॥ छ ॥ श्री **जेसल-मेरु**नगरे । ओसवालवंसे **दरडा**गोत्रे । सा० **करमचंद** पुत्र सा० **रायचंद** लिपीकृतं ॥ छ ॥ शुभं भवतु ॥ कल्याणमस्तु ॥ ॥ छ ॥ श्रीरस्तु ॥ छ ॥ छ ॥ छ ॥

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

श्रीधर्मरत्नमंजूषा प्र. ७४१

प्रशस्तिः ॥ वाचकचक्रचक्रवर्तिभालतिलकायमानतपागच्छगगनांगगनभोमणि महोपाध्याय श्री५श्री **देवविजय**गणिशिष्य पंडितश्री**मानविजय**गणिवाचनार्थं लिखिता ॥ संवत् १६९७ वर्षे कार्त्तिक शुद १० गुरौ श्री **बर्हानपुरे** ॥ **भट परषोतम** लिखितं ॥ शुभं भवतु ॥ कल्याणमस्तु ॥ छ ॥ श्री ॥ छ ॥

श्री० आ० क० सं० ज्ञानभंडार अमदावाद्

श्रीशत्रुंजयउद्धारः प्र. ७४२

सं० १६९७ वर्षे चैत्र सुदि १३ दिने पं० **विनयविमल**गणि शिष्य पं० **धनविमल**-लिखितं साध्वी **जीवी** पठनार्थं ॥ छ ॥

साह श्री **केशवजी** तथा श्राविका **इलाइ** पठनार्थं लिखितोऽयं उद्धारः शेत्रुंजय पर्वतस्य.

श्री० हु० मु० सं० ज्ञा० भं० सुरत.

श्रीसाधुवंदना प्र. ७४३

संवत् सोलसताणुयइ। चैत्रमास। श्री अमदावादो रे। **समयसुंदर** कहइ मइ कीधी। साधुवंदना सुगुरु प्रसादो रे ॥९॥ इति श्री साधुवंदना समाप्ता ॥ ढाल १८ गाथा ५१६ साधुपणे— ग्रंथाग्रंथ ॥ ७५० ॥ श्रीरस्तु ॥ पत्र २०

आ० श्री० वि० ल० सू० सं० शा० सं. खंभात.

श्रीअवचूरिः (?) प्र. ७४४

सं. १६९८ वर्षे फागुण सुदि ६ गुरुवासरे **सिद्धिसूरि** चेला **ववेकरणेन** (विवेकरत्नेन) लिखतं स्वार्थे पाठनार्थं **उर्नागपुर**मध्ये लिखितं ॥

आ. श्री. वि. दा. सू. सं. शा. सं. छाणी.

श्रीरूपसेनचरित्रम् प्र. ७४५

इति श्री ५। श्रीरूपसेनकथा संपूर्णा। ग्रंथाग्रंथ श्लोकाः १२७०। संवत् १६९८ वर्षे। वइशाख सुद ८। दिने कल्याणमस्तु। श्रीरस्तु ॥

प्र. श्री. कां. वि. सं. शा. सं. वडोदरा.

श्रीकल्पकिरणावलिः प्र. ७४६

संवत् १६९८ वर्षे कार्तिक सुदि ५ गुरौ लिपीकृतम्। करकृतमपराधं क्षंतुमर्हंति संतः। श्रीरस्तु। कल्याणमस्तु लेखकपाठकयोश्चिरं नंदतु ॥ छः ॥ श्री ॥

आ० श्री० वि० मे० सू० सं० ज्ञा० भं० अमदावाद.

श्रीगुर्वावलीस्वाध्यायः प्र. ७४७

पंडित**वनेविजय** लिखितं. **मांनसुंदर**वाचनार्थं ॥ संवत् १६९८ वर्षे श्रावण वदी १३ कुजे ॥ लिखितमस्ति। श्रेयो बभूव।

पं० श्री० वी० वि० ज्ञा० भं० अमदावाद.

श्रीचंदराजानो रासः प्र. ७४८

श्रीअंचलगच्छे भट्टारक श्रीकल्याणसागरसूरिविजयराज्ये पंडित श्रीश्रीप्रेमजीगणि तत् शिष्यदेवमूर्ति लिपीकृतं स्ववाचनार्थं । संवत् १६९८ वर्षे सुभुजनगरमध्ये लिखितं दिनइ. मध्ये ऋषभदेवजी वाचनार्थं । श्री ॥

प्र० श्री० कां० वि० सं० शा० सं० वडोदरा.

श्रीदीपालिकाकल्प–गद्य प्र. ७४९

प्रौढप्रत्यर्थिराजद्विरदकंठपीठकंठीरवायमाण पादशाह श्री ५ अकबर सूर्यसहस्रनामाध्यापक । श्रीशत्रुंजयतीर्थकरमोचनाद्यनेकसुकृतविधापक ॥ महोपाध्याय श्री भानुचंद्रगणि-शिष्याष्टोत्तरशतावधानसाधनप्रमुदितपादशाहश्रीअकबरजहांगीरशाहिप्रदत्त (पुस्तकहृम ।) नासिह दिरजगामद्वितीय द्वितीयाभिधान महोपाध्याय श्री ५. श्रीसिद्धिचंद्रगणिशिष्यमुनिसुद्धिचंद्र लिखितं । संवत् १६९८ वर्षे भाद्रवा वदि १३ दिने श्रीविद्यापुरे लिपीकृतं ॥ शुभं भवतु ॥ कल्याणमस्तु ॥

प्र० श्री० कां वि० सं० शा० सं० वडोदरा.

श्रीपाशककेवलिचरित्रम् प्र. ७५०

संवत् १६९८ ॥ वर्षे । आसोइनी पुन्यमदिने ॥ लिखितं ॥ शुक्रवारे मुनिचारित्रसौभाग्य-लिखितं ॥ मुनिरत्नसौभाग्यवाचनार्थं ॥ श्रीहरणाद्रीमध्ये ॥ तपागच्छे ॥ श्रीः शुभवतां ॥ श्री श्री श्री श्री । कल्याणमस्तु ॥

आ. श्री. वि. दा. सू. सं. शास्त्रसंग्रह. छाणी

श्रीप्राकृतचंद्रिका प्र. ७५१

वर्षे ज्ञाननवर्तुभूमिकलते (१६९८) मासे शुभे श्रावणे
पक्षे शुक्ल इति द्वितीयदिवसे बुद्धानगर्यामथ ।

शिष्यो **देवनरेन्द्रकीर्त्ति**गणिनां नाम्ना **जगन्नाथसन्** (?)
पुस्तं लेखयति प्रशस्तमनघं सत्प्राकृतव्याकृतेः ॥ १ ॥
शुभं भवतु । श्लोक १५००

आ० श्री. वि० ल० स० ज्ञा० सं० छाणी

श्रीसिंहासनद्वात्रिंशिका प्र. ७५२

प्रशस्तिः । इति सिंहासनद्वात्रिंशिका समाप्ता ॥ छः ॥ पंडित श्री श्री श्री **सूरकुशलगणि-**शिष्यगणि **विबुधकुशलेन** लिखितं स्ववाचनाय संवत् १६९८ वर्षे पोषशुक्लद्वितीयादिने श्री**हलारदेशे बेढग्रामे** ॥ श्री ॥

पं. श्री. वी. वि. ज्ञानभंडार. अमदावाद.

श्रीअर्हन्नामसहस्रसमुच्चयः प्र. ७५३

लि० **धर्मविजयेन** संवत् १६९९ वर्षे । श्रीः

श्री जैन आनंद पुस्तकालय. सुरत.

श्रीआवश्यकदीपिका प्र. ७५४

संपूर्ण कृतः ॥ इयं षडावश्यकदीपिकार्थबंधसंख्यया । श्लोकानां हि सहस्राणि ज्ञेयानि अंकतः॥ ग्रंथाग्रंथ सहस्र ९००० । सं० १६९९ वर्षे कार्तिकमासे शुक्लपक्षे दशम्यां तिथौ गुरुवासरे श्री **सीरोहीनगर**मध्ये महाराज श्री **अषयराजजो**विजयराज्ये । लेषमस्तु । कल्याणमस्तु । श्री ॥

श्री. मु. वि. शा. सं. छाणी.

श्रीकल्पसूत्रम् प्र. ७५५

संवत् १६९९ वर्षे कार्तिकमासे शुक्लपक्षे चतुर्दशीतिथौ सोमवासरे लिपीकृतं ऋषिश्री **हरजी** तत्शिष्यमुनि**नरसंघेण** आत्मार्थे **रामसर**मध्ये । शुभं भवतु । कल्याणमस्तु । श्रीरस्तु ॥

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

श्रीकल्पसूत्रबालावबोधः प्र. ७५६

प्रशस्तिः ॥ इति श्रीकल्पसूत्रं संपूर्णं । कल्पसूत्रसंख्या ॥ १२१६ सूत्र संवत ॥ १६९९ वर्षे ॥ पौषसिते ॥ प्रथम २दिने लिखितं ॥ श्रीरस्तु ॥ श्रीः ॥ कल्याणमस्तु ॥

आ० श्री० वि० दा० सू० सं० सा० सं० छाणी.

श्रीकायस्थितिप्रकरणम् प्र. ७५७

प्रशस्तिः । इति लघ्वल्पबहुत्वं ॥ लिखितं च सकलवाचकसार्वभौम महोपाध्याय श्री ९ श्री**भावविजय**गणिशिष्य**मानविजय**गणिना ॥ संवत् १६९९ वर्षे मागसिर वदि १३ दिने ॥ **राजनगरे** ॥

आ० श्री० वि० ल० सू० सं० ज्ञानभंडार खंभात

श्रीकाव्यकल्पलता प्र. ७५८

लेखिता चेयं प्रतिः संवत् १६९९ वर्षे श्री**स्तंभतीर्थनगर**वास्तव्य**धनजी**सधर्मचारिण्या शशधरकरनिकरसब्रह्मचारिब्रह्मचर्यादिगुणधारिण्या श्राविका**धनादि**संज्ञया ज्ञानावरणकर्मक्षयार्थं महोपाध्याय श्री श्री श्री **भावविजयगणि** शिष्यगणि**मानविजय**वाचनार्थं शोधिता चेयमध्ययनं विदधतानेनैव यथावबोधं श्रेयोऽस्तु श्रीतपागण सुपर्व पर्वतम......न नंदन वन कल्पश्रीविजयपक्षस्य कल्याणमस्तु । चिरं नंदतात् चेयमानंदयंती कोविदानिति । श्रीः

आ० श्री. वि० दा० सू० सं० शा० सं० छाणी.

श्रीदंडकस्तबकः प्र. ७५९

प्रशस्तिः ॥ इति विचारषट्त्रिंशिकास्तोत्रं संपूर्णम् ॥ ॥ संवत् १६९९ वर्षे ॥ वैशाखवदि ९ भौमवासरे श्री**नवानगरे** ॥ गणिश्री**पद्मकुशल**लिखितं ॥ ज्ञानवृद्ध्यर्थं ॥ कल्याणमस्तु ॥ ॥ छ ॥ श्री ॥

आ. श्री. वि. मे. सू. सं. ज्ञानभंडार अमदावाद.

श्रीमाघकाव्यम् प्र. ७६०

संवत् १६९९ वर्षे आषाढमासे कृष्णपक्षे एकादशीतिथौ वाचनाचार्यवर्य्य गांभीर्यधुर्य्य वा० श्री श्री १०८ श्री **गुणवर्धन**गणिगजेंद्राणां शिष्य पंडित श्री श्री ७ श्री **सोमजी** तत्शिष्य-पं. **शांतिहर्ष** तत् शिष्य **जिनहर्ष**लिखितं ॥ छ ॥ श्री श्रुतदेव्या० ॥ छ ॥ श्रीः ॥

पं० श्री० उ० वि० सं० शा० सं० पाणस्मा.

श्रीवाग्भटालंकारः प्र. ७६१

संवत् १६९९ वर्षे आश्विनमासे शुक्लपक्षे चतुर्थीदिने रविवारे **अवरंगाबाद**ग्रामे भट्टारक विश्वविश्वंभराभालस्थलतिलकायमान भट्टारक श्री श्री श्री १०४ श्री **विजयदेवसूरि**शिष्यगणि-**विनीतविजय**लिखितमिदं पुस्तकं सुखाय भवतु ॥ छ ॥

आ० श्री० वि० वी० सू० ज्ञानमंदिर राधनपुर

श्रीवासुपूज्यरासः प्र. ७६२

संवत १६९९ वर्षे ज्येष्ट वदि प्रतिपदातिथौ भृगुवारे लिखितं ॥ श्रीरस्तु । श्री । शुभं भवतु ॥ **कडुआमति**गच्छे । बाइ **हेमाइ** पठनार्थं । कर्मक्षयार्थं लिखापितं । शुभं भवतु ॥

श्री० नि० वि० जी० म० पु० पाटण.

श्रीसिद्धयोगिनीभाष्यम् प्र. ७६३

सं० १६९९ लिखितं मुनि**मतिरत्नेन** । **वाघउडा**मध्ये । श्रीरस्तु । कल्याणमस्तु ।

प्र० श्री० कां० वि० सं० शा० सं० वडोदरा.

श्रीपार्श्वनाथपुराणम् प्र. ७६४

संवति १७०० वर्षे । आश्विन मासे । श्री श्री श्री**जिनराजसूरि**राज्ये । श्रीखरतरगच्छे । श्री**पट्टणा**नगरे । श्रीखेमशाखायां । व्यलेखि वा० **विद्याकीर्ति**गणिना वाच्यमाना चिरं नंदता-ल्लेखकपाठकयोः ॥

मु. श्री. हं. वि. सं. शा. सं. वडोदरा.

श्रीप्रत्येकबुद्धचतुष्पदी प्र. ७६५

संवत् १७०० वर्षे मार्गशीर्षमासे कृष्णपक्षे द्वितीयातिथौ भृगुवासरे श्रीविधिपक्षगच्छे भट्टारक श्री ५ श्री **गजसागर**सूरीश्वर तत् शिष्य पं० श्री श्री श्री **ललितसागर** तत् शिष्य ऋ० श्री **माणिक्यसागर** तत् शिष्य ऋ० **ज्ञानसागर**लिखित्तं स्वपठनार्थं । शुभं भवतु इति श्रेयः ॥

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

श्रीपृथ्वीचंद्रचरित्रम् प्र. ७६६

प्रशस्तिः ॥ अंकतोऽपि ग्रंथाग्रं० ॥ २६५४ ॥ कृतिरियमुपाध्यायश्री**जयसागरस्य** ॥ संवत् १७०० वर्षे वैशाखमासे प्रथमपक्षे पतिपत्तिथावादित्यवारे चित्रानक्षत्रे ॥ श्रीमद्**ध्वज-वाटकदुर्गो सज्जनर्षिणा** इदं पृथ्वीचंद्राभिधानं चरितं व्यलिख्यत ॥ आ चंद्रार्कं नंदतादयं श्रीपृथ्वीचंद्रचरिताभिधो ग्रंथः ॥

श्रीमद्वीरगणेशतः समभवद् गच्छस्थितिः पूर्व्वत-
स्तस्यां चन्द्रकुलं च **कोटिकगणं** श्रीवज्रशाखान्वितम् ।
पश्चाद् **दुर्लभराज**पर्षदि जिते वादिव्रजे सूरिभिः
सत्यार्थमकरोन्नृपः खरतरेत्याख्यां जगद्विश्रुताम् ॥ १ ॥

तस्मिन् खरतरगच्छे श्री**जिनमाणिक्य**सूरयोऽभवन् तत्पदानुक्रमः श्री**सुमतिमंदिर**गणि-तच्छिष्य श्री**जयनंदनजीगणिः** तच्छिष्यश्री**प्रेमधीर**मुनींद्राः अभवन् जगतीतले तत्पदांभोजभृंगा-भ**दुलिचंद**गणितच्छिष्य पं. प्र. श्री**रत्नोदयः** तच्छिष्यपंडित**मल्लेन स्वात्मार्थं** श्रीपृथ्वीचंद्रराजर्षिचरित्रं लिपीचक्रे ॥ जंगमयुगप्रधान भट्टारक श्री**जिनचंद्र**सूरिविजयराज्ये ॥ संवत् १८७८ शाके १७४३ प्रवर्त्तमाने मासोत्तममासे श्रावणमासे प्रथमपक्षे तिथौ पंचम्यां गुरौ **लक्ष्मणा**पुरी-मध्ये नवाब **गाजद्दीनहैदर**विजयराज्ये ॥ श्रीरस्तु ॥ कल्याणमस्तु ॥

श्री. हु० मु० ज्ञानभंडार सुरत.

सर्वज्ञशतकस्तबकः प्र. ७६७

संवत् १७०० वर्षे वैशाख सुदि २ रवौ पंडितचक्रचक्रवर्ति पंडित श्री**देवसागर**गणि-शिष्य पं० कनकसागरलिखितं. स्ववाचनकृते श्री**राजनगरे** ॥ श्रेयोऽस्तु ॥ चिरं नंदतु ॥ श्रीः ॥

पं० श्री. उ० वि० सं० ज्ञा० भं० चाणस्मा.

श्रीन्यायरत्नप्रकरणम् प्र. ७६८

॥ संवत्–शशधर–गगन–मुनि–शशि १७०१ वर्षे ॥ आश्विनमासे शुक्लपक्षे दशमीवासरे सोमवारे । लिखितं श्रीविद्यापुरोप**कंटस्याहपुरे** पादशाह श्री **महम्मुद** सुरत्राणदत्तबहुमान तपा-गच्छाधिराज सकल भट्टारक शिरोमणि भट्टारक श्री ५ श्री **विजयदेवसूरीश्वर**चरणारविंदयुगल-सेवालिसमानगणि**नयविजयेन** ॥ शुभं भूयात् लेखकपाठकयोः ॥ यादृशं.......................
....मम दोषो न दीयते ॥ १ ॥ छ ॥ छ ॥ :

आ. श्री० वि० मे० सू० सं० ज्ञान भंडार अमदावाद

कर्मग्रंथस्तबकः प्र. ७६९

संवत् १७०२ ज्येष्ठवदी १० गुरौ लिखितं श्रीमद्**कल्याणविजय**शिष्येण वाचक**धन-विजयेन** परोपकरादिपुण्यकृते.

प्र० श्री० कां० वि० सं० शा० सं० वडोदरा.

श्रीपृथ्वीराजवेली सवृत्तिः प्र. ७७०

संवत् १७०२ वर्षे मार्गशीर्षमासे श्री**मद्राजदुंगे** पृथ्वीराजस्य वल्ली सटीका लिपीकृता ॥ पण्डित श्री ५ श्री **लक्ष्मीसोमगणि** तत् भ्राता श्री. ५ **सांमलसोमगणि** तच्चरणसेवक **जगवल्लभेन** लिखितमस्ति ॥

श्री० मु० वि० सं० शा० सं० छाणी

श्रीसम्यक्त्वकौमुदी प्र. ७७१

प्रशस्तिः । संवत् १७०२ वर्षे फाल्गुनमासे कृष्णपक्षे त्रयोदशीतिथौ भौमवारे **श्रीमल्लवणकरणसरसि** लिखिता प्रतिरियम् । शुभं भूयात् । श्रीरस्तु ।

श्री. जै. आ. पु. सुरत.

श्रीऔपपातिकसूत्रवृत्तिः प्र. ७७२

संवत् १७०३ वर्षे कार्तिकमासे कृष्णपक्षे द्वितीयातिथौ शुक्रवारे लिखितं सूराणा **ताराचंद वीजाउत** । शुभं भूयात् लेखकपाठकयोः । आचार्य श्री श्री श्री श्री श्री श्री श्री **कल्याणजी**प्रसादात् माहारिष श्री **हरषाजी** पठनार्थं श्री **मेडता**मध्ये

आ० श्री० वि० मे. सू० सं० ज्ञा० भं० अमदावाद.

श्रीकल्पदीपिका प्र. ७७३

संवत् १७०३ वर्षे कार्तिकमासे शुक्लपक्षे ११ तिथौ शुक्रवारे लिखितं गणि**गजेंद्रगणि**-श्री श्री ११ श्री श्री **लब्धिविजय**गणि तत्शिष्य पदपंकज मधुकरशिष्य**हर्षविजयेना**लिखि **पदधरीनगरे** श्रीचिंतामणिपार्श्वनाथप्रसादात् । श्रीरस्तु । कल्याणमस्तु ॥ छः ॥ श्रेयोऽस्तु ॥ शुभं भवतु ॥

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी

श्रीकल्पसूत्रं-सवृत्ति प्र. ७७४

प्रशस्तिः ॥ इति कल्पलतानाम्नी कल्पसूत्रटीका समाप्ता । संवत् १७०३ वर्षे ॥ कार्तिक सुदि ११ सोमे ॥ श्री**खरतरगच्छे** । भट्टारक युगप्रधान श्री**जिनरत्नसूरि**शिष्येण उपा०-**साधुहर्षेण** लिखितं ॥ श्री**आगरानगरे** ॥ श्रीस्तात्

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

श्रीज्योतिषनाममाला प्र. ७७५

सं. १७०३ वर्षे शाके १५६८ प्रवर्त्तमाने पंडित श्री ५ श्री**हर्षविजय**लिखितं **वांसा**ग्राम-मध्ये । आसो सुदि ५ दिने । इति मंगलं ।........ ....

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

श्रीज्योतिषनाममाला प्र. ७७६

प्रशस्तिः ।। इति श्री ज्योतिषनाममाला संपूर्णा ।। संवत् १७०३ वर्षे शाके १५६८ प्रवर्त्तमाने ।। पंडित श्री ५ श्री **कनकविजय**गणिशिष्य पंडित श्री ५ श्री **हर्षविजयगणि** तत् भ्रातृ गणि**जयविजय** लिखितं **वांसा** ग्राममध्ये आसो सुदि५ दिने । इति मंगलं ।। यादृशं पुस्तकं दृष्ट्वा...मम दोषो न दीयते ।। १ ।।

सा० श्री० हे० सं० ज्ञा० भं० साणंद.

श्रीदशवैकालिकवृत्तिः प्र. ७७७

संवत् १७०३ वर्षे चैत्र वदी अष्टमी तिथौ शनिवासरे श्री**राजनगरे** गांधी **हेमा** सुत गांधी **हरजी** तस्य भार्या बाइ **मरघादे** तस्य सुत **षिमा** आत्मपुण्यार्थं श्रीदशवैकालिकसूत्रं सावचूरि लिखितं । शुभं भवतु ।।

आ० श्री. वि० वी० सू० ज्ञा० मं० राधनपुर.

श्रीरत्नसारकुमाररासः प्र. ७७८

सं. १७०३ वर्षे शाके १५६८ प्रवर्तमाने दक्षणायनगते श्रीसूर्ये हैमंतनाम्नि ऋतौ मासोत्तम मृगशिर मासे कृष्णपक्षे नवमीतिथौ रविवासरे पंडित श्री ५ **लक्ष्मीचंद** तत् शिष्य चेला **भीमजी** लिपीकृतं । शुभमस्तु । कृष्णपक्षे नवमीतिथौ रविवासरे पंडित श्री ५ श्री लक्ष्मीचंद तत् शिष्य चेला **भीमजी** लिपीकृतं । शुभं भवतु ।।

श्री० मु० वि० शा० सं० छाणी.

श्रीशालिभद्रचोपाई प्र. ७७९

पंडित श्री **मेरुविजय**गणिशिष्य**प्रेमविजय** लिखितं । संवत् १७०३ वर्षे श्रावणमासे कृष्णपक्षे तिथि २ दिने वार रवौ पंडित श्री **वृद्धिविजयगणि** शिष्य मुनि**वीरविजय**पठनार्थं

श्री. मु० वि० शा० सं० छाणी.

श्रीअवंतीसुकुमालरासः प्र. ७८०

संवत् १७०४ वर्षे पौषमासे शुक्लपक्षे चतुर्थी रविदिने लिखितं श्री**अंचलगच्छे** परीख **जसू** सुत परीख **लीलाधर** भार्या **सहिजां** पुत्री परमधर्मिणी श्राविका **धनबाइ** पठनार्थं ॥ श्रीस्तात् ॥ श्री**अहम्मदावाद**मध्ये ॥ श्रीः ॥

श्री. जैनविद्याशाळा० ज्ञा० भं० अमदावाद.

श्रीऋषिमंडलस्तबकः प्र. ७८१

लिखितं गणि **ऋद्धिसुंदरेण** ॥ संवत् १७०४ वर्षे श्रावण सुदि ८ ॥ सोनी **कपुरचंद** तत्पुत्री **रुषमा** वाचनार्थं श्री **मेदिनोपुरे** ॥ शुभं भवतु ॥

आ० श्री० वी० वि० सू० ज्ञा० भं० राधनपुर.

श्रीकायस्थितिस्तवनाचूरिः प्र. ७८२

संवत् १७०४ वर्षे श्री**नवानगरे** श्री**अंचलगच्छे** वा० श्री**भावशेखर** गणि लिखितं मु० **भुवनशेखर**पठनार्थं ॥

श्री नि० वि० जी० म० पु० चाणस्मा.

श्रीनारचंद्रज्योतिषः प्र. ७८३

संवत् १७०४ वर्षे श्री **अंचलगच्छे** पठनार्थं लिखितं श्री **पद्मसागरगणिना** श्री **बुरहानपुर**मध्ये ॥

आ. श्री. वि. दा. सू. सं. शा. सं. छाणी.

श्रीनेमनाथचरित्रम् प्र. ७८७

प्रशस्तिः ॥ इति श्रीयादवकुलदिणयरस्स चरितं संपूर्णं स्यात् ॥ संवत् १७०४ ॥ वर्षे आश्विनकृष्णपक्षे तिथौ अमावस्यां शनिवासरे च शुभयोगे **पिपणापुरे** ॥ लिखितं पूज्याद्य ऋषि **पैमाशिशु** ॥ छ ॥ छ ॥ छ ॥

आ० श्री० वि० वी० सू० ज्ञा० मं० राधनपुर.

श्रीमन्त्रस्तव– धरणोरगेंद्रस्तवटीका. प्र. ७८८

सं० १७०४ वर्षे वैशाखशुक्लचतुर्दश्यां **बृहन्नगरे** ॥ ऋद्धिवृद्धिरस्तु ॥

श्री. जै० सं० ज्ञा० भं० राधनपुर.

श्रीनवतत्वस्तबकः प्र. ७८९

संवत् १७०५ वर्षे मार्गशीर्ष वदि २ दिने श्रा० **प्रेमलदे**पठनार्थं । शुभं भवतु ॥ सकलपंडितशिरोमणि पं. श्रीश्री**विजयगणि**शिष्य ग० **मेरुविजयो** लिलेख ॥ श्री**सुरति**बंदिरे ॥

श्री. मु. वि. शा. सं. छाणी.

श्रीविपाकसूत्रम् प्र. ७९०

संवत् १७०५ वर्षे वैशाखशुक्लद्वितीयायां जगद्गुरुभट्टारकश्री**हीरविजयसूरीश्वर**पट्टालंकार भ० श्री**विजयसेनसूरि**पट्टोदयाचलदिनकरसमान युगप्रधानोपमान भ० श्री**विजयदेवसूरीश्वराणां** आचार्यश्री**विजयसिंह**सूरीश्वरादिप्रवर्द्धमानपरिवारबंधुराणां श्री**शत्रुंजय**गिरनारप्रमुखानेकतीर्थयात्रासंघतिलककृतार्थितमनुष्यावतारया श्राविकया **फूला**नाम्न्या प्रतिरियं प्रतिलाभिता । वाच्यमाना चिरं जयतु ॥

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

श्रीचंपकश्रेष्ठिकथा प्र. ७९१

प्रशस्तिः ॥ इति श्रीचंपकश्रेष्ठिकथा संपूर्णा ॥ वाचकचक्रचक्रवर्त्ति महोपाध्याय श्री ५ श्री**देवविजय**गणिशिष्यगणि**दयाविजयेन** लिखितं ॥ श्री**सूर्यपुरे** ॥ संवत् १७०६ वर्षे ज्येष्ठ मासे १३ दिने ॥ मुनि**नयविजय**पठनार्थं ॥

आ० श्री० वि० मे० सू० सं० ज्ञा० भं० अमदावाद.

श्रीवीतरागस्तवः प्र. ७९२

संवत् १७०६ वर्षे कार्तिकमासे शुक्लपक्षे एकादशी सोमे गणिगुणगरिष्ठगणिश्री**धर्म्मसौभाग्य**शिष्यपंडित**विजयसौभाग्ये**नालेखि **भृगुकच्छे** मुनिकृपासौभाग्यपठनकृते । चिरं जियात्॥

श्री० गां० गो० ना० सं० ज्ञा० भं० राजकोट.

श्रीलोकनालिकाबालावबोधः प्र. ७९३

संवत् १७०६ वर्षे मिति कार्तिक वदि ३ वार रविपुत्रदिने लिखितं **कुअरपाल** धर्मार्थी स्वयं समजणार्थं ॥ शुभं भवतु ॥ कल्याणमस्तु ॥

मुनि श्री हुकममुनिजी ज्ञानभंडार सुरत.

श्रीउपदेशमालाप्रकरणम् प्र. ७९४

सं० १७०८ वर्षे फागुण वदि ४ बुधे लिखितं श्री**काश्मीरपुरे** । पंडित**देवकल्लोलगणिना** श्रा० **धनबाई** पठनार्थं ॥ शुभं भवतु ॥

श्री० जै० वि० शा० ज्ञा० भं० अमदावाद.

श्रीपर्यंताराधनास्तबकः प्र. ७९५

संवत् १७०८ वर्षे माघ सुदी ४ रवौ लिखितं **नवीननगरे** पं. प्रवर पं० श्री**भक्तिकुशल**गणिशिष्यगणि**सुंदरकुशलेन** । लेखकवाचकयोः श्रीरस्तु ॥

श्री० मु० वि० शा० सं० छाणी.

श्रीबृहत्संग्रहणीसूत्रम् प्र. ७९६

संवत् १७०८ वर्षे शुक्लपक्षे दशम्यां तिथौ आदित्यवारे आचार्य श्री. (...... रद) सूरिसंताने अनुक्रमेण वाचनाचार्य्यश्री**समयकल्लोल**गणिवराणामंतेवासी शिष्यमुख्य पंडितोत्तमश्री**धर्मकल्लोला**नामंतेवासी शिष्यमुख्य पंडितोत्तम श्रीमुनि**मेरुगणिवराणां** शिष्य पं. **ज्ञानहर्ष**मुनिनालेखि शिष्य पं० चिरं. **रामचंद**पठनार्थं श्री**मरोटमहादुर्गे** । श्रीरस्तु॥

श्री जैन संघ ज्ञानभंडार पाटण.

श्रीआचारांगसूत्रम् प्र. ७९७

संवत् १७१० वर्षे वैशाख शुदि ३ रवौ अहम्मदावादवास्तव्यश्रीश्रीमालीज्ञातीयवृद्ध-शाखीय सा. अदा भार्या चंगादे सुत सा. केसवभार्या मेघबाईनाम्न्या श्रीआचारांगसूत्रप्रतिः प्रदत्ता ॥ पंडित.. ।

शुभं भवतु ॥ वाच्यमानं पुस्तकं चिरं नंदतु ॥

श्री. जै० सं० ज्ञा० भं० सीनोर.

उपदेशमालाप्रकरणम् प्र. ७९८

संवत् १७१० वर्षे वैशाखमासे शुक्लपक्षे अक्षयतृतीयादिने श्रीखंभाइतनगरमध्ये लिखितं. सुश्राविका फूलापठनार्थम् । श्रीरस्तु ॥ कल्याणमस्तु ॥

प्र० श्री० कां० वि० सं० शा० सं० वडोदरा.

श्रीजैनतत्त्वसारः सटिप्पनः प्र. ७९९

लिखितश्च सं. १७१० वर्षे श्रीदिल्लीमहानगरे पं० रविवर्द्धनगणिना स्ववाचनकृते.

प्र. श्री. का. वि. सं. शा. सं. वडोदरा.

श्रीदशवैकालिकसूत्रस्तबकः प्र. ८००

संवत् १७१० वर्षे आश्विनमासे शुक्लपक्षे एकादशीतिथौ बृहस्पतिवासरे श्रीवीरपुर-नगरे लिपीकृता एषा पुस्तिका । सुश्राविका द्वादशव्रतधारिणी बाई नांनो पठनार्थं । शुभं भूयात् ॥

श्री. नि० वि० जी० म० पुस्त० चाणस्मा.

श्रीधन्नशालीभद्रचोपाई प्र. ८०१

अथ संवत् १७१० वर्षे मागसिर सुदि मौनएकादशीदिने ॥ पंडित श्री ५ श्री कर्पूरविजय-गणिशिष्यमुनिरूपविजयलिपीकृतं ॥

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

श्रीनिरयावलिसूत्रम् प्र. ८०२

संवत् १७१० वर्षे मृगशिर वदी ६ दिने सोमवारे **गोगुंदा**नगरे लिखितं महोपाध्याय श्री५ श्री**कीर्तिविजय**गणिशिष्यपंडित**जिनविजय**गणिना । लेखकपाठकयोः शुभं ।

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

मूर्खशतकं सस्तबकं प्र. ८०३

प्रशस्तिः ॥ इति मूर्खशतकं संपूर्णं ॥ छ ॥ संवत् १७१० वर्षे ॥ मृगशिर वदि ६ दिने ॥ **गोगुंदा**नगरे ॥ लिखितं पं० **जिनविजयगणिना** ॥ श्रीः ॥

आ० श्री. वि० दान० सू० सं. सा० सं० छाणी.

श्रीधनपालकथा प्र. ८०४

प्रशस्तिः ॥ इति गीतार्थसाधुसंवासे धनपालपंडितकथा ॥ श्रीमन्नृपविक्रमादित्यस्य रौद्रमुनिमहीसंख्याब्दे (१७११) भाद्रवामासे कृष्णपक्षे तिथौ सप्तम्यां मंगलवारे लिखितमिदं योगी-र्ष्यणरातमामार्थाय (?)॥ **त्रिहाट्टकपुर**मध्ये ॥ भद्रं भूयात् लेखकपाठकयो र्द्वयोरिति। शुभमस्तु। श्रीरस्तु॥

आ० श्री० वि० वी० सू० ज्ञा० भं० अमदावाद.

श्रीकालिकाचार्यकथा प्र. ८०५

संवत् १७११ संयुक्तमाघसितदशम्यां तिथौ **वृद्धोकेशज्ञातीय** सा. **रायमल्ल** पुत्र सा. **रायकरण सहस्रकिरणा**भ्यां स्वश्रेयसे श्रीकालकाचार्यकथा स्वीयद्रव्यव्ययेन भांडागारार्थं गृहीतेति.

श्री० जै० आ० पु० सूरत.

श्रीमेघकुमारचोपाई प्र. ८०६

सं० १७११ वर्षे शाके १५७६ प्रवर्त्तमाने पं. **लालजीकेन** लिपीकृता शहेर **पट्टणा**नगरे । आश्विन सुदी १० भोमवासरे । श्राविका **जमकादे** पठनार्थे । श्रेयोऽर्थम् ॥

आ० श्री. वि० दा० सू० सं० सा० सं० छाणी.

संग्रहणी त्रिपाठः प्र. ८०७

संवत् १७११ वर्षे शाके १५७६ प्रवर्त्तमाने वैशाखमासे शुक्लपक्षे १५ तिथौ शुक्रवासरे श्री**बरहाणपुर**मध्ये श्रीखरतरगच्छे पंडित श्री **दयारत्नजी** शिष्य **मतिसिंहेन** लिपीकृतं स्वपठनाय ॥ कल्याणमस्तु । श्रीचिंतामणिप्रसादात् ॥

आ० श्री० वि० दा० सू० सं० शा० सं० छाणी.

तर्कभाषावृत्तिः प्र. ८०८

संवत् १७१२ वर्षे पोष सुद ८ दिने महोपाध्याय श्री ५ श्री**अमृतविजय**गणिचरणेन्दीवरचंचरीकेण मुनि**दीप्तिविजयेन** लिखिता स्ववाचनार्थं ॥ श्री**स्तंभतीर्थ**बंदिरे वाच्यमाना चिरं जयतु ॥ श्रीरस्तु ॥

मु. श्री हं. वि. सं. शास्त्रसंग्रह. वडोदरा.

श्री**भावारिवारणस्तोत्रम्** प्र. ८०९

(सवृत्ति)

संवत् १७१२ वर्षे कार्तिकशुक्लदशम्यां चंद्रे लिखितं **नरसिंहदासेन** प्रमोदार्थं ॥ श्री ॥

आ० श्री० वि० वी सू० शा० सं० अमदावाद,

यशोविजयकृत–सीमंधरजिनस्तवनम् प्र. ८१०

संवत् १७१२ वर्षे चैत्र सुद ११ वार बुधे लिखितं गांधी **मनजी** लिखापितं ॥ ग्रं. ४२२

आ० श्री० वि० मे० सू० सं० ज्ञा० भं० अमदावाद.

श्री**रघुवंशमहाकाव्यम्** प्र. ८११

संवत् नेत्रभुजभूधरेन्दु (१७१२) मितवर्षे शुचिमासे शुक्लपक्षे नवम्यां तिथौ सोमवासरे श्री**दिल्लीनगरे** भ० श्री**जिनवर्धनसूरयः** तेषां शिष्या महो० श्री**विजयवर्धना**स्तत्शिष्येण पंडितप्रवरेण पं० श्री **रागानंदे**नालेखि वक्ताचक्रचूडामणिपातिसाहीश्री**औरंगयेमविजय**निजामराज्ये ॥ श्रीरस्तु श्रीश्रमणसंघस्य । लेखकपाठकयोः श्रीरस्तु ॥

श्री० नि० वि० जी० मणि० पु० चाणस्मा.

श्रीषडावश्यकबालावबोधः प्र. ८१२

संवत् १७१२ वर्षे ॥ भाद्रवा वदि २ मंगलवारे लिखितं ॥ **दीसा**ग्रामे ॥ साध्वीश्री **लावण्यलक्ष्मी**लिखितं । परोपकाराय ॥ शुभं भवतु ॥ कल्याणमस्तु ॥

आ० श्री वि० दा० सू० सं० शा० सं० छाणी.

श्री स्थानांगसूत्रम् प्र. ८१३

सं. १७१३ वर्षे सकलपंडितपरंपरापारीन्द्र पंडित श्री ५ श्री **मेरुसौभाग्यगणि** । आषाढ सुदि दशम्यां दिने अरुणोदयवेलायां अमरत्वं प्राप्ताः । तेषां श्रेयोर्थं लघुभ्राता पं० **सिंघसौभाग्य-गणिना विक्रमनगर**सत्कमभांडागारे स्थापितेयं प्रतिराचंद्रार्कं नंद्यात् । इति मंगलं ॥

श्री. जै० वि० ज्ञा० भं० अमदावाद.

श्रीदशवैकालिकसूत्रस्तबकः प्र. ८१४

सं० १७१३ वर्षे माहमासे कृष्णपक्षे ४ शुक्रदिने लिखितं । .... ग्रंथाग्रं सूत्रं टबार्थ २००७.

श्री जै. आ. पु. सुरत.

श्रीप्राकृतछंदःकोषः प्र. ८१५

प्रशस्ति मूळनी त्रिपाठ । संवत् १७१३ वर्षे मिति फागण वदि १४ वार सोमवार लिखितं श्रावक **देदा गगडाणा**मध्ये । श्री शुभं भवतु । कल्याणमस्तु ॥

श्री गां० गो० ना० सं० ज्ञा० भं० राजकोट.

भुवनदीपकः प्र. ८१६

संवत् १७१३ वर्षे कार्तिक वदि ३ दिने सूर्यवार श्री**पाटणनगरे** लिखितं । श्रीरस्तु लेखक-पाठकयोः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

आ. श्री वि. ल. सू. सं. ज्ञानभंडार खंभात,

श्रीयोगशास्त्रस्तबकः प्र. ८१७

संवत् १७१३ वर्षे आसोजमासे कृष्णपक्षे ॥ पण्डित श्री ५ श्री **रंगसोम**ग०शिष्य-ग० मुनि**सोम**लिखितं श्री**भानुमति**नगरमध्ये ॥

प्र० श्री० कां० वि० सं० शा० सं० वडोदरा,

हेतुगर्भप्रतिक्रमणविधिः प्र. ८१८

पण्डित श्री ५ श्री **सूरकुशल**गणिशिष्यपण्डितश्री**विबुधकुशलेन** लिपीकृतं **देवकपत्तने** संवत् १७१३ वर्षे चैत्र वदि १० रवौ । शुभं भवतु लेखकपाठकयोः ॥ छः छः ॥

श्री नि० वि० जी० म० पुस्त० चाणस्मा.

श्रीकल्याणमंदिरस्तोत्रम् प्र. ८१९

संवत् १७१४ वर्षे चैत्रवदिपञ्चमी बुधवासरे भट्टारक श्री ५ श्री **हीररत्नसूरिभिः** तत् शिष्य पण्डित श्री ५ श्री **लब्धिरत्नगणि** तत्शिष्य गणि श्री ५ श्री **शुभरत्नगणि राजरत्न**-तत्शिष्यमुनि**देवरत्नेन** लिखितं । छ । श्रीरस्तु ॥

प्र० श्री० कां० वि० सं० शा० सं० वडोदरा.

श्रीचतुःशरणस्तबकः प्र. ८२०

संवत् १७१४ वर्षे महासुदि १५ रविवारे भट्टारक युगप्रधान श्री ७ **जिनरंगसूरि**विज-यराज्ये लघुभ्रातृ**मानविजय**लिखितं । श्री**पाटण**मध्ये । सुश्राविका पुण्यप्रभाविका **कनकादेवी** पठनार्थं ॥

पं० श्री**ऋषभविजय**जी ग. तत्शिष्य पं० **दयाविजयगणि**ने वहोरावी छे श्री**पालणपुर**मध्ये.

श्री जैन आ. पु. सुरत.

श्रीपरिशिष्टपर्व प्र. ८२१

संवत् १७१४ वर्षे कार्त्तिकमासेऽसितपक्षे चतुर्थीतिथौ अमृतवेलायां कविवासरे श्री **बृहत्खरतगच्छे** । श्री**जिनभद्रसूरि**शाखायां वाचनाचार्यधूर्य श्रीश्री**कनकसोमगणिगजेन्द्राणां**

तत्च्छिष्य पण्डितोत्तम प्रवर श्रीश्री**लक्ष्मीप्रभु**गणिगजेन्द्राणां तच्छिष्य पंडितोत्तम श्री श्री **सोमकलसगणे**न्द्राणां तच्छिष्य पं. **मानसिंघे**नालेखि ॥ इति श्री परिशिष्टपर्व सम्पूर्ण ॥ लिखितं श्री**पुर** मध्ये ॥ वाच्यमानं पठ्यमानं चिरं नंदतु ॥

श्री. जै. आ. पु. सूरत.

भावनाकुलकस्तबकः प्र. ८२२

लिखितं मुनि **जस** । संवत् १७१४ वर्षे फागण सुदि ९ भौमे । श्रीरस्तु ।

आ० श्री० वि० वी० सू० ज्ञा० भं० अमदावाद.

श्रीषड्दर्शनसमुच्चयलघुवृत्तिः प्र. ८२३

संवत् १७१४ वर्षे फागुणमासे सुदि ७ दिने **स्तंभतीर्थ**मध्ये पण्डित श्रीश्रीश्री**कुंअरविजय**गणिशिष्यगणि**गुणविजयेन** लिखिता चेयं प्रतिः । कल्याणमस्तु ॥ श्रीः ॥

श्री जै० सं० ज्ञा० भं० पाटण.

श्रीसमयसारः प्र. ८२४

संवत् १७१४ वर्षे फाल्गुनमासस्य सितपक्षे सप्तम्यां तिथौ सोमदिने लिखितं उपाध्याय १०८ **मतिकीर्त्तिगणि**मजेन्द्राणां शिष्यपंडितश्री**महिमाकुमार**गणिवराणां तत्शिष्य पण्डित **जयलाभ**लिखितम् स्वयं पठनाय । पत्राणि लिखितानि । शुभं भवतु । कल्याणमस्तु ॥

प्र. श्री. कां. वि. सं. शा. सं. वडोदरा.

श्रीआरंभसिद्धिः प्र. ८२५

लिखितं परिख **गोव्यंदसुतराघवेन** ॥ श्री ॥ संवत् १७१५ वर्षे आसो वदि ८ दिने ॥ मुनि**सौभाग्यपठनार्थं** ॥ श्रीरस्तु ॥ छ ॥ श्री ॥

श्री. नि. वि. जी. मणि. पु. चाणस्मा.

श्रीउपदेशमाला प्र. ८२६

संवत् १७१५ वर्षे श्रावण सुदि ६ सोम श्री **आमरणि**मध्ये पंडितश्री**सुमतिकुशल**गणिशिष्यगणि**विनीतकुशल**लिखितं । यादृशं..........मम दोषो न दीयते । भग्नपृष्ठि........यत्नेन परिपालयेत् ॥

आ. श्री. वि. दा. सू. सं. ज्ञा. सं. छाणी.

श्रीउपदेशमाला प्र. ८२७

प्रशस्तिः ॥ इति श्रीउपदेशमालाप्रकरणं समाप्तमिति ॥ संवत १७९५ वर्षे माहवदि ५ दिने शुक्रवारे पंडितश्री**बुद्धिहंस**गणि तत्पट्टपद्मशिलीमुखाभगणि**विनयहंसेना**लेखि श्री**विक्रमपुरे** बाई कीनां पठनार्थं ॥

श्री शांतिनाथजी ज्ञानभंडार खंभात.

श्रीउत्तराध्ययनसूत्रम् प्र. ८२८
(निर्युक्तिः)

इति श्रीनिर्युक्तिकारकमहात्म्यगाथाचतुष्कं ॥ इति श्रीउत्तराध्ययनं सूत्रं संपूर्णं । लिखितं संवत १७१५ तरा वर्षे मार्गशिर सुदि ११ गुरु । श्री**सुरतिबंदिर**वास्तव्य सा० **मेघजी** भार्या श्राविका **गोरबाई** तत् पूत्री श्रा० **वीरबाई** श्रीउत्तराध्ययन ज्ञानहेतिं वहिराव्युं

श्री. जैन विद्याशाळा ज्ञानभंडार अमदावाद.

श्रीलघुक्षेत्रसमासः प्र. ८२९

संवत् १७१५ वर्षे आसो सुदि ८ दिने लिखितश्च भट्टारकपुरंदर भट्टारक श्री २० श्रीश्री**विजयसिंहसूरी**श्वरशिष्योपाध्यायश्रीश्रीश्री**उदयविजय**गणिशिष्य**देवविजयेन** । पं० श्री**रविविजय**गणिपठनार्थं ।

आ० श्री० वि० वी० सू० सं० ज्ञा० भं० राधनपुर.

श्रीषट्पंचाशिका प्र. ८३०

संवत् १७१५ वर्षे मिति कार्तिकमासे शुक्लपक्षे त्रयोदशीतिथौ भृगुवासरे० पंडित **गुणविमल**गणिवराणां तच्छिष्यप्रवरकन**कनिधान**जी तत्शिष्यपंडित**हीरवर्द्धन**मुनिभिः लिखिता प्रतिरियं । श्री**शीतपुर**नगरेमध्ये.

शेठ मोहोकमचंद मोदी ज्ञानभंडार.

श्रीअनेकार्थतिलकः प्र. ८३१

संवत् १७१६ वर्षे पोषमासे शुक्लपक्षे नवमीतिथौ चंद्रवारे **सुचिग्राम**मध्ये पं० श्री **लब्धिविमल**गणि तत्शिष्य पं० श्री **कनकविमल**गणि तत्शिष्य **राजविमलेन** लिपीकृतोऽस्ति ॥श्रीरस्तु॥

आ. श्री. वि. दा. सू. सं. शा. सं. छाणी.

श्रीतर्कभाषावृत्तिः प्र. ८३२

प्रशस्तिः ॥ संवत् १७१६ वर्षे आसो सुदि चतुर्थीदीने शुक्लपक्षे शुक्रवासरे **द्वीपबिंदरे** लिखिता ॥ श्रीः ॥ छ ॥ श्रीः ॥ छ ॥ श्री ॥ ग्रंथाग्रं. १२०० शुभं भवतु ॥

श्री० नि० वि० जी० मणि० पुस्तकालय चाणस्मा.

श्रीस्वरोदयाध्यायः प्र. ८३३

संवत् १७१६ वर्षे श्री **महिमावर्द्धनसूरिणा**लेखि पुस्तकमिदं ।

श्री जैन संघ ज्ञानभंडार. जामनगर.

श्रीउपदेशचिंतामणिः सवृत्तिः प्र. ८३४

